ग्रन्थानां सूचीपत्रम् ।

	मूल्यम् । रु०	आ०
....	०	६
ीतभाष्याभ्यां संवलितः ।	१	६
३ पुरुषसूक्तम्—सायणभाष्योपेतम् ।	०	४
४ योगरत्नाकरः—वैद्यकशास्त्रीयग्रन्थोऽतीव पुरातनः । ...	५	०
५ ईशावास्योपनिषत्—सटीकशांकरभाष्याद्युपेता ।	०	१४
६ केनोपनिषत्—सटीकशांकरभाष्याद्युपेता ।	१	०
७ काठकोपनिषत्—टीकाद्वयसहितशांकरभाष्योपेता । ...	१	४
८ प्रश्नोपनिषत्—सटीकशांकरभाष्याद्युपेता ।	१	०
९ मुण्डकोपनिषत्—सटीकशांकरभाष्याद्युपेता ।	०	१०
१० माण्डूक्योपनिषत्—सटीकशांकरभाष्यगौडपादीयकारिकाद्युपेता ।	२	५
११ ऐतरेयोपनिषत्—सटीकशांकरभाष्याद्युपेता ।	१	४
१२ तैत्तिरीयोपनिषत्—सटीकशांकरभाष्याद्युपेता ।	१	१२
१३ तैत्तिरीयोपनिषद्भाष्यवार्तिकम्—सुरेश्वराचार्यकृतं सटीकम् ।	२	२
१४ छान्दोग्योपनिषत्—सटीकशांकरभाष्योपेता ।	५	०
१५ बृहदारण्यकोपनिषत्—सटीकशांकरभाष्योपेता ।	८	०
१६ बृहदारण्यकोपनिषद्भाष्यवार्तिकम्—भागत्रयात्मकम् ।	२२	८
१७ श्वेताश्वतरोपनिषत्—भाष्यदीपिकाद्युपेता ।	२	४
१८ सौरपुराणम्—श्रीमद्द्वैपायनप्रणीतमुपपुराणम् ।	३	०
१९ रसरत्नसमुच्चयः—श्रीमद्वाग्भटाचार्यविरचितः । वैद्यकग्रन्थः ।	३	१२
२० जीवन्मुक्तिविवेकः—विद्यारण्यविरचितः सटीकः ।	३	१२
२१ ब्रह्मसूत्राणि—सटीकशांकरभाष्योपेतानि भागद्वयात्मकानि ।	१२	०
२२ श्रीशंकरदिग्विजयः—विद्यारण्यकृतः, टीकाटिप्पणीभ्यां सहितः ।	६	०
२३ वैयासकन्यायमालाविस्तरः—भारतीतीर्थमुनिप्रणीतः । ...	१	१२
२४ जैमिनीयन्यायमालाविस्तरः—श्रीमाधवप्रणीतः ।	८	०
२५ सूतसंहिता—माधवकृतटीकोपेता भागत्रयात्मिका । ...	११	८
२६ हस्त्यायुर्वेदः—पालकाप्यमुनिविरचितः ।	७	६
२७ वृन्दमाधवः—श्रीमद्वृन्दप्रणीतः सटीकः । वैद्यकग्रन्थः । ...	६	१२

२८ ब्रह्मपुराणम्— श्रीमद्व्यासविरचितम् । प्रथमं महापुराणम् । ...	६	४
२९ उपनिषदां समुच्चयः—श्रीनारायणशंकरानन्दकृतदीपिकासहितः ।	६	१२
३० नृसिंहपूर्वोत्तरतापनीयोपनिषत्—भाष्याद्युपेता ।	१	१२
३१ बृहदारण्यकोपनिषन्मिताक्षरा—श्रीनित्यानन्दमुनिविरचिता ।	२	१२
३२ ऐतरेयब्राह्मणम्—सायणभाष्यसमेतम् । भागद्वयात्मकम् ।	१०	१०
३३ धन्वन्तरीयनिघण्टुः—धन्वन्तरिविरचितः । वैद्यकग्रन्थः ।	६	४
३४ श्रीमद्भगवद्गीता—शांकरभाष्योपेता ।	३	०
३४ श्रीमद्भगवद्गीता—सटीकशांकरभाष्योपेता ।	६	४
३५ संगीतरत्नाकरः—शार्ङ्गदेवकृतः सटीको द्विभागः । गानशास्त्रम् ।	१०	४
३६ तैत्तिरीयारण्यकम्—सायणभाष्यसमेतं भागद्वयात्मकम् ।	९	१
३७ तैत्तिरीयब्राह्मणम्—सायणभाष्यसमेतं भागत्रयात्मकम् ।	१४	८
३८ ऐतरेयारण्यकम्—सायणभाष्यसहितम् ।	३	०
३९ संस्काररत्नमाला—गोपीनाथभट्टविरचिता भागद्वयात्मिका ।	१२	८
४० संध्याभाष्यसमुच्चयः—खण्डराजश्रीकृष्णपण्डितादिप्रणीतः ।	२	०
४१ अग्निपुराणम्—महर्षिव्यासप्रणीतम् । महापुराणम् ।	५	४
४२ तैत्तिरीयसंहिता—सायणभाष्यसमेता भागनवकात्मिका । ...	४८	१०
४३ वैयाकरणसिद्धान्तकारिकाः—भट्टोजीदीक्षितकृताः सटीकाः ।	०	१२
४४ श्रीमद्भगवद्गीता—पैशाचभाष्यसमेता ।	१	८
४५ श्रीमद्भगवद्गीता—मधुसूदनश्रीधरकृतटीकोपेता ।	५	४
४६ याज्ञवल्क्यस्मृतिः—अपरार्ककृतटीकासहिता भागद्वयात्मिका ।	१३	०
४७ पातञ्जलयोगसूत्राणि—भाष्यवृत्तिभ्यां समेतानि ।	३	०
४८ स्मृतीनां समुच्चयः—अङ्गिरःप्रभृतिसप्तविंशतिस्मृत्यात्मकः ।	५	०
४९ वायुपुराणम्—महर्षिव्यासप्रणीतम् । महापुराणम् ।	४	१२
५० यतीन्द्रमतदीपिका—श्रीनिवासदासकृता । प्रकाशटीकोपेता ।	१	४
५१ सर्वदर्शनसंग्रहः—माधवाचार्यप्रणीतः ।	२	०
५२ श्रीमद्गणेशगीता—नीलकण्ठकृतटीकोपेता ।	२	०
५३ श्रौतसूत्रम्—सत्याषाढविरचितं भागदशकात्मकम् ।	२८	५
५४ मत्स्यपुराणम्—श्रीमद्द्वैपायनमुनिप्रणीतम् । महापुराणम् ।	६	०
५५ पुरुषार्थचिन्तामणिः—आठवलेइत्युपाह्वविष्णुभट्टकृतः ।	४	०
५६ नित्याषोडशिकार्णवः—भास्कररायोन्नीतटीकासहितः ।	३	८
५७ आचारभूषणम्—हिरण्यकेश्याह्निकमोकोपाह्वत्र्यम्बककृतम् ।	४	६

५८	आचारेन्दुः—मोटेइत्युपाह्वत्र्यम्बकविरचितः ।	४	०
५९	श्राद्धमञ्जरी—केळकरोपाह्वबापूभट्टविरचिता ।	२	०
६०	यतिधर्मसंग्रहः—विश्वेश्वरसरस्वतीकृतः ।	१	१२
६१	गौतमप्रणीतधर्मसूत्रम्—हरदत्तकृतटीकासमेतम् ।	२	८
६२	ईशकेनकठप्रश्नमुण्डमाण्डूक्यानन्दवल्लीभृगूपनिषदः—सटीकाः	२	८
६३	छान्दोग्योपनिषत्—रङ्गरामानुजविरचितप्रकाशिकोपेता ।	३	१२
६४	बृहदारण्यकोपनिषत्—रङ्गरामानुजविरचितप्रकाशिकोपेता ।	३	४
६५	शाङ्खायनब्राह्मणम्—ऋग्वेदान्तर्गतबाष्कलशाखीयम् ।	१	४
६६	काव्यप्रकाशः—उद्द्योतयुतप्रदीपसहितः ।	६	४
६७	ब्रह्मसूत्राणि—दीपिकासमेतानि ।	४	८
६८	बृहद्ब्रह्मसंहिता—नारदपञ्चरात्रान्तर्गता ।	१	१२
६९	ज्ञानार्णवतन्त्रम्—ईश्वरप्रोक्तम् । तन्त्रशास्त्रग्रन्थः ।	१	४
७०	स्मृत्यर्थसारः—श्रीधराचार्यविरचितः ।	१	१०
७१	बृहद्योगतरङ्गिणी—त्रिमल्लभट्टविरचिता भागद्वयोपेता ।	१०	१२
७२	परिभाषेन्दुशेखरः—वैद्यनाथकृतगदाख्यटीकायुतः ।	२	६
७३	गायत्रीपुरश्चरणपद्धतिः—श्रीमच्छंकराचार्यविरचिता ।	१	८
७४	द्राह्यायणगृह्यसूत्रवृत्तिः—रुद्रस्कन्दप्रणीता ।	१	०
७५	ब्रह्मसूत्रभाष्यार्थरत्नमाला—सुब्रह्मण्यविरचिता ।	४	४
७६	ईशकेनकठोपनिषदः—दिगम्बरानुचरकृतव्याख्यासमेताः ।	१	०
७७	वेदान्तसूत्रमुक्तावलिः—ब्रह्मानन्दसरस्वतीविरचिता ।	२	६
७८	त्रिस्थलीसेतुः—नारायणभट्टविरचितः ।	३	१२
७९	छान्दोग्योपनिषत्—मिताक्षराव्याख्यासमेता ।	२	०
८०	वाक्यवृत्तिः—श्रीमच्छंकराचार्यकृता सटीका ।	०	८
८१	आश्वलायनश्रौतसूत्रम्—नारायणकृतवृत्तिसमेतम् ।	४	११
८२	ब्रह्मसूत्रवृत्तिः—हरिदीक्षितविराचिता ।	२	७
८३	संक्षेपशारीरकम्—व्याख्यासहितं भागद्वयोपेतम् ।	९	१
८४	अद्वैतामोदः—अभ्यंकरोपाह्ववासुदेवशास्त्रिप्रणीतः ।	२	०
८५	ज्योतिर्निबन्धः—शूरमहांठश्रीशिवराजविरचितः ।	३	१५
८६	विधानमाला—श्रीनृसिंहभट्टविरचिता ।	४	४
८७	अग्निहोत्रचन्द्रिका—किंजवडेकरोपाह्ववामनशास्त्रिभिः कृता ।	२	१४
८८	निरुक्तम्—दुर्गाचार्यकृतवृत्तिसमेतम् । भागद्वयात्मकम् ।	१६	४

आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ११३

पालघाटनारायणशास्त्रिकृतमखिवर्यभूषणाख्यटिप्पणी-
संवलितस्वकृतमध्वमतविध्वंसनाख्यव्या-
ख्यासनाथीकृतं
श्रीमच्छंकरगणांशसंभूताद्वैतविद्याचार्यरङ्गराजाध्वरिसूनु-
श्रीमदप्पय्यदीक्षितविरचितं-

मध्वतन्त्रमुखमर्दनम् ।

तदिदं

वे० शा० सं० सूर्युपाह्वकर्नाटकरामचन्द्रशास्त्रिभिः
प्रस्तावनया विभूष्य संशोधितम् ।

एतत्पुस्तकं
बी. ए. इत्युपपदधारिभिः

विनायक गणेश आपटे

इत्येतैः
पुण्याख्यपत्तने
श्रीमन् ' महादेव चिमणाजी आपटे ' इत्यभिधेय-
महाभागप्रतिष्ठापिते

आनन्दाश्रममुद्रणालये
आयसाक्षरैर्मुद्रयित्वा
प्रकाशितम् ।

शालिवाहनशकाब्दाः १८६१ ।
खिस्ताब्दाः १९४० ।

मूल्यं सार्धो रूपकः (१।८) ।

सव्याख्यस्य सटिप्पनीकस्य मध्वतन्त्रमुखमर्दनस्य

विषयानुक्रमणिका।

प्रकाशकः ।

॥ श्रीः ॥

॥ प्रस्तावना ॥

शङ्करूपेण मच्चितं पङ्कीकृतमभूद्यया ।
किंकरी यस्य सा माया शंकराचार्यमाश्रये ॥

अयि सागराम्बरामण्डलालंकारायमाणस्फीतगुणा विपश्चिन्मणयः, नाज्ञातपूर्वमिदमावेदनीयं, यदिह विरिञ्चिप्रपञ्चे सर्वोऽपि परमसुखावाप्तिपूर्वकात्यन्तिकदुःखनिवृत्त्यर्थं स्वभावत एव प्रवर्तत इति । परंतु नैकभवभ्रमणसमासादितसकलाकुशलकलापस्य सांसारिकप्राणिजातस्य जरामरणादिदोषकलुषितस्यैतादृशदुःखनिवृत्तेरयमेव प्रकृष्ट उपाय इत्येवं निश्चयासंभवेन यस्मिन्कस्मिन्नपि दुःखसाधन एवाऽऽपातरमणीयतामवलोक्य सुखसाधनत्वभ्रान्त्या प्रवर्तमानस्यात एव पुनः पुनः दुःखमहोदधौ निपतत उद्दिधीर्षया प्रवृत्ता मातापितृसहस्रेभ्योऽप्यधिकतरवात्सल्यशालिनी भगवती श्रुतिर्यथाधिकारं कर्मोपासनाज्ञानानि न्यरूरुपत् । अथानन्तरूपायास्तस्या दुरधिगमार्थानालोचयद्भिर्महर्षिभिरल्पमतीनामनुग्रहाय स्मृतयः प्रणीताः । अत एव सनातनो वैदिको धर्मः श्रौतः स्मार्त इति व्यपदेशं भेजे । अयमेव धर्मः चतुर्षु पुरुषार्थेषु प्रथमः । द्वितीयतृतीयावर्थकामाख्यौ पुरुषार्थौ लोकत एवावगन्तुं शक्याविति न तदधिगमाय विशेषतो यत्नः कृतः प्राचीनैः । तदेतत् पुरुषार्थत्रयमपि सातिशयं क्षयिष्णु चेति निर्विवादं समस्तास्तिकमहाशयानां, मोक्षाख्यः चतुर्थः पुरुषार्थः परमो नित्य इति च । स च नित्यनिरतिशयब्रह्मानन्दाविर्भावलक्षणो निखिलशास्त्रमूर्धन्यभूताद्वेदान्तादेवोपनिषल्लक्षणाद्भवतीति निःशङ्कं प्रतिपादयामः । सोऽप्यतिगभीरार्थकतयाऽल्पधिषणैर्दुर्विज्ञेय इति समालोच्य परमकारुणिको भगवान्नारायणः महर्षिबादरायणरूपेणावतीर्य शारीरकमीमांसामसूत्रयत् । एतावता निर्मलो निष्कण्टकश्च कृत औपनिषदः पन्थाः ।

तदनु कालमाहात्म्येन प्राणिनां बुद्धिमान्द्याद् ब्रह्मसूत्राणां यथावदर्थानधिगमेन स्वार्थोद्दिप्साव्यान्यथानीयमानानां मुमुक्षुजनतोपकृतये कृपालुना भगवता भूतभावनेन शंकरेण श्रीशंकराचार्यरूपेणावतीर्य विरचय्य भाष्यं पुनरुज्जीवितः सनातनो मार्ग इति सर्वथा समुद्धृतो मुमुक्षुजननिवहः। यद्यपि तेषां श्रीशंकराचार्याणामुपरि रामानुजश्रीकण्ठमध्ववल्लभनिम्बार्कप्रभृतिभिराचार्यैर्यथास्वमति भाष्याणि विरचितानि स्वस्वपक्षोपोद्बलकानि परपक्षप्रतिक्षेपकाणि दरी-

दृश्यन्ते । सर्वैरपि यावद्बुद्धिबलं महान्तमायासमङ्गीकृत्य सूत्राण्यन्यथाकृत्यापि स्वस्वपक्षदृढीकरणाय परपक्षासारताप्रदर्शनायानेका युक्तय उपन्यस्ताः । अथाप्येतानि भाष्याण्यालोचयद्भिः "किं सूत्राणां यादृशोऽर्थः प्रतिपादितस्तैस्तैर्भाष्यकृद्भिः स सर्वोऽपि सूत्रकृत्तात्पर्यविषय उतान्यतमः कश्चित्" इति कृते विमर्शे एकतम एव सूत्रतात्पर्यविषयो न परस्परविरुद्धः सर्वोऽपीति भवति निश्चयः । तथा हि—वैष्णवाः किल विष्णुमेव परं मन्वते, शिवादीनां तद्दास्यं चाभ्युपयन्ति । शैवा हि शिवमेव परमुद्घोषयन्ति, अपरान् तदधीनान् ब्रुवते । एवमेव सर्वत्र परस्परविरुद्धानि रामानुजीयादिद्वैतमतानि न कथमपि सूत्राक्षरारूढानीति वक्तुं शक्यम् । यद्यपि सूत्रस्य विश्वतोमुखत्वेन सर्वोऽपि सूत्रार्थ इति वक्तुं सुशकम्, अथापि न तद्विपश्चिच्चेतसां चमत्कारमावहति । यदि सर्वोऽपि सूत्रार्थस्तर्हि "मध्वादिष्वसंभवादनधिकारं जैमिनिः" इति सूत्रस्य मध्वरामानुजादीनां ब्रह्मविद्यायां नास्त्यधिकारः । असम्भवात्—इति जैमिनिः, इत्यर्थं कश्चिद्ब्रूयात् । अपरः "भावं तु बादरायणोऽस्ति हि" इति सूत्रस्य—यद्यपि नास्ति तेषामधिकारः, अथापि यथाकथंचिदधिकारस्य भावं बादरायणोऽनुमन्यते—इत्यर्थं वदेत् । एवं सति सूत्रार्थ आकुलीकृतो भवेत् । सूत्राणां शिवविष्ण्वादिप्रतिपादकत्वे "अथातो विष्णुजिज्ञासा" "शिवजिज्ञासा" इत्येवमेव सूत्रारम्भो भवेत् । न तथा दृश्यते । अतो वक्तव्यमेक एव परमसुखसाधकोऽर्थः सूत्राणामिति । ततः परिशेषाच्छ्रीशंकरभगवत्कृतभाष्यानुसार्येव सूत्रकृत्तात्पर्यविषय इति निश्चिनुमः । किंच कपिलकणादादिभिर्दर्शनकृद्भिः परपक्षदूषणप्रस्तावे—अद्वैतमेव वेदान्तमतत्वेनानूद्य दूषितं, तत्समये भगवान् बादरायण एव वेदान्ती नान्यः कश्चन । न हि तदन्येन केनापि वेदान्तार्थनिर्णयाय सूत्राणि कृतानि सन्ति । अतोऽपि व्यासस्याद्वैत एव तात्पर्यं कपिलादिमहर्षिसाक्षिकं निर्भयमुद्घोषयामः । व्यासभगवतः अद्वैत एव तात्पर्यमित्येतद्दीक्षितवंशजैरेव कृते व्यासतात्पर्यनिर्णये विस्तरशो द्रष्टव्यम् । लक्ष्मीपतेर्नारायणस्याऽऽशयं को वाऽन्यः प्रकटीकर्तुं पारयेदृते भवानीशात् । इत्यलं पल्लवितेन ।

यद्यपि रामानुजश्रीकण्ठमध्वादिभाष्याणि कियत्यप्यंशे सनातनधर्मानुसारीण्येव, यथा विष्ण्वाद्युपासनासु, अथापि बहुत्र वैदिकमर्यादाया उल्लङ्घनं दृष्टिदृश्यते यथा तप्तमुद्राङ्कनादौ. तप्तमुद्रादीनां धर्मशास्त्रनिषिद्धत्वं भट्टोजीदी-

क्षितकृततत्त्वकौस्तुभभूमिकायां प्रकाशयिष्यमाणायां धर्मशास्त्रवचनोदाहरणेन निपुणतरमुपपादयिष्यामः । दीक्षितवर्यैरपि मध्वतन्त्रमुखमर्दने स्पष्टमभिहितम् ।

तथाऽप्यानन्दतीर्थीयं मतमग्राह्यमेव नः ।
यत्र वैदिकमर्यादा भूयस्याकुलतां गता ॥ इति ।

एवं पाञ्चरात्राद्यागमानुसारेणोपनिषदर्थानां मलिनीकरणेन जनतां कष्टामधोगतिं प्रापयतो रामानुजश्रीकण्ठमध्वादीनवलोक्य श्रीमदप्पय्यदीक्षितवर्यमधुसूदनसरस्वत्यादिभिः सत्यपि भगवत्पादादिकृते भाष्यभामत्यादिग्रन्थजातेऽद्वैततत्त्वप्रकाशके परमतासारताप्रदर्शनं विना मुमुक्षुजनताया निष्कम्पमद्वैततत्त्वे न प्रविविक्षति मन इति मनीषया रामानुजशृङ्गभङ्ग—मध्वतन्त्रमुखमर्दनाद्वैतसिद्ध्यद्वैतरक्षणसिद्धान्तबिन्दुतत्त्वकौस्तुभाद्या ग्रन्था निरमायिषत । तत्र दीक्षितेन्द्रविरचिते “ मध्वतन्त्रमुखमर्दने ” प्रायो मध्वमतासारतैव प्रतिपादिता । यद् वयं प्रकाशयितुं प्रवृत्ताः सोऽयं ग्रन्थः पद्यरूपेण राजते । तदनु तैरेवाल्पज्ञदुर्विज्ञेयतामवलोक्य व्याख्यातम् । तच्च व्याख्यानं “मध्वमतविध्वंसनम्” इति नाम्ना प्रथितम् । तस्मिंश्च शारीरकमीमांसाया आदितोऽधिकरणपञ्चकमानन्दतीर्थीयं खण्डितमस्ति । तेनैवाग्रिमाधिकरणानां सर्वेषामेवासारत्वं प्रदर्शितमित्येतद् दीक्षितवर्यमाहात्म्यं केन वा निर्वक्तुं पार्येत ऋते जगदीशम् ।

तदेतद्ग्रन्थरत्नं मध्वानुयायिना केनचन विजयीन्द्राभिधानेन यतिना “मध्वाध्वकण्टकोद्धारः” इति नामकग्रन्थेन मलिनितम् । तस्मिंश्च ग्रन्थे दीक्षितेन्द्राणां ग्रन्थसरणिं पङ्क्तिशोऽनूद्य तन्न, तत्तुच्छं, तन्निरस्तं, तद्धेयं, इत्यादिवाक्यैः केवलैर्दूषितमित्येतत्तद्द्रष्टॄणां स्वत एव ज्ञायत इति नास्माभिर्वक्तव्यम् । तदेवं खण्डनाभासेन मलिनीकृतं ग्रन्थरत्नं प्रक्षालयितुकामैः श्रीमदप्पय्यदीक्षिगुरुपरम्पराप्रविष्टैः श्रीमन्नाल्वडिकृष्णराजास्थानविद्वत्पदमलंकुर्वद्भिर्महीशूरसंस्कृतमहापाठशालायामद्वैतवेदान्तप्रधानाध्यापकैरस्मद्गुरुवर्यैः श्री० पा. नारायणशास्त्रिपादैः “मखिवर्यभूषण” नाम्नी काचन टिप्पणी कृता । तस्यां दीक्षितेन्द्राणामाशयः सम्यगाविष्कृतः । दीक्षितैः सूचितोऽर्थो विशेषतो विवृतः । मध्वाध्वकण्टकोद्धारकृदारोपिता दोषा निर्युक्तिकताप्रदर्शनेन प्रत्यस्ता इति प्राज्ञानां पुरतो वक्तुमुत्सहते मे चेतः ।

अथ विचारयामः क्व कदा कियन्तं वा समयमध्यासतैते दीक्षितवर्या इति । एते हि तुण्डीरमण्डलान्तर्वर्तिन्यखिलभुवनतललामायमानकाञ्चीपुरपरिसरपरिव-

तीति अडयप्पलनाम्न्यग्रहारे समुदभवन्निति सार्वजनीनम् । यद्यापि तत्रा-न्नवासिनः कतिचन तद्वंश्या इति संकीर्त्यन्ते । एषां हि पितामहः आचार्य-दीक्षितनामा समभवदिति समवगम्यते । तद्यथा तैरेव न्यायरक्षामणौ—"आसे-तुबन्धतटमा च तुषारशैलादाचार्यदीक्षित इति प्रथिताभिधानं...अस्मत्पि-तामहमशेषगुरुं प्रपद्ये "इति प्रतिपादितम् । तेन छन्दोगकुलतिलकेन भरद्वाजकु-लजलधिकौस्तुभमणिनाऽयाजिषताष्टौ क्रतवः, अभोजिषताष्टौ ग्रामाः, अखा-निषताष्टौ तडागाः, अजनिषताष्टौ तनयाः, अबन्धिषताष्टौ शिवालयाः, अदी-पिषताष्टौ दिशश्चेति सर्वमिदं तदन्वयजनिमता नीलकण्ठदीक्षितेन स्वकृतनल-चरित्रनाटकप्रस्तावनायां प्रपञ्चितम् । तस्य चाऽऽचार्यदीक्षितस्य द्वे जाये ययोः प्रथमा सजातीया । द्वितीया च विजातीयवैष्णवकुलतिलकश्रीवैकुण्ठाचार्यवं-श्यश्रीरङ्गराजाचार्यदुहिता "तोतारम्बी नाम्नी । तस्यामुदभवंश्चत्वारस्तनयाः । तेषु ज्यायान् मातामहप्रार्थनाप्रसन्नपितृदत्तरङ्गराजनामधेयः " रङ्गराजाध्व-री"इति सुप्रसिद्धः । स च सर्वविद्याविशारदोऽद्वैतविद्यामुकुरविवरणदर्पणा-द्यनेकप्रबन्धकृत् । तद्यथा तत्रैव नलचरिते—" तस्य पञ्चमः सूनुरद्वैतविद्यामुकु-रविवरणदर्पणाद्यनेकप्रबन्धनिर्माता शीलित एव रङ्गराजाध्वरीति " तस्यैव सुतयोर्द्वयोरयमाद्यः, यो हि अस्मत्कथानायको दीक्षितेन्द्रः। द्वितीयोऽच्चान्दी-क्षित इति । तेषां दीक्षितेन्द्राणां तातादेव सकलविद्यावाप्तिश्चेति स्पष्टमधिग-म्यते । तद्यथा तैरेवोक्तं—" विद्वद्गुरोर्विहितविश्वजिदध्वरस्य श्रीसर्वतो मुख-महाव्रतयाजिसूनोः । श्रीरङ्गराजमखिनः श्रितचन्द्रमौलिरस्त्यप्पदीक्षित इति प्रथितस्तनूजः " इति । तथा—परिमलेऽपि प्रथमाध्यायाद्यतृतीयचरणयोः समा-प्तौ च दृश्यते । न्यायरक्षामणौ च—यं ब्रह्मनिश्चितधियः...श्रीरङ्गराजमखिनं गुरुमानतोऽस्मि " । इति । एवं शिवतत्त्वविवेकसिद्धान्तलेशसंग्रहाद्यनेक-प्रबन्धवचनैः सर्वजिद्यजनादिमहामहिमभूषितस्य सकलतन्त्रपारदृश्वनः श्रीसर्व-तोमुखमहाव्रतयाजिश्रीमदाचार्यदीक्षितपौत्रस्य श्रीरङ्गराजाध्वरितनयश्रीमद-प्पय्यदीक्षितस्य तातादेव समुपात्तसकलकलाकलापविस्तरस्य श्रीमतः अप्पदी-क्षित इत्येव नाम । परन्तु कर्नाटान्ध्रदेशादिव्यवहारसङ्गतं—अप्प, अय्य—इति पदद्वयमादाय अप्पय्यदीक्षित इत्येव भूयान् व्यवहारः ।

इमे च श्रीविजयनगराधीश्वरस्य श्रीकृष्णराजसूनोः चिन्नबोम्मप्रमहीपतेः तदग्रजस्य च नरसिंहदेवापरपर्यायस्य श्रीनरसभूपालदेवस्य तत्सूनोः

वेङ्कटपतिरायस्य च समकालिका इति सुनिश्चयमवगम्यते । तथा हि——समरपुङ्गवदीक्षितैर्यात्राप्रबन्धे——" हेमाभिषेकसमये परितो निषण्ण-सौवर्णसंहतिमिषा चिन्नबोम्मभूपः । अप्पय्यदीक्षितमणेरनवद्यवि-द्याकल्पद्रुमस्य कुरुते कनकालवालम् " । इति वर्णितम् । तथाऽन्यै-रपि——" कर्णश्रीचिन्नबोम्मक्षितिपतिरभितो लम्भयञ्शातकुम्भस्तोमं हेमा-भिषेकप्रणयनसमये यस्य मूर्तिं प्रशस्याम् । रेजे श्रीरङ्गराजाध्वरिवरकलशा-म्भोधिलब्धप्रसूतेर्विद्याकल्पद्रुमस्य स्वयमिव कलयञ्जातरूपालवालम् । " इति । एवमादिभिस्तेषां चिन्नबोम्मभूपतेः समकालिकतोक्ता भवति । नरसदेवसमकालि-कत्वं च तैरेव चित्रमीमांसायां परिणामोत्प्रेक्षाप्रकरणयोः "द्विभाव:—पुष्पकेतोः, नरसिंह धरानाथ के वयं तव वर्णने...नरसिंहमहीपाल विदुस्त्वां मकरध्वजम् । इत्यादिश्लोकैः प्रतिपादितम् । वेङ्कटपतिसमकालिकत्वं च विधिरसायनस्थे " अव्याप्तिः पौर्णमास्याम् " इतिश्लोकव्याख्याने स्पष्टमधिगम्यते । इमे च कृष्णराजनरसभूपचिन्नबोम्मवेङ्कटक्षोणिपाला आङ्गलेतिहासरीत्या तदीय-षोडशशतकपरार्धादारभ्य सप्तदशशतकपरार्धं यावदासन्नित्यध्यवसीयते । एषां दीक्षितेन्द्राणामायुर्द्वासप्ततिः समाः । तथाहि——तदनुजपौत्रेण नीलकण्ठदीक्षितेन निरूपितं शिवलीलार्णवे——" कालेन शंभुः किल तावताऽपि कलाश्चतुःषष्टिमिताः प्रणिन्ये । द्वासप्ततिं प्राप्य समाः प्रब-न्धाञ्शतं व्यधादप्पयदीक्षितेन्द्रः । इति । किंच तैरेव स्वनिर्णयावसरे चिदम्बरे " चिदम्बरमिदं पुरं प्रथितमेव पुण्यस्थलं सुताश्च विनयोज्ज्वलाः सुकृतयश्च काश्चित्कृताः । वयांसि मम सप्ततेरुपरि नैव भोगे स्पृहा न किंचिदहमर्थये शि-वपदं दिदृक्षे परम् । " " आभाति हाटकसभानटपादपद्मज्योतिर्मयो मनसि मे तरुणारुणोऽयम् । " इत्यभिधायार्धोक्त एव विरते "नूनं जरामरणघोरपिशाचकी-र्णा संसारमोहरजनी विरतिं प्रयाता " इति तदुत्तरार्धमापूरयांचक्रुस्तत्तनया इति चाद्यापि श्रूयते—

इदमत्रानुसंधेयम्—यत्किल कदाचिदेते स्वाभिमानिनं विजयनगराधीश्वरं श्रीकृष्णराजापराभिधं वेङ्कटक्षितिपतिमुपनिषेव्य विश्वजिद्यागविधित्सां च वि-शदय्य विजयनगराद्वाराणसीमनुप्राप्य तत्रैव पञ्चक्रोशयात्राविश्वेश्वरार्चनजाह्न-वीनिषेवणादिनिरताः कमपि कालमूषुः । तदानीमेव तेषां मीमांसकेन पण्डित-राजमीमांसागुरुणा खण्डदेवेन सह संगतिः, तस्मै च विधिरसायनार्पणमित्या-

दि समजनि । तदानीमेव भट्टश्रीशेषवीरेश्वरसब्रह्मचारिणा श्रीशेषकृष्ण-दीक्षितान्तेवासिना सिद्धान्तकौमुदीमनोरमाशब्दकौस्तुभतत्त्वकौस्तुभादिप्रणेत्रा भट्टोजीदीक्षितेन सह समागम इत्यौत्तराः। सेतुयात्रायै दक्षिणां दिशं प्रस्थितेन तेन स्वस्थान एवैषां समागम इति दाक्षिणात्याः । तत्र निर्णेतुमन्यतरद्यद्यपि नोपायस्तथाऽपि अप्पय्यदीक्षितानां भट्टोजिना सहाऽऽसिका वाराणस्यामभवदिति स्पष्टं सप्रमाणं ब्रूमः । अस्मिन्नेव समये स्थाविरमापन्नस्तैलिङ्गवेङ्गिनाडुकुलावतंसः पेरुभट्टात्मजः शेषकृष्णदीक्षितसुतश्रीशेषवीरेश्वरदीक्षितशिष्यः " जगन्नाथपण्डितः " स्वगुरुजनकविरचितप्रक्रियाप्रकाशाख्यप्रक्रियाकौमुदीव्याख्यानखण्डनच्छायापन्नां भट्टोजीनिर्मितां प्रौढमनोरमामवलोक्य गुरुध्रुगयमित्यसूयन्नस्मै समास्त वाराणस्यां शान्तसकलविषयोपभोगेच्छ इति तच्चरित्रावलोकिनां स्फुटमिति नेह प्रतन्यते ।

श्रीमदप्पय्यदीक्षितेन्द्राणां जगन्नाथेन समागमः स्वकीयद्वासप्ततितमाब्दपूर्वार्धे । स च जगन्नाथ औरङ्गजेबेन शहाजहांप्रभौ कारागारं प्रवेशिते तदसहमानेन वाराणसीं प्रविश्य तत्रत्यैरनाचार इत्यनादृते प्राणान् विमुमुक्षुः भागीरथीं प्राप । तत्रैव तयोः समागमः । ततश्चायं समय आङ्ग्लाब्दरीत्या १६५८ भवति । स चेद्दीक्षितानां द्वासप्ततितमः । ते १५८६ वत्सरे संजाताः १६५९ वत्सरे प्रापुरैश्वरं पदमिति निर्विवादम् ।

एतत्प्रणीताः प्रबन्धाश्च परःशतं वर्तन्त इति " चतुरधिकशतप्रबन्धनिर्माणालंकर्मीण " इत्यादि तदीयविरुदावलीभिर्विशदी भवति । परंतु पञ्चाशतः प्रबन्धानामभिधानाविषयाद्युपलभ्यते । अन्येषां तु नामापि न श्रूयते—

तत्र च दृष्टश्रुतानां प्रबन्धानामियमियं

पट्टिका—

+अलंकारशास्त्रे+	+व्याकरणशास्त्रे+
१ कुवलयानन्दः	६ नक्षत्रवादावली
२ चित्रमीमांसा	७ प्राकृतचन्द्रिका
३ वृत्तिवार्तिकम्	+पूर्वमीमांसायाम्+
४ नामसंग्रहमाला	८ चित्रपुटः
५ तद्व्याख्या	अयमपि नाम्नैव श्रुतः ।
उभे ह्येते नाममात्रविश्रुते ।	९ विधिरसायनम्

–इति–

सत्यप्येषां सकलतन्त्रनैपुणे विशेषतो वैदुषी पूर्वोत्तरमीमांसयोरित्यतोऽप्यर्वाचीनानां पण्डितशिरोमणीनां सर्वज्ञकल्पानां मधुसूदनसरस्वत्यादीनां वचसैव ज्ञायते। किंचैतानुदाहरन्ति भगवतो भवानीपतेरंशावतीर्णान् शांभवगणपारिषदमूवान्–तद्यथा शिवरहस्ये नवमांशे " दीक्षितोऽपि भवेत्कश्चिच्छैवश्छन्दोगवंशजः "। "भासुराचारनिरतः शिवभक्ताग्रणीः सुधीः।

शैवशास्त्रं तदा भूमौ लुप्तं विस्तारयिष्यति ॥ ”

तथाऽन्यत्रापि—

“ कलौ छन्दोगोऽपि श्रुतिशिखरतात्पर्यवचनैर्मम ग्रन्थोद्धरैः जयति मद्वादिद्विपहरिः । भिनत्त्येवं दीक्षाक्षपितसुखवृत्तिःशिवपदे शिवे दभ्रस्थाने भवति च ततोऽन्ते मम गणः” इति च प्रतिपादितम् । एवं मया यथामति दीक्षितेन्द्रचरितं यथोपलब्धि च तत्कालादिकं च निरूपितमपि निरसूयैरितोप्यतिशयितप्रमाणपुरःसरं निरूप्यतामिति प्रार्थ्य विरमामि ।

मया प्रथमतः “ मध्वमतविध्वंसननामकं ” ग्रन्थरत्नममूल्यमस्तीति केवलं नाम्नैवावगतं कस्यचिन्महाशयस्य मुखात् । ततः तन्मृगयता श्रीमतां श्रीमन्नाल्वडिकृष्णराजास्थानविदुषां महीशूरस्थपाठशालायां धर्मशास्त्रप्रधानाध्यापकानां पि. आर. शिवसुब्रह्मण्यशास्त्रिणां निकटे ग्रन्थलिप्या चोळदेशे मुद्रितमतिप्राचीनमुपलब्धम् । तत्र स्वव्याख्ययोपेतं मध्वतन्त्रमुखमर्दनमासीत् । मया तु ग्रन्थलिपिरनभ्यस्ताऽपि तदवलोकनकुतूहलेन यत्नतोऽधीता । ततस्तवदलोकनेन मन्मनसि “सर्वजनदुर्लभमिदं ग्रन्थरत्नं देवनागरलिप्या मुद्रयित्वा प्रकाशयेयम्” इति मतिः समुदजृम्भत । एवमालोचयतो मम वत्सरत्रयमतीतम् । कदाचिदीश्वरप्रेरितेन श्रीविद्वन्मणिविद्यालंकारादिपदविराजितानामुप्पिनबेटगेर्यभिजनानां धारानगरे श्रीशंकराचार्यसंस्कृतपाठशालायां मुख्याध्यापकानां श्रीनागेशशास्त्रिवर्याणां संनिधौ सर्वोऽपि मम निष्करहितस्य मनोभावः प्रकटीकृतः । तैरेवं प्रत्युत्तरितं—एतन्मुद्रणाय पुण्यपत्तनस्थानन्दाश्रमाधिपतिं प्रार्थय, तत्र साहाय्यं कुर्मो वयमिति ।

तथैवानुष्ठिते मयि श्रीमद्भिरानन्दाश्रमाधिपैरेतन्मुद्रणायावकाशो दत्त एव । तदाऽहं प्रमोदसंदोहतुन्दिलमनाः कृतसफलप्रयत्नः अस्मद्गुरुवर्यनिकटे सर्वमिदं विज्ञापितवान् । तैः कृपया स्वकृता “ मखिवर्यभूषण ” नाम्नी टिप्पन्यपि मह्यमनुगृहीता । तेनाहं द्विगुणितानन्दः तल्लेखनशोधनादिकार्येषु व्यापृतः । समाप्तश्चाद्यैव मदीयः कार्यभरः परेशकृपया निरन्तरायम् ।

प्रस्तावनालेखनसरणिप्रदर्शनेन टिप्पणीदानेन चानुग्रहीतॄणामस्मद्गुरुवर्याणां पादाम्बुजे प्रणतिकुसुमाञ्जलीन् समर्पयामि ।

सव्याख्यमूलपुस्तकदानेनोपकर्तॄणां पि. आर. शिवसुब्रह्मण्यशास्त्रिणां नतिपरम्पराः निवेदयामि ।

सर्वस्यास्य मूलकारणानां विद्वन्मणिश्रीनागेशशास्त्रिणां प्रणामसंततीरुपहारी करोमि।

लेखनादिषूपकृतवतां मन्मित्रवर्याणां, हिरेमङ्गळूराभिजन ब्र०श्री० सीतारामभट्टानां कर्क्यभिजन ब्र० श्री० वेङ्कटरमणशास्त्रिणां चोपकारभारं बिभर्मि ।

मुद्रणशोधनादिकार्येषु विशेषतोपकर्तॄणमानन्दाश्रमाधिपानां तत्रत्यविदुषां च सहस्रशो धन्यवादान् समर्पयामि ।

एवममूल्यस्यानतिसुलभस्य ग्रन्थजातस्य प्रकाशकानामद्वैततत्त्वश्रद्धालूनामानन्दाश्रमाधिकारिणां भूयोऽप्येवं मतिर्दीर्घायुरारोग्यं च प्रवर्धतामिति उमारमणं भगवन्तमनवरतं प्रार्थयामः ।

एवं शोधितेऽप्यस्मिन्मानवमात्रसंभाव्यमानप्रमादाद्वा सीसकाक्षरदोषाद्वा पतितान् दोषान् क्षन्तुमर्हन्ति सन्तो विपश्चित इति भूयो भूयः प्रणम्य विरमामः।

शके १८६१ प्रमाथि–संवत् आश्विनकृष्णचतुर्थी सौम्यवासरः ।	महाजनविधेयः कर्क्यभिजनः सूर्युपाह्वरामचन्द्रशास्त्री वेदान्तिविद्वान् (महीशूर)

ॐ तत्सद्ब्रह्मणे नमः ।

मत्विवर्यभूषणाख्यटिप्पणीपरिकर्मितमध्वमतविध्वंसनाख्यया

व्याख्यया सनाथीकृतं

श्रीमदप्पय्यदीक्षितेन्द्रविरचितं

मध्वतन्त्रमुखमर्दनम् ।

अथोपोद्घातप्रकरणम् ।

व्या०—उद्घाट्य योगकलया हृदयाब्जकोशं धन्यैश्चिरादपि यथारुचि गृह्यमाणः ।
यः प्रस्फुरत्यविरतं परिपूर्णरूपः श्रेयः स मे दिशतु शाश्वतिकं मुकुन्दः ॥१॥

मध्वतन्त्रमुखमर्दनं मया यत्कृतं प्रकरणं मिताक्षरम् ।
पद्यरूपमनतिस्फुटाशयं तत्सुखावगतये विविच्यते ॥ २ ॥

आनन्दतीर्थप्रवर्तितशारीरकशास्त्रप्राथमिकपञ्चाधिकरणप्रक्रियां प्रायस्तन्मतमर्यादयैव दूषयितुं प्रकरणमारभमाणः प्रारिप्सितप्रकरणनिर्विघ्नपरिसमाप्त्यादिप्रयोजनायाऽऽदौ विशिष्टेष्टदेवतानुसंधानसंकीर्तनरूपं मङ्गलमाचरन्नेव

टि०— (१) नमो हरिहराभिन्नगुरुपादाम्बुजन्मने ।
नमज्जनतमोभित्तिचुञ्चुतिग्ममरीचये ॥ १ ॥

इह खलु तत्रभवद्भिरप्पय्यदीक्षितेन्द्रचरणैः प्रारिप्सितस्य ग्रन्थवरस्य निर्विघ्नपरिसमाप्त्यर्थं कृतेष्टदेवताशीरूपमङ्गलं शिष्यशिक्षायै निबध्यते टीकायाम्—उद्घाट्येति । योगकलया—अनवरताभ्यस्तयोगसाधनेन हृदयाब्जकोशं पङ्कजमुकुलसदृशं मन उद्घाट्य स्फुटीकृत्य बाह्येन्द्रियनिग्रहपूर्वकमन्तरिन्द्रियं सविकल्पकसमाधिना वशीकृत्येति यावत् । धन्यैः—सुकृतिभिः सनकादियोगिवर्यैः, यथारुचि—रामकृष्णनटराजादिरूपेण, गृह्यमाणोऽपि—चिन्त्यमानोऽपि यो मुकुन्दः—शुद्धसत्त्वप्रधानमायोपाधिकः परमेश्वरः, परिपूर्णरूपः—सर्वकल्पनाधिष्ठानरूपः सच्चिदानन्दब्रह्मस्वरूपः, अविरतं—त्रिकालाबाध्यतया, प्रस्फुरति—सत्तास्फूर्तिप्रदानेन सर्वप्रत्यग्रूपतया भाति, सः—पूर्वोक्तः, तत्त्वमस्यादिमहावाक्यजन्याखण्डवृत्त्यभिव्यङ्ग्यः सन्, शाश्वतिकं श्रेयः—नित्यं मोक्षसुखं दिशतु—प्रयच्छतु । अविद्यानिवर्तनपुरःसरमस्मत्प्रत्यगात्मरूपो भवत्विति यावत् ॥ १ ॥

(२) यदर्थं मङ्गलमाचरितं तत्प्रतिजानीते—मध्वतन्त्रेति । मध्वतन्त्रस्य—सटीकस्याणुभाष्यस्य मुखं—आद्यमधिकरणपञ्चकं तस्य मर्दनं—तद्ग्रन्थस्थभूयःप्रामाणिकमर्यादालङ्घनस्य तन्मतमर्यादयैव प्रदर्शनेन खण्डनं मिताक्षरं—अर्थभूयिष्ठमल्पाक्षरं अनतिस्फुटाशयं—अल्पज्ञदुर्विज्ञेयाभिप्रायं सुखावगतये—मध्वमतखण्डनेच्छूनामनायासप्रतिपत्तये, अत एव वक्ष्यति "तन्मतखण्डनकौतुकिनां विदुषां मुदे" इति । विविच्यते—सरलया वाण्या व्याख्यायते ॥ २ ॥

शिवं विष्णुं वा यद्यभिदधति शास्त्रस्य विषयं
तदिष्टं ग्राह्यं नः सगुणमपि तद्ब्रह्म भजताम् ।
विरोधो नातीव स्फुरति नहि निन्दा नयविदां
न सूत्राणामर्थान्तरमपि भवद्वार्यमुचितम् ॥ १ ॥

व्या०– प्रकरणारम्भं तावदाक्षिपति—शिवमिति । वस्तुतो निर्विशेषब्रह्मणि प्रतिष्ठितस्यापि शारीरकमीमांसाशास्त्रस्य केचन शिवं विष्णुं वा

टि०– १ आक्षिपतीति–निर्विशेषपरेऽस्मिन्ब्रह्ममीमांसाशास्त्रे तत्र तत्र निरूपितस्य सगुणस्वरूपस्यापि स्वाभिप्रेतत्वेन विष्णुपरतया प्रवृत्तस्य मध्वतन्त्रस्य खण्डने प्रवृत्तिर्नोचितेति भावः । एतदेव प्रथमश्लोकान्ते वक्ष्यति " आनन्दतीर्थीयं मतं कुतो न ग्राह्यं येन तद्दूषणे प्रवृत्तिरित्याक्षेपाभिप्राय इति ।

शिवं विष्णुं वेति–अत्र वाशब्दोऽनास्थायां बोध्यः । अनेन " ब्रह्ममीमांसाशास्त्रस्य निर्विशेषब्रह्मपरत्वेऽपि सगुणवाक्यानां तात्पर्यनिर्णयार्थं तत्र तत्र सगुणं ब्रह्मापि विचारितं; तच्च शिवरूपं विष्णुरूपं वा भवतु न नोऽत्राऽऽग्रहः; तयोर्भेदस्योत्कर्षापकर्षयोश्चाभावात्, भेददर्शिनो महतः प्रत्यवायस्य प्राप्तेश्चेति सूचितम् । तदुक्तम्–सौरपुराणे–२४ तमेऽध्याये शिवेन विष्णुं प्रति–" नाऽऽवाभ्यां विद्यते भेदो मच्छक्तिस्त्वं न संशयः । त्वन्मयं मन्मयं सर्वमव्यक्तं पुरुषात्मकम् ॥ इति । कौर्मेऽपि " न मे नारायणाद्भेदो विद्यते हि विचारतः । तन्मयोऽहं परं ब्रह्म स विष्णुः परमेश्वरः ॥ इति । हरिवंशेऽपि–" यो विष्णुः स तु वै रुद्रो यो रुद्रः स पितामहः । एकमूर्तिस्त्रयो देवा रुद्रविष्णुपितामहाः ॥ इति । भारतेऽपि— " रुद्रो नारायणश्चैवेत्येकं सत्त्वं द्विधाकृतम् ॥ इति । तयोरुत्कर्षापकर्षाभावोऽपि कौर्मे पठितः—क्वचिद्रुद्रः क्वचिद्विष्णुः क्वचिद्ब्रह्मा प्रशस्यते । नानेन तेषामाधिक्यं न्यूनत्वं वा कथंचन ॥ इति । भेददर्शिनो निन्दा च स्मर्यते नारदीये—" हरिरूपी महादेवो हररूपी जनार्दनः । ईषदप्यन्तरं नास्ति भेदकृन्नरकं व्रजेत् ॥ इति । कौर्मेऽपि—ये त्विमं विष्णुमव्यक्तं मां च देवं महेश्वरम् । एकीभावेन पश्यन्ति न तेषां पुनरुद्भवः ॥ येऽन्यथा संप्रपश्यन्ति मत्वेमं देवतान्तरम् । ते यान्ति नरकान्घोरान्हतेषु च व्यवस्थितिम् । कर्मविपाकेऽपि—यो ब्रह्मविष्णुरुद्राणां भेदमुत्तमभावतः । साधयेदुदरव्याधियुक्तो भवति मानवः ॥ इति । वायुपुराणेऽपि—" अयं परस्त्वयं नेति संरम्भाभिनिवेशिनः । यातुधाना भवन्त्येव पिशाचाश्च न संशयः ॥ इति । महाभारतेऽपि—" शिवं प्रति विष्णुवचनम्—" यस्त्वां द्वेष्टि स मां द्वेष्टि यस्त्वामनु स मामनु ॥ इति । भविष्योत्तरे च युधिष्ठिरं प्रति भगवद्वचनं—" मम भक्तः शिवद्वेषी मद्द्वेष्टा च शिवप्रियः । तावुभौ नरकं यातो यावच्चन्द्रदिवाकरौ ॥ इति ।

२ वस्तुतो निर्विशेषेति—अयं भावः—" अथातो ब्रह्मजिज्ञासा (ब्र० अ० १

व्या०—विषयं वदन्ति चेत्तदिष्टमेव । यतस्ताच्छिवरूपं विष्णुरूपं वा सगुणं ब्रह्मोपासीनानामस्माकमद्वैतवादिनामुपास्यस्वरूपगुणमहिमावधारणाय तत्प्रतिपादनप्रवृत्तं तदीयं शास्त्रस्य योजनं ग्राह्यम् । अपेक्षितं खल्वस्माकमपि निदिध्यासनोपयोगि चित्तवशीकरणकैलासवैकुण्ठादिस्थानगतदिव्यभोगानुभवक्रममुक्तिस्वरूपफलापेक्षिणां तयोरुपासनम् । अथापि स्यात्क्वचित्क्वचिद्विरुद्धत्वात्तद्योजनमग्राह्यमिति, नैतदेवमुपेक्षणीयताहेतुः । विरोधाभावात् । तथा हि—निर्गुणवाक्यानां सगुणे ब्रह्मणि सगुणान्तरपरवाक्यानां स्वाभिमतसगुणब्र-

---

टि०—पा० १ अ० १ सू० १) इति सूत्रे ब्रह्मज्ञानस्येष्टत्वप्रतिपादनेन फलत्वमुपाक्षिप्तम् । द्वित्रिक्षणावस्थायिनस्तस्य नित्यपुरुषार्थत्वासंभवाद्ब्रह्माज्ञानादिबन्धानिवर्तकत्वेनैव तद्वक्तव्यम् । नतु ब्रह्मप्रसादहेतुत्वेन । समानविषयकज्ञानाज्ञानयोर्निवर्त्यनिवर्तकभावस्य लोके दृष्टत्वात् । अदृष्टत्वाच्च तद्विषयकज्ञानस्य तत्प्रसादहेतुत्वस्य । तदज्ञानादीनां च सत्यत्वे ज्ञानान्निवृत्त्ययोगान्मिथ्यात्वं सूचितम् । ततश्च मिथ्योपाध्योर्जीवेश्वरयोरभेदरूपं प्रत्यगभिन्नं ब्रह्म विषयः संसूचितः । तदेव निर्विशेषं ब्रह्म सूत्रस्थब्रह्मपदेन प्रतिपाद्यते, न तु शिवो विष्णुर्वा, सामान्यवाचकपदस्य प्रकरणपदान्तरसमभिव्याहारादिप्रबलतरप्रमाणाभावे विशेषपरत्वकल्पनस्याप्रामाणिकत्वात् । जगज्जन्मादिकारणत्वस्योक्ते ब्रह्मणि समर्थितत्वात् । किंच स्वायत्ते शब्दप्रयोगे "शिवजिज्ञासा" विष्णुजिज्ञासा" वेत्यनुक्त्वा "ब्रह्मजिज्ञासा" इति वदतः सूत्रकृतो निर्विशेषं ब्रह्मैव स्वशास्त्रे विषयत्वेन विवक्षितम्, इत्याशयः प्रामाणिणिकाभिप्रेत इति । एनेन—"समस्तचेतनाचेतनविलक्षणे सत्याखिलविश्वोत्पत्त्यादिकारणेऽनन्तकल्याणगुणशालिनि विष्णुरूपे परे ब्रह्मणि यद्ब्रह्मसूत्रयोजनं तदेव प्रामाणिकैरङ्गीकार्यं, न तु प्रत्यगभिन्ननिर्विशेषब्रह्मादिविषयतया शंकरादिकृतं ब्रह्मसूत्रयोजनम् । तथाभूते ब्रह्मणि मानाभावात् । वेदान्तानामुपक्रमादिना सगुणब्रह्मपरत्वावसायात् । प्रमाणमात्रस्य विशिष्टार्थप्रत्यायकत्वस्वाभाव्यात् । न च लक्षणया वेदान्तानां चिन्मात्रे तात्पर्यम् । तेषां मुख्यार्थत्वे बाधकाभावात् । न च तात्पर्यानुपपत्त्या लक्षणाकल्पना, चिन्मात्रे तात्पर्यमित्यस्यैवासिद्धेः । वेदान्तप्रवृत्तेः पूर्वं चिन्मात्रस्यानुपस्थितत्वात् । वेदान्तैरेव तदुपस्थितावात्माश्रयादिदोषप्रसङ्गात् । चिन्मात्रस्य मानान्तरागोचरत्वात् । न च योगप्रभावेण चिन्मात्रोपस्थितौ तत्र वेदान्तानां तात्पर्यकल्पनम्, व्यधिकरणत्वाच्छब्दस्य परार्थत्वात् । किंच परमते निर्विशेषविषयाणामेव श्रुतिसूत्राणां सगुणविषयतया योजनमप्यङ्गीकृतम् । निर्विशेषविषयतया पराभिमतं योजनं तु नास्माभिरङ्गीकृतम् । प्रत्यक्षादिविरोधात् । तथा च श्रुतिसूत्राभ्यां सगुणविषयतया सगुणयोजनमेव सर्वोपादेयं स्यान्न तु पराभिमतं योजनम्, असंप्रतिपत्तेरिति वदन्तः परास्ताः ।

व्या०—क्षणि च योजनं, ब्रह्मणः सगुणत्वसप्रपञ्चत्वादिसाधनं, स्वस्वाभिमतसगुणब्रह्मणः सगुणान्तरादधिकत्वसाधनं, सगुणान्तरस्य परब्रह्मत्वाभावसाधनं, तत्र सर्वत्रापि युक्त्युपन्यसनं, तद्विरोधियुक्तिनिराकरणं, इत्यादिकं हि विरुद्धमवभासते । तत्सर्वं "नहि निन्दान्यायेनाविरुद्धम् । नहि निन्दान्यायश्च "स्फारात्तत्तत्पुराणागमः" इति (श्लो० ५४) श्लोकव्याख्यानावसरे स्फुटी करिष्यते । अपि चास्मदीयपूर्वाचार्यग्रन्थेष्वपि महता यत्नेन परस्परपक्षप्रतिक्षेपपूर्वकमेकजीववादानेकजीववादादिव्यवस्थापनं दृश्यते । न च तत्सर्वं तर्कादिग्रन्थेषु परस्परपक्षप्रतिक्षेपादिवद्विरुद्धमेव । किंत्वद्वितीयब्रह्मप्रतिपत्त्युपायेषु नानाविधेषु संभवत्सु विनेयबुद्धिप्रावण्यानुरोधेनोपदिदिक्षितोपायविशेषाणां तत्तद्विनेयबुद्धिस्थिरीकरणार्थत्वात् । सूक्ष्मारुन्धतीप्रतिपत्त्युपायतत्तदुपदेश्यपुरुषचक्षुर्विक्षेपाभिमुखतारकाविषयनानाविधस्थूलारुन्धतीप्रदर्शकवाक्यवत्, सिद्धशब्दप्रतिपत्त्युपायकृत्रिमशब्दगतविविधप्रकृतिप्रत्ययादिविभागप्रदर्शकानेकव्याकरणवच्चाविरुद्धम् । किंबहुना—श्रुतिष्वपि क्वचिदाकाशादिसृष्टिप्रतिपादनं क्वचित्तेजःप्रभृतिसृष्टिप्रतिपादनमित्याद्यध्यारोपापवादाभ्यामद्वितीयब्रह्मप्रतिपत्त्युपायभेदत्वादविरुद्धम् । "कारणत्वेन चाऽऽकाशादिषु यथाव्यपदिष्टोक्तेः" (ब्र० १ । ४ । ४ । १४) इत्यधिकरणे तथा निरूपितत्वात् । तथा शारीरकसूत्राणां तत्र तत्र सगुणयोजनान्तरमपि तत्तत्सगुणोपासनाभिमुखानां तत्र तत्र बुद्धिस्थिरीकरणार्थमित्यविरोधनयने काऽनुपपत्तिः । यत्त्वस्मदनभिमतोपासनाप्रकारकथनादि, तावन्मात्रमनुपादेयमस्तु । न तावता सगुणपरत्वेन सूत्रयोजनानां सर्वथैवोपेक्षणीयता । अथोच्येत—निर्गुणपरः सूत्रसंदर्भः कथं सगुणपरोऽपि स्यादिति ? स्यादेव, सूत्राणां विश्वतोमुखत्वादिति ब्रूमः । न ह्यस्मदीयैरपि निर्गुणपराणामेव सूत्राणां सगुणेऽपि संभवदपेक्षितं

टि०— लोके चेतनस्याचेतनस्य वा पदार्थस्य प्रमितत्वेन चेतनाचेतनात्मकस्य तद्विलक्षणस्य वा तस्य शशशृङ्गायमाणत्वात् । तादृशे विष्णुरूपे ब्रह्मण्यनन्तकल्याणगुणपूर्तेर्ब्रह्मसूत्रयोजनस्य च गगनकमलिनीकल्पत्वेन तस्य प्रामाणिकाङ्गीकार्यत्वे तेषामतिगर्ह्यत्वापातात् । निर्विशेषे च सूत्रयोजनस्य वेदान्तानां तात्पर्यस्य चाभियुक्तकृतस्य जागरूकत्वेन तदपरिशीलनस्य तद्दोषत्वात् । तात्पर्यानुसारिशक्तिलक्षणान्यतरकल्पनस्य त्वयाऽप्यभ्युपगन्तव्यत्वात् । चिन्मात्रस्य योगप्रभावेण लक्षणया वोपस्थितिरित्युक्तेरनुक्तोपालम्भमात्रत्वात् । सगुणब्रह्मणोऽप्रत्यक्षत्वेन तत्समन्वयस्य प्रत्यक्षानुकूल्योक्तेर्मोहमूलत्वात् । किंच सविशेषवाक्यानामुपासनाप्रतिपादनद्वारा निर्विशेषपरत्वाभ्युपगमेन निर्विशेषवाक्यानां सगुणविषयतया योजनोक्तेरतीवापेशलत्वात् । अत एव—"तद्ध्यायन्त्व-

तथाऽप्यानन्दतीर्थीयं मतमग्राह्यमेव *नः
यत्र वैदिकमर्यादा भूयस्याकुलतां+ गता ॥ २ ॥

व्या०—योजनान्तरं वार्यते । भाष्य एव "शास्त्रयोनित्वात्" (ब्र० १।१।३।३) इति सूत्रस्य निर्गुणौपनिषदत्वव्यवस्थापनार्थत्वेन सगुणसार्वज्ञ्यादिसाधनार्थत्वेन च योजितत्वात् । कल्पतरौ च "अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात्" (ब्र० ४।१ । १२।१६) इति सूत्रस्य "अग्निहोत्रादिकं—तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ (ब्र० ४।१।९।१३) इति सूत्रे तदधिगमशब्देन प्रस्तुताय निर्विशेषब्रह्मापरोक्षज्ञानरूपकार्यायैव "विविदिषन्ति" इति श्रुतिदर्शनात्, समस्तकर्मवृन्ददाहकत्वेन कर्मजातिविरोधिनोऽपि ज्ञानस्य नित्ययज्ञादिकर्मविशेषकार्यत्वं नायुक्तम्, समस्तवनदाहकस्यापि दवदहनस्य वनान्तर्गतवेण्वादिकार्यत्वदर्शनादिति निर्गुणविषययोजनस्य, अग्निहोत्रादिकं सगुणब्रह्माधिगमरूपकार्यायैव, सगुणविदां केकयादीनां यज्ञाद्यनुष्ठानदर्शनात्, निर्गुणविद्याफलस्येव सगुणविद्याफलस्यापि यज्ञादिजन्यत्वं नायुक्तम्, सगुणविद्याफलस्य सातिशयत्वदर्शनादिति सगुणविषययोजनस्य च" दर्शितत्वात् । एवं च भगवतो नारायणस्य स्वरूपं तस्य चाचिन्त्याद्भुतमाहिमगुणाविभूतिवैभवं तदुपासनादिप्रकारं तत्फलभोगक्रमं च श्रुतिस्मृतिन्यायैर्निरूपयितुं प्रवृत्तमानन्दतीर्थीयं मतं कुतो न ग्राह्यं येन तद्दूषणे प्रवृत्तिरित्याक्षेपाभिप्रायः॥ १॥

इममाक्षेपं समादधानः प्रयोजनप्रदर्शनपूर्वकं प्रकरणारम्भं प्रतिजानीते—तथेति ।

यद्यप्येवमुक्तरीत्याऽन्यदीयानि सगुणयोजनान्युपादेयानि तथाऽप्यानन्दतीर्थीयं मतमनुपादेयमेव । अन्यदीयेषु हि योजनेषु सगुणनिर्गुणभेदाभेदादिविषयतया कतिपयेष्वेव सूत्रेषु प्रकारभेदः । अन्येषु तु सूत्रेषु क्वचित्क्वचित्पूर्वपक्षसिद्धान्तरचनाभङ्गिभेदेऽपि फलतो न विवादः । आनन्दतीर्थीये तु योजने

टि०—नसूयवः शुभगुणं निर्दोषमाराध्यमित्यद्धा विश्वविशेषशून्यकथकैरप्यादितः स्वीकृतः । यथार्थस्थितिरेकदेशशरणा स प्रत्यवायो भवत्यध्यक्षादिविरुद्धनिर्गुणकथानिर्वाहगर्वावहः" इति परास्तम् ।

१ अर्थानुवादोऽयम् ॥ १ ॥

* नः—वैदिकानामस्माकमित्यर्थः ।

+ आकुलतां विनाशम् ।

२ प्रयोजनमिति—मध्वभाष्ये तत्र तत्र तन्मर्यादयैव दूषणोल्लेखनवैशद्यरूपम् । अत एव वक्ष्यति—" तन्मतदूष्यप्रदेशान्पश्यन्तो विपश्चितः सम्यग्दूषयिष्यन्ति " इति ।

व्या०—प्रायः सर्वत्रैव प्रकारभेदः। सोऽप्यन्येषामसंमतिपन्नेषु स्वमात्रकल्पितेष्वर्थेषु तत्र च चतुरकमठमाठरकौण्ठरव्यकौण्डिन्यमाण्डव्यमार्कण्डव्यमौद्गल्यपौष्यायणपौत्रायणसौत्रायणसौकरायणपाराशर्यायणमाध्यंदिनायनकाषारवकौषारवकाषायणकौषायणबृहदुद्दालक——औद्दालकायनकौशिकसौपर्णशाण्डिल्यवत्सगौपवनभाल्लवेयाग्निवेश्यचतुर्वेदसंहिताचतुर्वेदशिखा——इन्द्रद्युम्नपरमश्रुत्यादिवचनानि, तदनुसारिण्यध्यात्मनारायणसंहिताबृहत्संहितामहासंहितानारायणतन्त्रब्रह्मतन्त्रपुरुषोत्तमतन्त्रमायावैभवब्रह्मवैवर्तब्रह्मतर्कभविष्यत्पर्वादिवचनानीति चात्यन्तमप्रसिद्धानामेव साक्षितयोपन्यासः । तदुपन्यासप्रसक्तस्वानाप्तत्वशङ्कापरि-

टि०– १ सर्वत्रेति——एतेन किंचिदंशेनापि पूर्वाचार्याननुयायित्वं द्वेषमूलकं तत्तन्मतखण्डनलालसत्वं च व्यज्यते ।

२ अप्रसिद्धानामिति–एतेन पूर्वाचार्यसंमतेषु श्रुतिस्मृतिपुराणेषु स्वाभिप्रेतार्थालाभः स्फुटीकृतः । किंच प्रसिद्धश्रुत्युदाहरणे हि तदर्थे विप्रतिपत्तावपि न श्रुतिषु सा, अप्रसिद्धतदुदाहरणे तूभयत्रापि सा, प्रयोक्तुरनाप्तत्वं, तत्प्रणीतशास्त्रस्यानुपादेयत्वं चेति बहवो दोषाः प्रादुःष्युः । एतेन–“ न तावदप्रसिद्धश्रुत्युदाहरणं दोषः श्रौतस्मार्तविधायकानां तत्तन्मन्त्राणां च खिलानामिव प्रायेणाऽऽपस्तम्बादिभिः स्वस्वसूत्रेषूदाहरणात् । ऋषित्वादेव खिलश्रुत्युदाहरणं तद्दर्शित्वादेव तेषामुपपद्यत इति चेत्, का तत्र श्रद्धा। नहि ऋषित्वं नाम जातिरस्ति, त्रिकालदर्शित्वस्यैव तत्त्वात् । “ कल्पाध्यायी ऋषिः ” इति तन्निर्वचनाच्च । त्रिकालदर्शित्वं कल्पाध्ययनं चार्वाचीनेषु न संभवतीति चेदयमपि ते कश्चन व्यामोहः । कालत्रयवृत्तान्तदर्शिनां साङ्गसकलवेदाध्यायिनां भट्टपादप्रभृतीनां बहुलमुपलम्भात । कथमन्यथा भवत्कूटस्थानां शंकरादीनां सर्वज्ञत्वादिकमङ्गी कुरुष । ग्रन्थप्रणयनादिमहाकार्यदर्शनात्तेषां सर्वज्ञत्वादिकमङ्गी कुर्म इति चेत्, किं प्रकृतेऽपि दण्डवारितम् । नन्वस्मदीयग्रन्थप्रवृत्ताविव त्वदीयग्रन्थप्रवृत्तेर्न तत्त्वज्ञानमूलत्वं किंतु मोहादिमूलत्वमिति चेत्, कथमवधारितं देवानांप्रियेण त्वया । प्रत्युत “ मायावादमसच्छास्त्रं प्रच्छन्नं बौद्धमुच्यते । मयैव कथितं देवि कलौ ब्राह्मणरूपिणा ” इति पाद्मवचनेन त्वन्मतस्यैव प्रच्छन्नबौद्धत्वमुच्यते । “ चतुर्भिः सहितः शिष्यैः शंकरोऽवतरिष्यति । सहस्रे द्विशतोत्तरे ” इति त्वदुदाहृतवचनं च विप्रलिप्सामूलत्वेऽप्युपपन्नमिति न तद्बलेन त्वन्मतस्य प्रेक्षावदुपादेयत्वम्। किंचास्मद्ग्रन्थप्रवृत्तेः शिष्यानुग्रहैकप्रयोजनत्वं त्वन्मतस्य मोहशास्त्रत्वं च पुराणेषु स्पष्टमुच्यते । तथा कूर्मपुराणे श्रीमुष्णमाहात्म्ये पञ्चमेऽध्याये–“ श्रीसूत उवाच–पुरा भागीरथीतीरे निमिना पृष्टवान् मुनिः । नष्टा भागवता धर्माः सच्छास्त्राणि कलौ युगे ॥ इति श्रुतं मया पूर्वं तीर्थयात्राप्रसङ्गतः । कथं नष्टा भविष्यन्ति पुनः स्थास्यन्ति वै कथम् ॥ वद विद्वन्महाबाहो कश्चोद्धारं करिष्यति । श्रीवामदेव उवाच । चतुःसहस्रे द्विशते गते सौगन्धिके वने । निहता भीमसेनेन द्वापरान्ते नृपोत्तम ॥ सौगन्धिकाख्ये निहता ये च क्रोधवशाः खलाः । रुद्रेण निहता ये च त्रैपुराश्च कलौ युगे ॥

टि०—चतुःसहस्रेऽष्टशते मणिमन्तादयोऽसुराः । जनिष्यन्ति ब्रह्मयोनौ दैत्याः सद्धर्मदूषकाः । मिथ्यावादमसच्छास्त्रं करिष्यन्ति कलौ युगे। गोपयिष्यन्ति सच्छास्त्रं सच्छास्त्रपरिपन्थिनः॥ एवं धर्मेषु नष्टेषु शास्त्रेषु च कलौ युगे । देवैर्विज्ञापितो विष्णुर्वायुमाज्ञापयिष्यति । उद्धरस्व महाबाहो मम धर्मान्सनातनान् । इत्याज्ञप्तो भगवता कलौ वायुर्भविष्यति । मध्वनामा यतिरसौ सच्छास्त्राणि करिष्यति । गीतायाश्चोपनिषदां भाष्याणि च करिष्यति । निरसिष्यति पाषण्डान् सच्छास्त्राणि महामतिः । स्थापयिष्यति सद्धर्मान्सच्छास्त्रं व्याकरिष्यति । श्रोष्यन्ति मुनयः सर्वे शुकाद्या देवरूपिणः। इति । तथाऽलकापुरीमाहात्म्ये—कलौ तु पापभूयिष्ठे मिथ्याज्ञानपरायणाः । दूषयिष्यन्ति सद्धर्मान्सच्छास्त्राणि कलौ पुनः । उद्धरिष्यति सच्छास्त्रं कश्चित्कालान्तरे यतिः। राजद्वारं समाश्रित्य पाषण्डान्निरसिष्यति । व्याकरिष्यति सच्छास्त्रं देवब्राह्मणतर्पकः। इति । स्कान्दपुराणे श्रीमुष्णमाहात्म्ये नवमेऽध्याये—कलौ पाषण्डभूयिष्ठे धर्मलेशविवर्जिते । वैवस्वतेऽन्तरे प्राप्ते त्वष्टाविंशे कलौ युगे । त्रैपुरा भारते युद्धे निहता राक्षसा भुवि । यदा प्रवर्तयिष्यन्ति मार्गं पाषण्डगोचरम् । तदा संप्रार्थितो देवैर्भगवान्हरिरीश्वरः ॥ तत्कर्मदक्षं दिनतं मातरिश्वानमादिशत् । वायुस्तु यतिरूपेण जनिष्यति कलौ युगे । स दशप्रमतिर्भूत्वा कलौ धर्मान्वदिष्यति । कृत्वा सच्छास्त्रसंदर्भं स्थापयिष्यति सत्पथम् । एवमेव महादेवि नारायणपरायणाः । काले काले भविष्यन्ति तत्र तत्र महाव्रताः । ताम्रपर्णी नदी यत्र कृतमाला पयस्विनी । कावेरी च महापुण्या तथा दुग्धापगा नदी । एतन्मध्यप्रदेशेषु धर्मः पादेन तिष्ठति । म्लेच्छाक्रान्तं भवेदन्यद्भूतलं तु कलौ युगे । कलौ पाषण्डभूयिष्ठं पुण्यक्षेत्रं भविष्यति । न च विष्णुकथा क्वापि नापि वैष्णवपद्धतिः । आक्रान्तेषु च देशेषु म्लेच्छरूपैश्च राक्षसैः । द्राविडेषु च देशेषु धर्मः स्थास्यति पादतः । पञ्चद्राविडगो धर्मो मोक्षहेतुर्भविष्यति । यदा यदा हि धर्मस्य ग्लानिर्भवति पार्वति । अवतीर्य तदा विष्णुर्धर्मगोप्ता स्वयं हरिः । संप्रदायेषु नष्टेषु सर्वधर्मे लयं गते । विष्णोरनुज्ञया भक्ताः कलौ धर्मप्रवर्तकाः । एवं भागवता धर्मा भविष्यन्ति युगे युगे । इत्यादि । तथा ब्रह्माण्डपुराणे क्षेत्रकाण्डे वेङ्कटगिरिमाहात्म्ये तृतीयेऽध्याये शङ्खलिखितसंवादे—त्वं चापि गच्छ शैलेन्द्रं पूर्वं स्वर्णमुखीतटे । यत्र ब्रह्मशिला नाम सरिन्मध्ये च वर्तते । अगस्त्यस्तपसा पश्चाद्गत्वास्मिन्निवसन्न वै । पादा ईशानविष्ण्वादिदेवानां तत्र सन्ति हि । यतिरूपो मातरिश्वाऽष्टाविंशतितमे कलौ । अवतीर्य वसत्यत्र मध्वनामा वरं विभोः । अवाप तपसा पुण्यः प्रीत्या चागस्त्ययोगिनः । तत्स्थापितालये पुण्ये चातुर्मास्यं करिष्यति । शुकः श्रोष्यति सच्छास्त्रं पद्मतीर्थादिहाऽऽगतः । इति ॥ तस्मादापस्तम्बाद्युदाहृतश्रुतिवदस्मदाचार्योदाहृतश्रुतयोऽपि प्रेक्षावदुपादेयाः । श्रुतित्वेन सर्वज्ञदृष्टत्वात् । तथा च स्मृतिः—“ विशेषेक्षणतोऽनन्तरतपस्वी बहुवेदवित् । वेद इत्येव यं पश्येत्स वेदो ज्ञानदर्शनात् ” । इति वदन् परास्तः । आपस्तम्बादिभिः स्वस्वग्रन्थेषूदाहृतानां श्रौतस्मार्तकर्मविधायकानां लिङ्गमन्त्राणां मध्वाचार्योपदिष्टचतुष्कमठादिवचनानामिव श्रुतित्वे विप्रतिपत्त्यभावेन तद्दृष्टान्तोदाहरणस्य मोहमूलत्वात् । तेष्वपि विप्रतिपत्त्यभावेऽनादीनि द्वैतसाधकानि तान्यन्यैरद्वै-

टि०–तद्द्वेषिभिः कुतो नोदाहृतानि । इतरेषामनृषित्वादिति चेत् । किं तदृषित्वमुदाहरणप्रयोजकं, न जातिः । त्वयैव दूषितत्वात् । नापि सर्वज्ञत्वं सर्वज्ञे परमेश्वर ऋषित्वव्यवहाराभावात् । भट्टपादादिषु कल्पाध्यायिषु सर्वज्ञकल्पेषु तद्व्यवहाराभावे का कथा मध्वाचार्यमात्रे । त्वाचार्यस्य चतुरकमठादिप्रणेतृत्वेन ऋषित्वाभ्युपगमेऽद्यतनानां कामिनीकुचकचादिवर्णयितॄणां नवनवशब्दप्रणेतॄणामपि कुतस्तन्न स्यात् । तेषामपि तथात्वे को विशेषस्त्वदाचार्याणाम् । एतेन " त्रिकालदर्शित्वं कल्पाध्यायित्वं वा ऋषित्वमिति " निरस्तम् । तादृशनिर्वचनस्य कूर्मरोमायमाणत्वात् । " मायावादमसच्छास्त्रम् " इत्यादिवचनं प्राचीनपद्मपुराणेऽनन्तर्गतम् । अद्यतने च वैष्णवंमन्यैः कैश्चित्संग्रथितम् । यतो मध्वरामानुजादिभिः स्वस्वग्रन्थेषु परमतनिराकरणसाधकत्वेन न कुत्रापि निर्दिष्टम् । न वा चतुरकमठादिवचनवदद्वैतनिन्दकं तदुल्लिखितवचनमस्ति । न हि वयं " चतुर्भिः सहेत्यादि " शिवपुराणवचनमूलकमद्वैतप्राशस्त्यं ब्रूमः । किंतु श्रुतिमूलं तदनुसारियुक्तिगाढं सर्वसंप्रतिपन्नस्मृतिपुराणप्रसिद्धं वेदान्तिमतत्वेन दर्शनप्रवर्तकगौतमजैमिन्यादिसंमतं चेति । तद्वत् वल्लभश्रुत्यादिसंमतं द्वैतं तर्हि वृथा चतुरकमठादिवचनकल्पना तवाऽऽचार्याणाम् । एवं श्रुतिकल्पकानामाप्तत्वसाधकपूर्वोक्तक्षेत्रमाहात्म्यादीनां यात्रिकप्रतारणाय क्षेत्रजीविभिर्वैष्णवैः कल्पितत्वं स्फुटमेव । तथा हि—" निमिना पृष्टवान् मुनिः " इतितत्रत्यप्रयोगः कथं ? साधुः । कथं वा ? " सौगन्धिके वने । निहता भीमसेनेन " " सौगन्धिकाख्ये निहताः" इति न पौनरुक्त्यम् । कुतो न विरोधः " मणिमन्तादयोऽसुराः । मायावादमसच्छास्त्रं करिष्यन्ति कलौ युगे " " मयैव कथितं देवि कलौ ब्राह्मणरूपिणा " । इत्यनयोर्वचनयोः । तथा "श्रोष्यन्ति मुनयः सर्वे शुकाद्या देवरूपिणः" । " शुकः श्रोष्यति सच्छास्त्रं पद्मतीर्थादिहाऽऽगतः " इति वचनयोश्च । " यदा प्रवर्तयिष्यन्ति मार्गं... । तदा संप्रार्थितो दैवैः... । मातरिश्वानमादिशत् " इति कथं कालनियमोपपत्तिः । एवमशुद्धभूयिष्ठं पुनरुक्तं पूर्वोत्तरविरुद्धं कालविभागरहितं पुराणवचनजातं मध्वाचार्याणां मिथ्याप्तत्वसमर्थनार्थं प्रवृत्तं " किंचिन्मिथ्यात्वासिद्ध्यर्थं मिथ्यार्थान्तरकल्पनम् " इतिन्यायमनुसरति । अथवा श्रुतिकल्पकशिष्यस्य पुराणवचनकल्पनं " गिरिं भक्ष्यमाणस्य कवाटः पर्पटायते " इति न्यायेन नातीवाऽऽश्चर्यवदिति यत्किंचिदेतत् । " अस्मदाचार्योदाहृतानां प्रत्यक्षश्रुतिसमानशीलत्वेनाविरोधितया धर्मव्यवस्थासंभवात् । उदाहृतपुराणवचनानुसारेण धर्मव्यवस्थापकतया प्रतिपन्नत्वेन परमाप्तस्यास्मदाचार्यस्य श्रुतिवाक्यसमानाकारवाक्यपरिकल्पनायोगाच्च । अनाप्तानां तत्परिकल्पनस्य धर्मव्यवस्थाभञ्जकत्वेन नास्मदाचार्याणामन्यैरविशेषः " इत्यादिवचनजातं पूर्वोक्तहेतुभिरेव प्रतिहतोदयम् । त्वदाचार्यस्याऽऽप्तत्वसिद्धौ श्रुतिकल्पनायोगः । असति च श्रुतिकल्पकत्वे परमाप्तत्वमित्यन्योन्याश्रयाच्च । किंच त्वदाचार्योदाहृतानां प्रत्यक्षश्रुतिसमानशीलत्वे तयैव स्वार्थसिद्धौ तत्कल्पनवैयर्थ्यात् ।

ननु पूर्वमीमांसायां तत्र तत्र (जै० सू० १. २. २. १९) " ऊर्जं पशूनाप्नोत्यूर्जोऽवरुन्धा " इत्यादिखिलश्रुतय एवोदाहृताः । शांकरभाष्ये च " अत एव चोपमा सूर्यकादिवत् " (ब्र० ३. २. ५. १८) इत्यधिकरणे " संभृत्यधिकरणे (ब्र० सू०

टि०–३. ३. १२. २३.)च "यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना बहुरूपोऽनुगच्छन् " " ब्रह्मज्येष्ठा वीर्या संभृतानि " इति खिलश्रुती उदाहृते । रामानुजभाष्येऽपि ज्योतिश्चरणाधिकरणे (ब्र० सू० १. १. १०. २५.) " इन्द्रः शचीपतिर्बलेन " इति खिलैवोदाहृता । इति नास्माकमेव खिलश्रुत्युदाहरणं दोष इति चेदन्द्धा. न ह्यन्यैरुदाहृतेति त्वयाऽप्युदाहर्तव्यमिति नियमः । किंच पूर्वमीमांसाशास्त्रो (जै० सू० १. २. २. १९.)दाहृता श्रुतिर्न त्वदुक्तानुपूर्वीविशिष्टा, किंतु " ऊर्ग्वा उदुम्बर ऊर्क् पशव ऊर्जैवास्मा ऊर्जपशूनवरुन्धे " इत्यन्यादृशानुपूर्व्यवच्छिन्ना, सा च तैत्तिरीयसंहितायां (तै० सं० कां० २ प्र० १. अ० १.) स्पष्टमुपलभ्यते । तेन तस्याः खिलत्वं कल्पयता त्वयाऽनाघ्रातवेदत्वमनधीतपूर्वतन्त्रत्वं च स्वस्य प्रकटीकृतम् । अस्मदाचार्यैस्तु " यथा ह्ययम् " इति मन्त्रस्य कठशाखायां प्रसिद्धस्यैवोदाहृतत्वेन, तैत्तिरीयब्राह्मणे (तै० ब्रा० अ० २. प्र० ४. अ० ७.) विद्यमानस्यैव " ब्रह्मज्येष्ठा वीर्या संभृतानि " इति मन्त्रस्य राणायनीयत्वेनाप्युदाहृतत्वेन च न दोषः । तावता खिलत्वाभावात् । भाष्यगतखिलशब्दो विधिनिषेधरहितपर इति रामानन्दीये व्याख्यातत्वाच्च । रामानुजभाष्योदाहरणमप्ययुक्तम् । तस्याप्यप्रामाणिकतया तदुदाहरणेन स्वाचार्यस्यानाप्तत्वशङ्कानतिवृत्तेः । अपि चाऽऽपस्तम्बादिदृष्टान्तेन न स्वाचार्यदोष आच्छादनीयः । आपस्तम्बादिभिः स्वोदाहृतानां खिलाखिलत्वविभागस्य प्रदर्शितत्वेन त्वदाचार्यस्येव तेषां प्रतारकत्वाभावेन वैषम्यात् ।

किंच पुराणवचनेन स्वाचार्यस्याऽऽप्तत्वं साधयतस्तव वैपरीत्यमेव सिध्येत । तथाहि–सौरपुराणे (अ० ३९) ब्रह्मोवाच—भविष्यं कथयिष्यामि तच्छृणुध्वं समाहिताः । घोरे कलियुगे प्राप्ते म्लेच्छैर्व्याप्ते भुवस्तले ॥ १ ॥ सर्वाचारपरिभ्रष्टा भविष्यन्ति नराधमाः । तदाऽऽन्तरदेशमध्ये तु दाक्षिणात्यो भविष्यति ॥ २ ॥ ब्राह्मणो दुर्भगः कश्चिद्विधवाब्राह्मणीरतः । तस्य पापिष्ठविप्रस्य व्यभिचारात्सुतोऽनघाः ॥ ३ ॥ भविष्यति गुणान्वेषी द्वैवाद्ध्ययनोत्सुकः । पद्मपादुकमाचार्यं वरं वेदान्तवादिनम् ॥ ४ ॥ अद्वैतागमबोद्धारं प्रणम्य प्रार्थयिष्यति । विप्रोऽहं मधुशर्माऽस्मि स्वामिन्मां पाठय प्रभो ॥ ५ ॥ इत्यादिना मध्वाचार्यस्यानाप्तत्वस्फुटीकरणात् । तत्रैव (४० अ०) मध्वाचार्यस्य किमर्थः शिवद्वेष इति ऋषिभिः पृष्टः सूतो ब्रवीति— " घोरे कलियुगे प्राप्ते श्रीशंकरपराङ्मुखाः । भविष्यन्ति नरास्तथ्यमिति द्वैपायनोऽब्रवीत् । इत्यादिना शिवकृतकामदहनेनातिदुःखिता तदीयवल्लभा रतिस्तन्मित्रवसन्तमधुकलिमोहादीन् प्रति वक्तीति प्रस्तुत्य " रतिरुवाच–मन्यते घातकः सर्वैर्लोके पूज्यो भवेदयम् । तत्र विघ्नः प्रकर्तव्यो येन केनापि हेतुना ॥ १ ॥ अस्यापकीर्तिर्वक्तव्या न चलेद्यदि किंचन । तेन मे दुःखशान्तिः स्यात्किंचिन्मात्रं न चान्यथा ॥२॥ इति तया प्रार्थिताः कन्दर्पसुहृदो वसन्तादयः परस्परं समालोच्य हिरण्यगर्भवरप्रदानेनेदं कार्यं करिष्याम इति निश्चित्य तं प्रति तपश्चेरुः । ततस्तुष्टो भगवान्ब्रह्मा तैः प्रार्थितो "भवतां कलावभीष्टसिद्धिर्भविष्यति " इत्युक्त्वाऽन्तर्दधे । ततः कलौ प्राप्त एवं भविष्यतीति

टि०–सूत ऋषीनवोचत “ तदा वसन्तः कर्नाटतिलङ्गादिकदूषकः । मधुनामा च विधवाक्षेत्रे विप्राद्भविष्यति ॥ १ ॥ गोलकः स तु पापिष्ठः पद्मपादुकमीश्वरम् । वेदान्तव्याख्यानरतं शिष्यत्वेनार्चयिष्यति ॥ २ ॥ शास्त्रं पूर्णं ततोऽधीत्य स्थित आह्निकवर्जितः । किमग्निहोत्रं को यागो हेतुवादं करिष्यति ॥ ३ ॥ गुरुराकर्ण्य तद्वाक्यं ब्राह्मणो न भवेदयम् । इति निश्चित्य तं दुष्टं वक्ष्यति श्रुततद्वचाः ॥ ४ ॥ गुरुरुवाच । को वर्णस्तव मे ब्रूहि यथार्थं वेददूषक । कर्मब्रह्मोद्भवद्वेष्टा नोत्पत्तिर्ब्राह्मणात्तव ॥ ५ ॥ मधुरुवाच । ब्राह्मणादहमुत्पन्नो ब्राह्मण्यां च न संशयः । सत्यं वदामि नो मिथ्या कथं मां पश्यसे गुरो ॥ ६ ॥ गुरुरुवाच । त्वन्माता केन दत्ताऽरे कस्य पुत्री कथं कदा । कस्मै दत्ता च विधिना केन तद् ब्रूहि मा चिरम् ॥७॥ मधुरुवाच । विधवा जननी नाथ ब्राह्मणेन तपस्विना । गर्भिणी समभूत्तस्मादयं देहस्ततोऽभवत् ॥ ८ ॥ गुरुरुवाच । कपटेन यतः शास्त्रं मत्तोऽधीतं दुरात्मना । तेन सिद्धान्तमर्यादा कदाचिन्मा स्फुरत्वियम् ॥ ९ ॥ मधुरुवाच । भविष्यति महाभाग वचनं तव नान्यथा । पूर्वपक्षो मम हृदि प्रादुर्भवतु निश्चलः ॥ १० ॥ गुरुरुवाच । अन्धता तव सिद्धान्ते पूर्वपक्षे च पाटवम् । भवत्वेवं परं त्वेकं पापाः शिष्या भवन्तु ते ॥ ११ ॥ सूत उवाच । मधुनामा ततः प्राप्य शापं तं दुष्टबुद्धिमान् । बादरायणसूत्राणां व्याख्यानं स करिष्यति ॥ १२ ॥ मध्वाचार्यस्ततो भावाद्दाक्षिणात्यो महान् कलौ । तच्छिष्याः प्रतिशिष्याश्च नाऽऽर्यावर्ते न चोत्कले ॥ १३ ॥ पञ्चवर्षस्तु सन्यासी पठित्वा दुष्टबुद्धिमान् । शिष्योपशिष्यसंयुक्तो हेतुवादं करिष्यति ॥ १४ ॥ इत्यादिना । एवं च मध्वाचार्याणां मधुनामकराक्षसावतारत्वस्य रतिसमाश्वासनार्थं शिवद्वेषस्य च स्पष्टत्वेनाऽऽप्तत्वशङ्कैव प्रतिहतोदया । किंच तत्रैव (४० अ०) जगतस्तात्त्विकत्वं वदतो मिथ्यावादित्वं प्रच्छन्नचार्वाकत्वं च स्पष्टमेव स्मर्यते । “ तत्त्वं संसार इत्येव न बाध्यः सत्य एव हि । वदत्यतस्तत्त्ववादी मिथ्यावादी स उच्यते ॥ १ ॥ प्रच्छन्नोऽसौ महादुष्टश्चार्वाको मध्वसंज्ञकः । भविष्यति कलौ विप्राः शिवनिन्दाप्रवर्तकः ॥ २ ॥ इत्यादि । अद्वैतवादिनस्तथ्यवादित्वं च तत्रैव स्मृतम् “ मिथ्याभूतः प्रपञ्चोऽयं मया निर्मित इष्यते । मायावादिन इत्येते वस्तुतस्तथ्यवादिनः ” इति । किंचास्य शिवद्विष्टमतस्य जनव्यामोहार्थं देवैः प्रेषितेन बृहस्पतिना चार्वाकादिमतस्येव करणं स्पष्टमेवोपलभ्यते सौरपुराणे (अ० ३८) देवगुरुसंवादादिषु । ननु सौरपुराणस्य प्रामाण्यं नाभ्युपगच्छामः । तस्याभिव्यक्ततमोगुणेन व्यासेन रचितत्वादिति चेत्, महदापादितं देवानां प्रियेण । मध्वाचार्याप्तत्वसाधकक्षेत्रमाहात्म्यादीनां प्रामाण्यमभ्युपगच्छन् सौरस्य प्रामाण्यं प्रतिक्षिपन्कथं न लज्जितोऽसि । “ द्वापरे द्वापरे विष्णुर्व्यासरूपी महामुने ” इत्यभियुक्तोक्त्या व्यासस्य रामकृष्णादिवद् विष्ण्ववतारत्वेन तस्मिन्नापादितं तमोगुणत्वं विष्णावेवाऽऽरोपितमिति प्रदर्शितं महत्पाण्डित्यमित्यलं मृतमारणेन । बादरायणस्य पुराणानां च तामसत्वाभावो दीक्षितेन्द्रकृते शिवतत्त्वविवेके (श्लो० ४७) रामानुजशृङ्गभङ्गे च स्पष्ट इति नात्र प्रपञ्च्यते ॥ १ ॥

व्या०—हाराय हनूमद्भीमसेनक्रमेण वायोः स्वयं तृतीयावतार इत्युद्घोषः । तत्र च साक्षितया " प्रथमो हनूमान्नाम द्वितीयो भीमसेनकः । पूर्णप्रज्ञस्तृतीयस्तु भगवत्कार्यसाधकः " इति स्मृतिवचनमस्तीति स्वयमेव तदुदाहरणम्, बेडित्था तद्वपुषे धायि दर्शतं (ऋ० सं० ३.। २ । ८) इत्यादिऋग्वेदमन्त्रस्य स्वकल्पितवाय्ववतारत्रयपरतया प्रदर्शनमित्यादिप्रामाणिकमर्यादोल्लङ्घनं भूयः संदृश्यते । अथापि " युक्तियुक्तं वचो ग्राह्यं नतु पूरुषगौरवम् " इति न्यायेन तन्मतं श्रद्दधीमहि यदि तत्रोपपन्नं किंचिदाकलयेम। नत्वेवम् । प्रायेण हि तन्मते स्वमात्रहृदयारूढानि वचनान्येवोपजीव्यानि नतु न्यायाः । ये तु न्यायाः प्रदर्शितास्तेऽप्यन्त्यन्तशिथिला एव क्वचित्क्वचिदाश्रिताः । पूर्वमीमांसामर्यादाऽप्यसामञ्जस्येनैव नीता । प्रायेणासाधुभिरेव शब्दैर्व्यवहारः । श्लोकरचनायामन्वयासंभवो वृत्तान्यथाभावश्चाधिकः । सर्वमेतत्तदीयभाष्यानुव्याख्यानभारततात्पर्यसंग्रहादिदर्शिनां स्पष्टमेव । अत्रापि तत्र तत्र तदीयवचनोदाहरणे कियदपि स्पष्टी

टि०– १ इयं ऋक् आग्नेयक्रतौ—आश्विनशस्त्रत्वेन प्रसिद्धानां षण्णां मध्ये द्वितीया । " देवस्य—द्योतनशीलस्य दर्शतं—सर्वैर्दर्शनीयं तत्—प्रसिद्धं भर्गः—तेज इत्था—इत्थं सर्वैर्दृश्यमानप्रकारेण वपुषे—शरीरव्यवहाराय दार्ढ्याय धायि—धार्यते सर्वैः । बडित्थेत्युभे अपि सत्यनामनी । तन्नामसु पाठात् । जाठराग्निना भुक्तानां जरणेन शरीरधारणं प्रसिद्धम् " इत्यर्थिका । अनेनाग्निशंसनेनाऽऽग्नेययागस्य प्राशस्त्यं द्योत्यते । एतेन " वाय्ववतारत्रयपरतयाऽस्या ऋचो वर्णनं वैदिकमर्यादोल्लङ्घनस्य महल्लिङ्गमिति सूचितम् ।

२ स्पष्टमेवेति—पूर्वमीमांसोल्लङ्घनं तावत्—जिज्ञासासूत्रे न्यायसुधायां " सार्वाणि सूत्राणि प्रत्येकमनेकवेदवाक्यविचारपरत्वादवान्तरा ब्रह्मविद्या स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यते " इति श्रौतार्थवादसामर्थ्यात्सर्वास्वपि ब्रह्मविद्यास्वाद्यन्तयोरोंकारस्योहः कार्य इति गम्यते " इति । तथा " प्रदानवदेव हि तदुक्तं " (ब्र० सू० ३. ३. ४४) श्रवणगुरुप्रदानयोः प्रधानेतिकर्तव्यतारूपयोर्गुरुप्रदानं प्रबलमित्युपपादनार्थं—तत्त्वप्रकाशिकायां—" न चेतिकर्तव्यतात्वेन दौर्बल्यं, यज्ञीयहिंसायामितिकर्तव्यताया एव प्राबल्यदर्शनात् " इति । तथा " भूम्नः क्रतुवज्ज्यायस्त्वम् " (ब्र० सू० ३. ३. ५७) इति सूत्रे तत्त्वप्रकाशिकायां " यथा खलु दीक्षणीयाप्रायणीयोदयनीयासवनत्रयावभृथात्मकस्य क्रतोः सर्वयागेष्वनुवर्तनमेव साफल्यात्, अन्यथा वैफल्यात्, ज्यायस्त्वं ततश्च सर्वैः कर्तव्यत्वमिति । तथा द्वादशाहवदुभयविधं बादरायणोऽतः " (ब्र० सू० ४. ४. १२.) इति मध्वभाष्ये " द्वादशाहः क्रत्वात्मकः सत्रात्मकश्चेत्युक्तम् । अत्र सर्वत्र मीमांसोल्लङ्घनप्रकारो ग्रन्थकृता (२५ श्लो०) प्रकटी करिष्यते ।

अतः पञ्चाधिकरणीं लक्षीकृत्यैव तन्मते ।
दूष्यस्थलानि सर्वत्र सूच्यन्ते सुधियां मुदे ॥ ३ ॥

आत्मा ब्रह्मेत्यधीतः श्रुतिशिखरगणैर्निर्विशेषश्च सर्वैः
किं तत्र स्वप्रकाशे गुणलवरहिते वस्तु शास्त्रेण चिन्त्यम् ।
इत्याक्षेपं गुरूणां नतिचयविषये स्वाप्रणम्यत्ववादं
श्रुत्यन्तानां निरूप्यः स यदि जडमते केन शास्त्रस्य न स्यात् ॥४॥

व्या०—भविष्यति । तस्मादेवंभूतं मतं वैदिकानामनुपादेयमेवेति तन्मतसिद्धान्तमीक्षत्यधिकरणान्तां पञ्चाधिकरणीं दूष्यतया लक्षीकृत्य तन्मते सर्वत्रापि दूषणीयप्रदेशास्तन्मतदूषणकौतुकिनां विदुषां मुदे सूच्यन्ते । तथा च यद्यपि मदुक्तदूषणानि सम्यङ्न भवेयुस्तथाऽप्यस्मिन्प्रकरणे संगृह्य प्रदर्शितान्तन्मतदूष्यप्रदेशान्पश्यन्तो विपश्चितः सम्यग्दूषयिष्यन्तीति तदर्थं प्रकरणमारभ्यत इत्यर्थः ॥ २ ॥ ३ ॥

॥ इत्युपोद्घातप्रकरणम् ॥

तत्र प्रथमाधिकरणपूर्वपक्षमनूद्य दूषयति—आत्मेति । अत्रेदं परकीयमधिकरणं "ब्रह्ममीमांसाशास्त्रमिदं नाऽऽरम्भणीयं, निर्विषयत्वात् । न तावत् सविशेषं

टि०—अपशब्दैर्व्यवहारः प्रायेण मध्वकृतग्रन्थे दृश्यते। तत्र दिङ्मात्रमत्रोदाहरामः। तथा हि—ईक्षते (ब्र० सू० १।१।५) इति सूत्रस्यावतरणे मध्वभाष्ये "न तच्छब्दगोचरम्" इति प्रयुक्तम्। तत्र गोचरशब्दस्य क्लीबत्वं प्रामादिकम्। तस्य नित्यपुंस्कत्वात्। तथा चोक्तं लिङ्गानुशासने पुमानित्यधिकारे— खाजन्तश्चेति । उदाहृतं च वृत्तिकृता । "गोचरो विषयः" इति । प्रयुक्तं च श्रीहर्षेण—(नै० २. ९५) परिखावलयच्छलेन या न परेषां ग्रहणस्य गोचरः" इति । किंच तदीयभारततात्पर्यनिर्णये—(अ० ३२) "हरिं वदन्तीति समर्थयित्वा" इति । अत्र समर्थ्येति भवितव्यम् । ल्यपोऽवश्यंभावात् । तथाऽनुव्याख्याने—(ब्र. सू. उपोद्घाते) मिथ्यायाः साधकत्वं च न सिद्धं प्रतिवादिनः । इति । अत्र मिथ्याया इत्यसाधुः । तस्य स्वरादिगणे पाठात् । तथा (ब्र. सू. २. १. ४.) सभासभायप्राश्नीकपूर्वस्तु स्पर्धिनामपीत्यत्र प्राश्नीकेति दीर्घोऽसाधुः । एवं सांख्याधिकरयोः (ब्र. सू. २. २. २.) "साक्षादनुभावारूढं शक्यतेऽपोदितुं क्वचित्" इत्यत्रापवदितुमिति वक्तव्ये संप्रसारणमसाधु । तथा तत्रैव "स्वनाशार्थं च कल्पयेत" इत्यत्र परस्मैपदप्रयोगो हेयः । एवं बहवः सन्त्यपशब्दाः । विस्तरभियोपरम्यते । विस्तरस्तु भट्टोजीदीक्षितकृते तत्त्वकौस्तुभे द्रष्टव्यः ॥ २ ॥

॥ इत्युपोद्घातप्रकरणम् ॥

१ वादमिति—अनुसरतीति शेषः ॥
२ यदीति—तर्हीति शेषः ॥
३ जडमत इति—शास्त्रमर्यादानभिज्ञ इत्यर्थः ॥

व्या० ब्रह्म विषयः। तत्र मानाभावात्। वेदान्तानां निर्विशेषजीवस्वरूपमात्रविषयत्वात् न च जीव एव ब्रह्मेति स एव विषयः। तस्य स्वप्रकाशत्वेनाहमिति सर्वानुभवसिद्धत्वात् । निर्विशेषे च तत्र निरूपणीयानां धर्माणामभावादिति पूर्वः पक्षः । सिद्धान्तस्तु—भवेदेवं निर्विषयत्वं, यदि विचार्यत्वाभिमतं ब्रह्म जीवरूपत्वेन संशयविपर्ययानास्पदं स्यात्। नत्वेवं, तस्य " तद्विजिज्ञासस्व । तद्ब्रह्मेति " (तै० उ० ३।१) ब्रह्मविचारविषये धर्मिणि श्रुतेन ब्रह्मशब्देनैव गुणपूर्तिवाचिनाऽल्पगुणाज्जीवनिकायाद् विलक्षणत्वसिद्धेः । तस्य गुणपूर्तिवाचिता च " अथ कस्मादुच्यते परं ब्रह्मेति बृहन्तो ह्यस्मिन्गुणा इति " इति श्रवणात् । स्वरूपतो गुणतश्चापरिच्छिन्नत्वरूपविषयावयवशक्त्यनुरोधाच्चेति " तत्र निर्विशेषजीवस्वरूपस्य ब्रह्मणः श्रुत्यन्तनिरूप्यत्वमङ्गीकृत्य शास्त्रनिरूप्यत्वासंभवपूर्वपक्षो गुरूणां

टि०— १ निर्विशेषजीवस्वरूपस्येति— प्रत्यगभिन्नं ब्रह्म तात्पर्याद्वेदान्तप्रतिपाद्यं " यत्परः शब्दः " इति न्यायात । तात्पर्यं च वेदान्तानामनधिगतार्थ एव । " अर्थेऽनुपलब्धे तत्प्रमाणम् " इत्यभियुक्तोक्तेः । तन्निर्णायकन्यायसूचकशास्त्रस्य श्रुतिसमानविषयत्वाभावे तन्निर्णायकत्वासंभवेन वैयर्थ्यमेव स्यात । अतः शास्त्रेण स्वोपजीव्याश्रयोऽवश्यमपेक्षणीय इति वेदान्तसमानार्थत्वं शास्त्रस्याकामेनाप्येष्टव्यमिति निर्विषयत्ववादः शास्त्रमर्यादाऽज्ञानमूल एवेति भावः । एतेन " अयमनुक्तोपालम्भः । नह्यस्माभिर्वेदान्तानां निर्विशेषस्वरूपपरत्वेऽप्यनधिगतार्थत्वेन प्रामाण्यमङ्गीकृत्य ब्रह्ममीमांसाशास्त्रस्याधिगतार्थत्वेनानारम्भपूर्वपक्षः क्रियते । किंतु श्रुतिस्मृतीनां तदुपकरणीभूतब्रह्ममीमांसायाश्च निश्चितार्थतया प्रेक्षावदनुपादेयत्वरूपमनारम्भणीयत्वमिति । संदिग्धविपर्यस्तान्यतरं प्रत्येव शास्त्रस्य प्रवर्तनीयत्वात् । तदुक्तं मायावादखण्डनटीकायां—"परं ब्रह्म प्रतिपादयितुं सकलश्रुतिस्मृतीनां तदुपकरणीभूतब्रह्ममीमांसायाश्च प्रवृत्तिरिति तत्त्वम् " इति । उक्तं च चन्द्रिकायां—" यथार्थवादाधिकरण इत्यारभ्य तथेहापि स्वतःसिद्धप्रत्यगात्मानुवादका वेदान्ता न विचार्याः " इति परास्तम् । वेदान्तानां निर्विशेषजीवपरत्वाभ्युपगमेऽनधिगतार्थगन्तृत्वस्यापरिहार्यत्वात् । नहि निर्विशेषजीवस्वरूपं वेदान्तव्यतिरिक्तप्रमाणप्रमितं येन वेदान्ता अनुवादकाः स्युः । अत एव चन्द्रिकोक्तिः प्रतिहतोदया । विचारितवेदान्तैर्निर्विशेषजीवनिश्चयसंभवेऽपि विचारात्मकशास्त्रस्य संदिग्धविपर्यस्तविषयकत्वसंभवात् । एतेनैव " वेदान्तानां प्रमाणाप्रामाणित्वेऽप्यनधिगतार्थकत्वनियमाभावस्य वक्ष्यमाणत्वात् । विचारशास्त्रस्य संदिग्धविषयावश्यकत्वस्य नैयत्याच्च । अहमहमिति सर्वदैव प्रकाशमाने निर्विशेषजीवस्वरूपे कस्याप्यविस्मरणाप्रसक्त्या त्वदुक्तरीत्या मीमांसाशास्त्रस्याऽऽरम्भणीयत्वोपपादनायोगात् " इति निरस्तम् । तेषामनधिगतार्थत्वाभावेऽप्रामाण्यस्योक्तत्वात् । जीवस्याहमिति भासमानत्वेऽपि निर्विशेषत्वसच्चिदानन्दत्वादीनां तत्राप्रकाशेन संशयविपर्याससत्त्वेन शास्त्रारम्भणीयत्वसंभवाच्च । विचारशास्त्रस्य संदिग्धविषयकत्वस्य पूर्वपक्षिण इष्टत्वादिति दिक् ।

व्या०—प्रणतिपरम्पराविषये महापुरुषे तच्छिष्योदितस्वप्रणामानर्हत्ववादमनुकरोति। प्रमाणशिखामणयो हि वेदान्ता नितान्तमनधिगतार्थमन्विच्छन्ति। पौरुषेयाणि तु शास्त्राण्युपायान्तरेणावगन्तुं शक्येष्वप्यर्थेषु श्रोतृबुद्धिसौकर्यार्थं प्रवर्तमानानि स्वोक्तमप्यर्थमविस्मरणार्थमाम्रेडयन्ति। न तथाऽनधिगतार्थव्यसनितामनुभवन्ति। ततश्च यदि वेदान्ता अपि स्वप्रकाशजीवस्वरूपमात्रे कर्तृत्वभोक्तृत्वादिधर्मराहित्यतया कर्मशेषतामप्रतिपद्यमाने स्वातन्त्र्येण पर्यवस्यन्ति तदा शास्त्रस्य तत्र पर्यवसाने काऽनुपपत्तिः। पूर्वपक्षिणाऽपि हि वेदान्तानां प्रामाण्यसंरक्षणाय स्वप्रकाशजीवस्वरूपमात्रपरत्वेऽप्यनधिगतार्थत्वमुपपादनीयम्। ततश्च शास्त्रस्यापि तेन सविषयकत्वे काऽनुपपत्तिरिति भावः॥ ४॥

टि०— १ वादमिति—तस्य मौढ्यौद्धत्यमूलकत्ववत्त्वत्पूर्वपक्षस्यापि तथात्वमिति भावः।

२ अनधिगतेति—इदमुपलक्षणमर्थेऽबाधितत्वप्रयोजनवत्त्वयोः। तेन वेदान्तानामभियुक्तोक्तप्रमाजनकत्वरूपं प्रामाण्यं स्फुटीकृतम्।

३ वेदान्ता इति—वेदान्तानामपौरुषेयत्वेन निरस्तसमस्तदोषतया बोधकत्वेन स्वतः प्रामाण्यम्। ते तु निर्विशेषजीवस्वरूपं बोधयन्ति चेत्तदर्थनिर्णयार्थमुत्थापितस्य शास्त्रस्यापि तद्बोधकत्वमकामेनाप्यवश्यमभ्युपेतव्यम्। अन्यथा शास्त्रस्य श्रुतिमूलत्वासिद्ध्याऽकाण्डताण्डवता स्यादिति भावः। एतेन "कर्तृत्वभोक्तृत्वाद्युपहिततया कर्मशेषतां प्रतिपद्यमानस्याहधीसिद्धजीवस्यैव पूर्वपक्षिणा श्रुतिमीमांसारूपशास्त्रविषयत्वमापाद्य तदनारम्भणीयत्वमुक्तम्। स्वप्रकाशजीवस्वरूपमात्रे कर्तृत्वादिरहिततया कर्मशेषतामप्रतिपद्यमाने वेदान्तानां पर्यवसानं नाभ्युपगतम्। शास्त्रप्रत्यक्षविषयात्मद्वैविध्यं पूर्वपक्ष्यनभिमतं च" इत्यपास्तम्। अहंधीसिद्धजीवस्य शास्त्राप्रतिपाद्यत्वे तदुत्थापकाज्ञातज्ञापकवेदान्ताप्रतिपाद्यत्वस्यैवाऽऽपादनीयतया शास्त्राविषयत्वापादनस्यायुक्तत्वात्।

कर्तृत्वादिरहिते जीवे वेदान्तस्यापर्यवसाने वैयर्थ्याच्च। निर्विशेषजीवस्याहंधीगम्यत्वं नास्ति कर्तृत्वादिमत एव तथात्वमित्युक्तत्वाच्च। जीवस्य निर्विशेषत्वं च पूर्वपक्षिणा तस्य वेदान्तप्रतिपाद्यत्वप्रतिपादनायैवाभ्युपगतम्। अन्यथा वेदान्तस्याप्रामाण्यापत्त्या पूर्वपक्षस्यैवानुत्थितेः। यत्तु "पूर्वपक्षे जीवनिर्विशेषत्वोक्तिः "तत्र प्रत्यक्षादिना प्रतीयमाना विशेषाः कल्पिता न मुमुक्षुज्ञेयाः" इत्येवंपरा। तदुक्तं चन्द्रिकायाम् "अन्यस्य च सत्यस्याभावादिति। प्रत्यक्षसिद्धकर्तृत्वभोक्तृत्वसुखदुःखाद्यतिरिक्तविशेषाभावाभिप्राया वा" इति। तन्न। श्रुतीनां पूर्वपक्षेऽनुवादकत्वापत्तेः। न चेष्टापत्तिः। तदुक्तं चन्द्रिकायां- "शुद्धचैतन्यमात्रबोधने श्रुतेरनुवादकत्वं वायुर्वै क्षेपिष्ठादिवाक्यवद्विद्वद्वाक्यवच्च, न्यायप्राप्तत्वादिति" इति वाच्यम्। वायुक्षेपिष्ठत्वप्रतिपादकवाक्यस्य तात्पर्यविषयार्थान्तरसत्त्वेन त्वन्मते वेदान्तानां निर्विशेषजीवातिरिक्ततात्पर्यविषयाभावेन वैलक्षण्यात्। शुद्धचैतन्यमात्रबोधने वेदान्तातिरिक्तप्रमाणाभावेन तेषामनुवादकत्वोक्तेरज्ञानमूलत्वात्। किंच पूर्वपक्षे वेदान्तानामप्रमाणभू-

प्रामाण्यं सिद्धमेव ह्यकृतकवचसां त्वन्मते तर्कशास्त्रे
शास्त्रस्याङ्गं यदस्य स्मरसि हरिकृतं ब्रह्मतर्काभिधानम् ।
तच्चेद्भज्येत नित्यं स्फुरदगुणलवप्रत्यगात्मैदमर्थ्ये
तन्निर्वाहाय तेषां सगुणविषयता पूर्वपक्षेऽपि ते स्यात् ॥५॥

व्या०—ननु पूर्वपक्षिणा वेदान्तानां प्रामाण्यं न संरक्षणीयं, ते ह्युपक्रमादिन्यायैः स्वप्रकाशजीवस्वरूपमात्रपरा एव । तस्य चानधिगतत्वं कथमपि समर्थयितुं न शक्यते । तथा सति यदि तेषां प्रामाण्यं न स्यात्, मा भूत् न्यायलब्धार्थे किं कुर्मः । अत एव तदर्थमधिकृतं शास्त्रं नाऽऽरम्भणीयं सर्वथैव विषयालाभादिति पूर्वपक्षः क्रियते । काऽत्रानुपपत्तिरित्याशङ्क्याऽऽह—प्रामाण्यमिति । इत्थं तव मतमस्ति—"विष्णुना नारायणरूपेणातिविस्तरेण कृतं पुनर्व्यासरूपेण तेन संक्षिप्तं च ब्रह्मतर्काभिधानं शास्त्रम् । तदेव चतुर्दशविद्यास्थानान्तर्गतं तर्कशास्त्रं नतु गौतमादिप्रणीतम् । तच्चास्य मीमांसाशास्त्रस्याङ्गम् । इदं हि सर्वेषां कर्मब्रह्मका-

टि०—तानां गतिकल्पनस्यायुक्तत्वात् । न चेष्टापत्तिः, अत एव चन्द्रिकायां "यच्चाप्रमाणभूतवेदान्तवाक्यगतिर्न पूर्वपक्षे वाच्या, तदाच्छादनेन तत्प्रवृत्तेरिति कंचन पक्षमुपन्यस्य यद्वा स्वर्गकामाधिकरणपूर्वपक्षे विश्वजिदधिकरणपूर्वपक्षे च फलालाभेन नियोज्याभावेन च "विश्वजिता यजेत" इत्यादिवाक्यमिवोक्तरीत्या विषयाद्यभावेनोपपत्तिविरोधात्तज्जिज्ञासस्वेत्यादिकमप्रमाणमिति" पक्षान्तरमुपन्यस्तम् । तस्मात्पूर्वपक्षे वेदाप्रामाण्याभ्युपगमेऽपि न काऽप्यनुपपत्तिरिति वाच्यम् । भवन्मते ब्रह्मतर्काधिकारिण एव मननात्मकब्रह्ममीमांसायामधिकारात । तत्र स्थापितवेदप्रामाण्यज्ञं प्रतीदानीं वेदाप्रामाण्यकथने व्याघातात । तदुक्तमनुव्याख्याने "प्रमाणन्यायमीमांसा क्रियते तर्कशास्त्रतः । मानन्यायैस्तु तत्सिद्धैर्मीमांसामेयशोधनम् । इति । स्वर्गकामाधिकरणपूर्वपक्षस्यानधिगतार्थगन्तृत्वरूपप्रामाण्यापरित्यागेन फलालाभेनाननुष्ठानमात्रपरत्वात् । न च वेदप्रामाण्यस्य सिद्धत्वेऽपि तदाच्छादनेन पूर्वपक्षप्रवृत्तिरिति वाच्यम् । पूर्वपक्षस्यात्यपेशलत्वापत्तेः । शास्त्रारम्भे मन्मतरीत्या पूर्वपक्षसंभवे कृत्वाचिन्तयाऽधिकरणप्रवृत्तेरतिगर्ह्यत्वापत्तेश्च । चन्द्रिकायां श्रोतव्य इति विचारविधानानर्थक्यापत्तेश्च । न च तदाच्छाद्य पूर्वपक्षः, विचारविधायकन्यायव्युत्पादकाधिकरणे तदयुक्तत्वात् । अत एव "प्रमाणन्याये" इत्याद्यनुव्याख्यानोक्तिरन्यपरेत्यपास्तम् । वेदप्रामाण्योपपादकन्यायस्यापि प्रथमाधिकरणे निबन्धनापत्त्या तदकरणेन न्यूनतापत्तेः । न चातःशब्देनैव तथाविधन्यायोऽपि सूचित इति वाच्यम् । "अतःशब्दो हि हेत्वर्थे समुदीरितः । परस्य ब्रह्मणो विष्णोः प्रसादादिति वा भवेत्" इति त्वदीयभाष्यविरोधात् । वेदाप्रामाण्यकथने तदर्थं विष्णुकृतब्रह्मतर्कस्य वैयर्थ्यापत्तेः । एतेन "तर्कशास्त्रस्य मीमांसाङ्गत्वं च तन्निर्णीतस्वरूपसंख्याबलाबलादिभिः प्रमाणैरिह मेयशोधनादिति मतान्तरमुक्तमित्यन्तेनैतत्स्पष्टमेवोक्तम् । यद्वा ब्रह्मतर्के वेदप्रामाण्यस्य सिद्धत्वेऽपि तत्र साधकन्यायोपमर्दात्पूर्वपक्षप्रवृत्तिरिति" निरस्तम् । कल्पनस्य

व्या०–ण्डरूपाणां वेदानां सकलगुणपूर्णो भगवानेव मुख्यार्थ इति निर्णयाय प्रवृत्तम्। तत्त्वेतन्निर्णेयार्थानां वेदान्तानां तदर्थनिर्णायकानां प्रत्यक्षादीनामुपक्रमादीनां श्रुतिलिङ्गादीनां च स्वरूपप्रामाण्यतद्बलाबलनिर्णायकत्वेनैतदपेक्षितमिति। तदुक्तमनुव्याख्याने–(ब्र० सू १. १. १) प्रमाणन्यायमीमांसा क्रियते तर्कशास्त्रतः। मानन्यायैस्तु तत्सिद्धैर्मीमांसा मेयशोधनम्। ब्रह्मतर्कं च कृतवान् स एव भगवान्प्रभुः। पञ्चाशत्कोटिविस्तारान्नारायणतनौ कृतात्। उद्धृत्य पञ्चसाहस्रं भगवान् बादरायणः॥ इति। एवं च यदि वेदान्तानामखण्डजीवस्वरूपपरत्वे मानान्तरासिद्धजीवरूपानुवादमात्रपर्यवसायित्वेन प्रामाण्यानिर्वाहस्तदा तन्निर्वाहाय तेषामुपक्रमादिस्वारस्यावगतमपि तद्विषयत्वं परित्यज्य मानान्तरानधिगतसगुणब्रह्मविषयतैव पूर्वपक्षिणाऽप्यङ्गीकर्तव्या स्यात्। नहि सिद्धप्रामाण्यानां वेदवाक्यानामनधिगतार्थपर्यवसानविरोधी क्वचिदपि वाक्यस्वारस्यानुरोधोऽस्ति। "त्रेधा तण्डुलान्विभजेत्" "सृष्टीरुपदधाति" "कपालेषु श्रपयति" इत्यादिषु तत्तत्स्वारस्योपस्थितानप्यन्यतः प्राप्तिमतोऽर्थान्परित्यज्य लक्षणया प्रत्यक्षविध्यन्तरद्वारा कल्प्यविध्यन्तरद्वारा वाऽनधिगतार्थपर्यवसानस्याङ्गीकृतत्वात्।

टि०–निर्मूलत्वाच्च। यत्तु भामत्यां पूर्वपक्षे पूर्वतन्त्रासिद्धस्यैव वेदप्रामाण्यस्याऽऽक्षेपवत्प्रकृतेऽपीति। तत्तुच्छम्। भवन्मते ब्रह्मतर्कस्येव भामतीकृन्मते पूर्वतन्त्रस्य ब्रह्ममीमांसां प्रत्यनङ्गत्वेन वैषम्यात्। वेदार्थनिर्णायकन्यायविचारात्मकतया तन्न्यायस्य प्रकृते निरूपणेऽपि त्वन्मते ब्रह्मतर्कब्रह्ममीमांसयोरङ्गाङ्गिभावाभ्युपगमेन तत्सिद्धप्रामाण्यस्य पुनराक्षेपायोगात्। ब्रह्मतर्कस्थापितवेदप्रामाण्यस्य प्रयोजनाभावापत्तेश्च। यत्तु "उक्तरीत्या वेदप्रामाण्याक्षेपोपपत्तिः। अद्वैतिमते वेदान्तानामनधिगतविषयत्वं शक्रेणापि समर्थयितुमशक्यम्। अत एवाभेदावलम्बनेन पूर्वपक्षप्रवृत्तौ भेदावलम्बनेन सिद्धान्तो भगवत्पादैरुक्तः। तस्माद्वेदान्तानामहंधीसिद्धनिर्विशेषजीवस्वरूपप्रतिपादनपरत्वमापाद्य पूर्वपक्षप्रवृत्तौ न काऽप्यनुपपत्तिः" इति। तन्न। "तं त्वौपनिषदं पुरुषं पृच्छामि" (बृ० ३।९।२६) इति श्रुत्या प्रत्यगभिन्नब्रह्मणो वेदान्तातिरिक्तप्रमाणागम्यत्वस्य वेदान्तानां तत्परत्वस्य च बादरायणोक्तन्यायमनुसृत्य शंकरभगवत्पादैरेव व्यवस्थापितत्वेन तद्ग्रन्थापरिज्ञानस्य तद्दोषत्वात्। न ह्यन्धो रूपं न पश्यतीति रूपस्यायं दोषः। अत एवाज्ञस्याभेदो न प्रतिभाति, प्रतिभाति च भेदः। किंच वेदान्तानां व्याससूत्राणां च निर्विशेषब्रह्मपरत्वमेव सर्वपुराणप्रसिद्धम्। उक्तं हि मानवपुराणे (१८ अध्याये)—वेदस्य कर्मभागे तु वाक्यानां वेदवित्तमाः। अन्योन्यं न विरोधोऽस्ति न्यायेन परिपश्यताम् ॥ १ ॥ न्यायो जैमिनिना प्रोक्तो व्यासशिष्येण धीमता। प्रसादादेव रुद्रस्य द्विजाः सूत्रात्मनेव तु ॥ २ ॥ ज्ञानभागे तु वेदस्य वेदान्ताख्ये तथैव च। वाक्यानां न विरोधोऽस्ति न्यायेन परिपश्यताम् ॥ ३ ॥ न्यायः सूत्रात्मना प्रोक्तः सर्वज्ञेन महात्मना। व्यासेनैव प्रसादेन शिवस्य परमात्मनः ॥४॥ विरोधो ज्ञानकाण्डेन

साक्षी जीवः सुखादीन्यनिशमनुभवन्सर्वमानाधिकस्ते
तेषां तर्के त्वदिष्टो बलवदबलतासंविभागश्च सिद्धः ।
तस्यात्यन्तानुकूलं श्रवणमपि तव प्राग्विचारादपेक्षं
श्रुत्यन्तानां कुतः स्यादगुणविषयतापूर्वपक्षस्य लाभः ॥६॥

व्या०—विश्वजित्स्वर्गकामाधिकरणपूर्वपक्षयोरपि नानधिगतार्थस्वरूपप्रामाण्यत्यागः। किंतु फलाभावादनुष्ठानाभावमात्रम् । उक्तं हि तन्त्ररत्ने स्वर्गकामाधिकरणपूर्वपक्षे—" नन्वेवमप्रमाणं स्यात् । न, गम्यमाने प्रवर्तनामात्रे प्रमाणमेव । न हि पुरुषप्रवृत्त्यधीनं वेदप्रामाण्यं, यदि हि तथा स्यात्, ततः प्रमाणभूतवचनविहितस्यानुष्ठानं तदनुष्ठानायत्तं च प्रामाण्यमितीतरेतराश्रयापातः " इति । तस्मात् त्वन्मते पूर्वपक्षिणा वेदान्तानां ब्रह्मतर्कसिद्धप्रामाण्याविघाताय निर्विशेषजीवविषयत्वेऽपि वाऽनधिगतविषयत्वमद्वैतिवत्समर्थनीयम् । तद्विलक्षणसगुणब्रह्मविषयत्वं वाऽङ्गीकरणीयमित्युभयथा न निर्विषयत्वशङ्कावकाश इति भावः ॥५॥

परमते मतान्तरसिद्धोपक्रमादिन्यायजालमवलम्ब्य पूर्वपक्षप्रवर्तनमपि न युक्तमित्याह—साक्षीति । एवं हि तव मतं " सुखादिकं साक्षिवेद्यम् । साक्षी च सर्वप्रमाणाधिकः । नित्यत्वेनाप्रामाण्यहेतुदोषजन्यत्वाभावात् । साक्षिविषये सुखदुःखेच्छाद्वेषादौ कदाऽपि संशयविपर्ययोरदर्शनात् । दूरसंजातजलादिज्ञानप्रामाण्यपरीक्षाधारायास्ततो जलावगाहनादिप्रयुक्तसुखादिग्राहकं साक्षिणमासाद्यैव विश्रान्तेश्च । अतः साक्ष्यनुभवविरुद्धेऽर्थे श्रुतिरपि न प्रमाणमिति "। इदं च साक्षिणो बलवत्त्वं तव प्रमाणमीमांसारूपे ब्रह्मतर्के एव प्रसिद्धम् । अतोऽत्र साक्ष्यनुभवविरुद्धं वेदान्तानां सुखदुःखादिबन्धरहितनिर्विशेषजीवस्वरूपपरत्वमात्रमपेक्ष्य पूर्व-

टि०—कर्मकाण्डस्य नैव हि । इत्युक्त्वा द्वित्रश्लोकानन्तरम् " अखण्डैकरसार्थे तु वेदान्ता सकला भृशम् । पर्यवस्यन्ति नान्यत्र तथा व्यासेन कीर्तितम् ॥ १ ॥ संसर्गार्थे द्विजा वेदाः समस्ता आस्तिकोत्तमाः । पर्यवस्यन्ति तु यथा तथा जैमिनिनेरितम् ॥२॥ इत्युक्तम् । अत्र " व्यासोक्तवेदान्तार्थोऽखण्डैकरसः । जैमिन्यभिमतः कर्मकाण्डार्थः कर्मसंसर्गरूपः । तत्प्रवर्तकः शिवः " इत्युक्त्या वेदार्थप्रवर्तकपरमाचार्यशिवावतारशंकरभगवत्कृतसूत्रभाष्यमेव व्याससंमतं न तु कर्मसंसर्गपरकर्मकाण्डस्यापि स्वार्थं प्रच्याव्य स्वकपोलकल्पितविष्णुपरत्वप्रतिपादकं भाष्यमिति सुधीभिः सम्यग्विमर्शनीयम् । तस्माद्वेदान्तानां ब्रह्मात्मविषयत्वे शास्त्रस्य तदविषयत्वपूर्वपक्षोऽतीव हेयः ॥ ४ ॥ ५ ॥

१ निर्विशेषजीवस्वरूपेति—प्रत्यक्षं तावत्साक्षिरूपं तव मते श्रुत्यपेक्षयाऽपि प्रबलम् । तेन निर्विशेषो जीवो न गृह्यते । किंतु सविशेषः । कथं तदविषयनिर्विशेषजीवपरत्वं

व्या०—पक्षप्रवर्तनं न युज्यते । अपि च सर्वेषामपि [1]प्रमाणानां त्वदिष्टो बलाबलविभागस्तव ब्रह्मतर्क एव सिद्धः । अतो वाक्यार्थनिर्णयप्रमाणभूतानामुपक्रमादीनामुपक्रमादुपसंहारो बलीयानित्यादिरूपस्त्वदिष्टो मतान्तरविलक्षणो बलाबलविभागोऽपि तत्रैव प्रसिद्धः । " उपक्रमादिलिङ्गानां बलीयो ह्युत्तरोत्तरम् । श्रुत्यादौ पूर्वपूर्वं च ब्रह्मतर्कविनिश्चयात् " इत्यनुव्याख्यानोक्तेः । तदभिमतोपक्रमबलाबलानुसारी सर्ववेदान्तानामर्थश्च त्वन्मते विचारात्प्रागेव गुरुमुखादवगन्तव्यः । यावच्छक्तिसकलवेदाध्ययनपूर्वकं प्रतिवाक्यमस्यायमर्थ इति सर्वेषां वेदवाक्यानां गुरुमुखादर्थग्रहणं [2]श्रवणम् । तच्च यावदज्ञाननिवृत्त्येकस्मादेव गुरोर्वा तत्तदुत्तमगुर्वलाभे बहुभ्यो गुरुभ्यो वा सम्यगावर्तनीयम् । एवं श्रवणावृत्तिलब्धस्य वाक्यार्थग्रहणस्य स्थिरीकरणार्थं न्यायविचारात्मकं युक्त्यनुसंधानं मननम् । न तदेव श्रवणम् । ततश्च विचारशास्त्रं मननविधिमूलमिति तव मर्यादा । तथा च निर्विशेषनिष्प्रपञ्चजीवाभेदादिपरवाक्यमपि सगुणसप्रपञ्चजीवभिन्नस्वाभिमत-

टि०—श्रुतीनां वक्तुं शक्यत, प्रत्यक्षविरोधादिति भावः । एतेन "सर्ववेदानां साक्ष्यनुभवसिद्धसुखदुःखाद्यतिरिक्तविशेषशून्यजीवपरत्वापादनेनैव पूर्वपक्षप्रवृत्तिः । आकरेष्वेवमेव निर्विशेषशब्दार्थस्याभ्युपगन्तव्यत्वात् । न चैवं " अद्वैतिमतरीत्या " इति चन्द्रिकोक्तिविरोधः । वेदान्तानामहंधीसिद्धप्रत्यगात्ममात्रपरत्वाश्रयणेनापि तद्रीत्यङ्गीकारोपपत्तेः । सर्वांशेनापि तद्रीत्यनभ्युपगमाच्च " इति निरस्तम् । निर्घटं भूतलमित्यादौ घटसामान्याभाववद्भूतलमिति बोधस्येव निर्विशेषो जीव इत्यत्रापि विशेषसामान्याभाववज्जीवस्यैव स्वरसतः प्रतीतेः । उक्तरीत्या संकोचं प्रकल्प्य पूर्वपक्षप्रवर्तनायोगात् । अभ्युपगन्तव्यत्वादित्यनेन त्वदुक्तार्थस्य निर्मूलत्वप्रतीतेश्च । चन्द्रिकोक्तिविरोधस्त्वपरिहार्य एव । किंचाद्वैतिभिर्नाहंधीसिद्धप्रत्यगात्मपरत्वं वेदान्तानामङ्गीक्रियते । अपि तु तदविषयब्रह्मात्मपरत्वम् । तदनभ्युपगमे चन्द्रिकायामद्वैतिमतरीत्येत्युक्तिर्व्यर्था स्यात् ।

१ प्रमाणानामिति—मध्वमते प्रमाणं त्रिविधं, प्रत्यक्षमनुमानं शब्दश्चेति । तत्र सर्वापेक्षया ज्येष्ठत्वादुपजीव्यत्वाच्च प्रत्यक्षस्यैव प्राबल्यमिति ब्रह्मतर्कनिर्णयः । इति ।

२ श्रवणमिति—पदार्थज्ञानकाले न्यायानुसंधानानपेक्षणेऽपि तत्तद्वाक्यार्थज्ञानकाले तदपेक्षितमेव । अन्यथा वाक्यार्थग्रहणस्य निर्विचिकित्सस्याज्ञाननिवृत्तिक्षमस्यानुदयेन मननापेक्षा न स्यात् । मननं हि तद्दृढीकरणायापेक्ष्यते । अज्ञाननिवृत्तिस्तूत्पन्नेन निश्चयात्मकज्ञानेनैव । संशयस्य तदज्ञानजन्यस्याज्ञानानिवर्तकत्वादिति भावः । एतेन " श्रवणस्य बहुधाऽऽवृत्तत्वेऽपि श्रवणकाले न्यायानुसंधानाभावे निर्विचिकित्सज्ञानानुदयेऽज्ञानमात्राविरोधिज्ञानोदये च संशयस्यावर्जनीयतया तद्विधूननार्थं मननरूपविचारे प्रवृत्तिरुपपद्यते । न्यायं विना शतवारमुपादिष्टेऽपि संशयदर्शनात् । श्रवणात्पूर्वं धर्मिज्ञानाभावेन संशयानुदये संशयधर्मिज्ञानरूपस्य श्रवणस्याज्ञानमात्राविरोधित्वावश्यंभावाच्च " इति निरस्तम् । साङ्गाध्यय-

श्रुत्यन्तानामखण्डो विषय इति च ते केन बोद्धव्यमेत-
न्न्यायैस्तादर्थ्यमेषां घटयदतिदृढैः शास्त्रमेकं न चेत्स्यात् ।
तच्चेदङ्गी क्रियेत प्रतिहतविभिदप्रत्यगात्मैकनिष्ठं
कस्यानारम्भसिद्ध्यै प्रभवति भवतः पूर्वपक्षप्रयासः ॥ ७ ॥

व्या०—ब्रह्मपरमेव बोधयतां स्वाप्तानां गुरूणां सकाशाद्बहुधावर्तितश्रवणलब्धसकलवाक्यार्थावधारणस्तदनुगुणप्रमाणस्वरूपतद्बलाबलव्यवस्थापकब्रह्मविचारशास्त्रेतिकर्तव्यतातर्कशास्त्राभ्यासेन लब्धश्रवणसंवादस्तदनन्तरं तदर्थमननात्मके विचारे प्रवर्तमानः शिष्यः प्रत्यक्षादेस्तर्कशास्त्राभ्यासलब्धप्रमाणबलाबलस्याप्यनुगुणमनेकाप्तोपादिष्टं तं तमर्थं परित्यज्य सर्वेषां वेदान्तवाक्यानां निर्विशेषजीवचिन्मात्रमेवार्थ इति सर्वविरुद्धमर्थं कथमाशङ्केत । तथा शङ्काभावे च कथं पूर्वपक्षोदयः शिष्यस्य प्रागवगतार्थेन प्रतिबद्धुमशक्यतयोदेतुं योग्याऽऽशङ्कैव हि वादकथारूपे शास्त्रे पूर्वपक्षो नाम । अतोऽत्र शिष्यस्य प्राङ्निर्वृत्तेन श्रवणेनाङ्गविद्याभ्यासेन च प्रतिबद्धुं शक्याऽऽशङ्का नोदेतुमर्हतीति तव मते नैवं पूर्वपक्षावकाशोऽस्तीति भावः ॥ ६ ॥

एवं परमर्यादया पूर्वपक्षस्य निरवकाशत्वमुक्तं हेत्वन्तरेणापि तदाह—श्रुत्यन्तानामिति। सर्वेषां वेदान्तानां निर्विशेषजीवस्वरूपं प्रबलन्यायैः प्रतिष्ठापयच्छास्त्रमिष्यते न वा । न चेत् , प्रत्यक्षादिविरुद्धं सविशेषत्वादिविषयानेकावान्तरानेकवाक्यकृतान्तःकलहधीप्रतिरुद्धं च तेषां तत्परत्वं न सिध्यतीति तत्सिद्धिसापेक्षानारम्भपूर्वपक्षोत्थानं न स्यात् । इष्यते चेत्तदारम्भमपेक्ष्य विषयाभावेन तदनारम्भः समर्थ्य इति व्याघातः स्यादित्यर्थः ॥ ७ ॥

टि०-नकाल एवाऽऽपातधर्मिज्ञानस्य निष्पन्नत्वेन त्वदभ्युपगतश्रवणस्याकिंचित्करत्वात् । यत्तु “ साङ्गाध्ययनेनापि तत्तद्वेदैः पदवर्णस्वरादिना ब्रह्मापातप्रतीत्यनुदयेन तदर्थमस्मदभिमतस्य श्रवणस्याऽऽवश्यकत्वम् । श्रवणेऽपि न्यायप्रवेशे मननवैयर्थ्यं चेति ” तन्निर्मूलम्। साङ्गाध्ययनेनाऽऽपातज्ञानाभावे तन्मूलस्य वैराग्यस्यानुदयेन श्रवणाय गुरूपसदनानुपपत्तेः । श्रवणस्य वेदान्ततात्पर्यनिर्णयद्वारा प्रमाणासंभवशङ्कानिवृत्तिफलकत्वात् । मननस्य च प्रमेयासंभावनानिवृत्तिफलकत्वाच्च । तस्मात्प्रत्यक्षविरुद्धेऽर्थे श्रुतीनां प्रामाण्याभावेन पूर्वपक्षानुत्थितिरिति यत्किंचिदेतत् ॥ ६ ॥

१ व्याघात इति—शास्त्रानारम्भे श्रुतीनां परस्परविरुद्धानां निर्विशेषजीवविषयत्वासिद्धिः । तदारम्भे च तत्प्रतिपाद्यं विषयं पुरस्कृत्य पुनर्विषयाभावेन तदनारम्भपूर्वपक्षो व्याहत इति भावः । न च “ अयमात्मा ब्रह्म ” (मां० २) “ केवलो निर्गुणश्च ” (श्वे० ६।११) इत्यादिवाक्यजन्यप्रतीतिमात्रावलम्बनेनायं पूर्वपक्षो नतु तत्परत्वप्रतिपादनपरन्यायो-

सिद्धेऽसिद्धे च सिद्धान्त्यभिमतविषये दूषणं चेत्क्रियेत
न्यायापेक्षा न तस्योन्मिषति निजमतप्रक्रियार्थानुवादे ।
सिद्धान्त्यस्वीकृतेऽर्थे यदि तु विषयतापादनं पूर्वपक्षे
कर्तव्यं तर्ह्युपायः कथमिव सुधिया तत्र नापेक्षणीयः ॥ ८॥

व्या०—नन्वेवं सति वाचस्पतिविवरणकाराभिमतयोरप्याद्याधिकरणपूर्वपक्षयोर्व्याघातः स्यात् । वाचस्पतिमते हि प्रत्यगात्मन एव ब्रह्मत्वात्तस्य चाहमिति प्रकाशमानत्वाल्लोकसिद्धस्य तस्य विचारार्थं शास्त्रं नाऽऽरम्भणीयमिति पूर्वपक्षः। न च प्रत्यगात्मन एव ब्रह्मत्वं प्रत्यग्ब्रह्मणोरैक्यं च शास्त्रेण विना सिध्यति । येन व्याघातो न स्यादित्याशङ्क्याऽऽह—सिद्ध इति । तत्र प्रत्यगात्मन एव ब्रह्मतया विषयत्वं प्रत्यग्ब्रह्मणोरैक्यस्य विषयत्वं च सिद्धान्त्यभिमतमेवानूद्य तयोरेकस्य सिद्धत्वेनान्यस्यासिद्धत्वेन च विषयत्वासंभव इति तौ पूर्वपक्षौ प्रवृत्तौ । तत्र कुतः प्रत्यगात्मैव ब्रह्मेति वा कुतः प्रत्यग्ब्रह्मणोरैक्यमिति वा पूर्वपक्षिणं प्रति सिद्धान्तिनो हेत्वाकाङ्क्षा न भवति । सिद्धान्त्यमभिमतस्यैव तयोर्विषयत्वस्य पूर्वपक्षेऽनूदितत्वात् । ततस्तत्र विषयोपपादकशास्त्रारम्भमनपेक्ष्य तदनारम्भपूर्वपक्षप्रवृत्तेर्न व्याघातः । त्वन्मते तु निर्विशेषजीवचिन्मात्रं ब्रह्मेति सिद्धान्त्यनभिमत एवार्थे विषयत्वमापाद्य पूर्वपक्षप्रवृत्तेरिति तस्मिन्नर्थे सिद्धान्तिनो हेत्वाकाङ्क्षोदयेन तदुपपादकशास्त्रारम्भस्य त्वत्पूर्वपक्षिणोऽपेक्षितत्वाद्व्याघात एवेति भावः ॥ ८ ॥

ननु सिद्धान्त्यनभिमतमर्थं पुरस्कृत्य शास्त्रानारम्भपूर्वपक्षे तदुपपादनाय शास्त्रारम्भोऽपेक्षित एवेति व्याघातश्चेत्, पूर्वमीमांसाद्याधिकरणपूर्वपक्षेऽपि व्याघातः स्यात्। स खल्वेवं प्रवृत्तः, अध्ययनविधिना विश्वजिन्न्यायाद्वेदाध्ययनस्य स्वर्गार्थताबोधकेनार्थज्ञानेतरफलार्थत्वं नीयमानानां वेदानां विषनिर्हरणादिमन्त्राणामिवार्थविवक्षाग्राहकं प्रमाणं नास्तीति वेदवाक्यान्यापाततोऽपरिपूर्णानुपपन्नार्थानि लक्षणानुषङ्गाध्याहारव्यवधारणादिकल्पनार्थिकार्थकल्पनादिभिरवश्यमुपपादनीयानी-

टि०—पेतवाक्यजन्यज्ञानावलम्बनेनेति वाच्यम् । "ज्ञाज्ञौ द्वावजावीशानीशौ" (श्वे० १।९) "यः सर्वज्ञः सर्ववित्" (मु० १।९) इत्यादिभेदसविशेषवाक्यानामपि सत्त्वेन प्रबलतरन्यायाभावे संशयस्यैवोत्पत्तेः । पूर्वपक्षोऽपि निर्णयरूपः । तस्यं च संशयोत्तरस्य न्यायसाध्यत्वात् । अत्रायं विशेषः । भ्रमरूपनिश्चयः पूर्वपक्षः । सिद्धान्तस्तु प्रमारूप इति ॥ ७ ॥

१ सिद्धेऽसिद्धे चेति । सिद्धेऽसिद्धेति पदच्छेदः ।

२ प्रत्यग्ब्रह्मणोरैक्यस्येति । सूत्रस्थब्रह्मशब्देन जीवो न विचार्यत्वेन विवक्षितः । तस्य दुःखित्वात् । नापि सगुणं ब्रह्म । तस्यापि परिच्छिन्नत्वेनान्तवत्त्वात् । मुमुक्ष्वनपेक्षितत्वाच्च । किंतु त्रिविधपरिच्छेदशून्यमत एव प्रत्यगभिन्नस्वरूपमेव विवक्षितमिति भावः ॥ ८ ॥

एकं वाक्यं विचार्यं यदि भवति नयो वाऽपि सर्वत्र तुल्य-
स्तत्किंचिन्न्यायकल्प्त्याऽनभिमतरचना युज्यते पूर्वपक्षे ।
सर्वेषामेव नानाविधनयनिकरानेयतात्पर्यसीम्नां
वेदान्तानां विमर्शाद्विषयविरचना त्वेकमीहेत शास्त्रम् ॥ ९ ॥

व्या०—त्यत्र नियामकाभावादनुपपत्तिशङ्काकलङ्कितवेदार्थविचारात्मकं शास्त्रं नाऽऽरम्भणीयमिति"। तत्रापि स्वाध्यायाध्ययनस्य स्वर्गार्थत्वं सिद्धान्त्यनभिमतमेव पूर्वपक्षिणोपपादनीयमिति तदुपपादकविश्वजिन्न्यायादिप्रतिपादकशास्त्रारम्भापेक्षेत्याशङ्क्याऽऽह—एकमिति ।

धर्मजिज्ञासासूत्रे (जै० सू० १।१।१) अध्ययनवाक्यमेकमेव विचार्यम् । तस्य सिद्धान्त्यभिमतदृष्टफलरूपार्थज्ञानार्थत्वे वैयर्थ्यप्रसङ्गात्सर्वापेक्षितस्वर्गार्थत्वं वाच्यमिति शक्यं पूर्वपक्ष एव किंचिन्न्यायोपपादनमिति तदर्थं न शास्त्रारम्भापेक्षा । अध्ययनविधिद्वारा तदुपात्तानां सर्वेषामपि वेदवाक्यानां विचार्यत्वेऽपि तेषामविवक्षितार्थत्वे पूर्वपक्षिणोपपादनीये विषनिर्हरणादिमन्त्रवदन्यार्थत्वनीयमानत्वमेक एव न्यायः । सोऽपि पूर्वपक्ष एवोपपादयितुं शक्य इति तदर्थमपि न शास्त्रारम्भापेक्षा । न हि कियन्तमपि न्यायमप्रदर्श्य पूर्वपक्षः क्रियते । इह तु त्वन्मते नैकमेव वेदवाक्यं विषयः । तस्यैकस्य केनाचिन्न्यायेन पूर्वपक्ष एव व्युत्पादितेन निर्विशेषचिन्मात्रपरत्वसिद्धावपि वाक्यान्तराणां सगुणब्रह्मपरत्वानिवारणेन तद्विचारार्थं शास्त्रस्याऽऽरम्भप्रसङ्गात् । ततः पूर्वपक्षिणा सर्वेषामेव वेदान्तानां निर्विशेषचिन्मात्रपरत्वव्यवस्थापनेन सिद्धान्त्यभिमते सगुणे ब्रह्मणि प्रमाणाभावात्तद्विचारार्थमपि शास्त्रं नाऽऽरम्भणीयमिति च वाच्यं त्वदभिमतं च । न च त्वन्मते सर्वेषां वेदान्तानां निर्विशेषजीवचिन्मात्रपरत्वे सार्वत्रिक एको न्यायोऽस्ति । उपक्रमादीनां श्रुतिलिङ्गादीनां च परःशतं बाध्यबाधकभावप्रकारशालिनां तत्र तत्र व्यवस्थापितत्वात् । न च तेषां सर्वेषामेकस्मिन्नेवात्र पूर्वपक्षे व्युत्पादनं युक्तम् । तथा सति शास्त्रस्यैकाधिकरण्यकल्पनाप्रसङ्गात् । तस्मात्तावतां न्यायानां व्युत्पादकमेकं शास्त्रमिहैवापेक्षितमित्यत्रैव व्याघातो न धर्ममीमांसापूर्वपक्ष इति भावः ।

एतेन वाचस्पतिपूर्वपक्षे प्रत्यगात्मन इदानीमहमिति प्रकाशमानं रूपमध्यासपरिनिष्पन्नं तदिह न विचार्यं, किंतु संसारदशायामनाविर्भूतं निर्विशेषं तस्य तात्त्विकं रूपमस्ति श्रुतिप्रसिद्धम् । तद्विचारार्थं शास्त्रमारम्भणीयमिति शङ्कावारणाय, विवरणकारपूर्वपक्षे प्रत्यग्ब्रह्मैक्यं सिद्धं तत्साधकश्रुतिसद्भावादिति शङ्कावारणाय च बहूनां निर्विशेषवाक्यानामभेदवाक्यानां चान्यपरत्वं

तच्छास्त्रं चेदितोऽन्यत्कणचरमतवत्कल्प्यते पूर्वसिद्धं
जीवं तस्य स्वसिद्धं विषयमुपयतो हन्त तेऽस्यैव सोऽस्तु ।
तेनैकार्थ्ये विरोधेऽप्यपहृतविषयं शङ्क्यते चेदिहेदं
जीवासंदिग्धत्वोक्तिः कथमिव घटनी पूर्वपक्षस्य ते स्यात् ॥१०॥

व्या०—वक्तव्यमिति तदुपपादकशास्त्रारम्भापेक्षया व्याघातः स्यात्" इत्यपि शङ्का निरस्ता । एकयैव प्रत्यक्षादिविरोधयुक्त्या तेषामन्यपरत्वकल्पनादिति ॥ ९ ॥

स्यादेतत्, अस्त्येव शारीरकशास्त्रादस्मादन्यत्सर्ववेदान्तानां निर्विशेषपरत्वव्युत्पादकं शास्त्रम् । तदवलोकनेनैवं पूर्वपक्षः स्यादित्याशङ्क्याऽऽह—तच्छास्त्रमिति ।

तस्य शास्त्रस्य स्वप्रकाशोऽपि जीवो विषयः स्वी क्रियते चेदस्यैव शास्त्रस्य स विषयोऽस्तु, किमप्रसिद्धशास्त्रान्तरकल्पनया । तत्कल्पनया पूर्वपक्षसमर्थनेऽपि स्वप्रकाशस्य विषयत्वासंभवयुक्तेर्व्याहतत्वापरिहारात् । नन्वत्र स्वप्रकाशस्य विषयत्वासंभवयुक्त्याऽनारम्भ इति न पूर्वपक्षः । किंतु वेदान्तानां स्वप्रकाशचिन्मात्रपरत्वव्यवस्थापकं तावच्छास्त्रमस्ति, इदमपि तथाभूतं चेत्तेन गतार्थमतः सगुणब्रह्मपरत्वव्यवस्थापकं चेत्तेन बाधितार्थमित्युभयथाऽपि तदुपहृतविषयत्वादनारम्भमिदं शास्त्रमिति । अतो न व्याघात इति चेत्, एवं तर्हि जीवस्य स्वप्रकाशत्वेनासंदिग्धत्वोक्तिः पूर्वपक्षेऽनुपयुक्ता । तद्विरुद्धा च स्यात्तदेव हि

टि०— १ विषय इति । तच्छास्त्रफलनिर्धारणाविषय इत्यर्थः । तस्य सर्ववेदान्तानां निर्विशेषजीवपरत्वव्युत्पादकशास्त्रप्रतिपाद्यत्वौचित्यात् । एतेन "श्रुतितन्मीमांसारूपशास्त्रयोः स्वप्रकाशाखण्डजीवस्वरूपपरत्वप्रतिपादकशास्त्रान्तरस्य स्वप्रकाशजीवविषयकत्वनिर्धारणफलकत्वं नाभ्युपगम्यते । तयोः स्वप्रकाशाखण्डजीवस्वरूपपरत्वस्यैव तन्निर्धारणीयत्वाभ्युपगमात् । न च तस्यैव ब्रह्ममीमांसाशास्त्रस्यापि तदेव विषयो न तु स्वप्रकाशजीव इति युक्तं सिद्धान्तिना तथाऽनभ्युपगमात् । वेदान्तानामनुवादकत्वापरिहाराच्च । तस्मादाक्षेप्याक्षेपकशास्त्रयोर्भिन्नविषयत्वेन न व्याहतिदोषप्रसरः" इति निरस्तम् । तयोः स्वप्रकाशाखण्डजीवस्वरूपपरत्वप्रतिपादकशास्त्रस्य तद्विषयत्वनिर्धारणफलोत्पादनाय प्रवृत्तस्य तत्फलकत्वाभावे तत्परत्वासंभवेन तस्य व्यर्थत्वापत्तेः । तस्य भिन्नविषयकत्व आक्षेप्याक्षेपकत्वासंभवाच्च । वेदान्तानां स्वमनीषयाऽनुवादकत्वकल्पनायोगात् । त्वत्सिद्धान्ते च वेदशास्त्रयोः सगुणपरत्वेनानुवादकत्वं कुतो नेति पृष्टो व्याचष्टां देवानांप्रियः ।

२ असंदिग्धत्वोक्तिरिति । न चाव्यवहितपक्ष एव सा, तत्र तादृशोक्तेर्विरोधादिति वाच्यम् । अत्र व्यवहिताव्यवहितपक्ष इति स्वकल्पनामात्रत्वेन तस्य मूलग्रन्थास्पर्शित्वात् । "न तावद्ब्रह्म विषयः । असंदिग्धत्वात् । प्रमाणाभावेन जीवव्यतिरिक्तस्य

व्या०—त्वया पूर्वपक्षसमर्थनार्थमुक्तम् । कणभुगादिशास्त्रेणाप्यपहृतविषयतयाऽनारम्भे शङ्कितुं शक्येऽपि निर्विशेषशास्त्र एव तव पक्षपातश्च कथम् । समयपादे तत्सर्वं निराकर्तव्यमिति चेदिदमपि तथाऽनभिमतं शास्त्रान्तरमस्ति चेत्तत्रैव निराकर्तव्यं

टि०—ब्रह्मणोऽभावात् ” इत्येव तत्त्वप्रकाशिकायामुक्तत्वात । समयपादे तादृशशास्त्रस्यानुवाद-खण्डनयोरकरणेन तथाविधशास्त्रान्तरमभ्युपगम्य पूर्वपक्षप्रवृत्तेः सूत्रकारासंमतत्वाच्च । एतेन “ एतच्छङ्काया अशोकवनिकान्यायत्वम् ” इत्यपास्तम् । तस्य क्लृप्तविषयत्वात् । अविद्यावृतानन्दादीनां जीवे विद्यमानत्वेन तद्विचाराय शास्त्रारम्भावश्यकत्वेनानारम्भपूर्वपक्षानुत्थानाच्च । यत्तु “ न तावत्त्वन्मत इवास्मन्मते जीवानन्दावरणानुपपत्तिः । जीवतदानन्दयोरभेदेऽपि गुणगुणिभावनिर्वाहकस्य भेदप्रतिनिधेर्विशेषस्य सत्त्वेन जीवस्वरूपानावरणेऽपि तदानन्दावरणोपपत्तेः । नहि विशेषस्य जीवस्वरूपत्वेन तेन कथं तद्प्रकाशोपपादनमिति युक्तम् । भेदकार्यनिर्वाहकत्वेनाऽऽगच्छतस्तस्य जीवस्वरूपत्वकल्पनस्यानवस्थितिभिया पश्चाद्भावित्वेन कथंतानवकाशात् । धर्मिग्राहकमानेन तस्य ताद्रूप्येणैव सिद्ध्यभ्युपगमात । न च त्वदभिमतविशेषस्य निर्विशेषाखण्डब्रह्मवादाविरोधितया तत्पक्षेऽप्यावरणं युक्तमिति वाच्यम् । तथाऽभ्युपगमे विवादपर्यवसानात । परेणाविद्याया एवाऽऽवारकत्वाभ्युपगमाच्च । न चाविद्याऽपि तदावरणं, त्वया ज्ञानाज्ञानयोर्विरोधाभ्युपगमादविद्यायाः स्वप्रकाशब्रह्मावरणे च न कदाऽपि तन्निवृत्तिः स्यात । यथाऽऽहुः “ज्ञानरूपं परं ब्रह्म तन्निवर्त्यं मृषात्मकम् । अज्ञानं चेत्तिरस्कुर्यात्कः प्रभुस्तन्निवर्तने” इति । तन्न । विशेषेणाऽऽनन्दावरणे तदभिन्नजीवस्वरूपस्याप्यावृतत्वेन तस्य संदिग्धत्वोक्तेर्मोहमूलत्वात । जीवतद्धर्मानन्दयोर्भेदप्रतिनिधिविशेषासिद्धौ जीवानन्दस्याऽऽवरणमानन्दमात्रस्याऽऽवरणासिद्धौ तादृशविशेषसिद्धिरित्यन्योन्याश्रयात । अनवस्थाभिया जीवस्वरूपत्वेन कल्पितस्य विशेषस्य जीवानन्दानावारकत्वाच्च । किंचाविद्याऽपि त्वन्मते तदावारिका । “ पुंस्त्वादिवत् ” (ब्र० सू० २ । ३ । ३१) । इति सूत्रे भावरूपायास्तस्यास्तत्त्वप्रकाशिकायामभ्युपगमात् । तथैव सर्वनिर्वाहे भेदप्रतिनिधेर्विशेषस्य वैयर्थ्याच्च । मन्मते ज्ञानाज्ञानयोर्विरोधेऽपि स्वरूपज्ञानस्याज्ञानसाधकत्वेन तदावृतत्वेऽपि चैतन्येद्धवृत्तेर्ब्रह्ममात्रविषयिण्यास्तन्निवर्तकत्वम् । “ मायामेतां तरन्ति ते ” (गी० ७।१४) इत्यादिस्मृतिसिद्धं च । विशेष्यमात्रविषयकाज्ञानं न विशिष्टविषयकज्ञाननिवर्त्यम् । भिन्नविषयकत्वात । एतेन “ विशिष्टविषयकज्ञानेन विशेष्याज्ञाननिवृत्तिरवश्यमभ्युपगन्तव्या । अन्यथा दण्डी पुरुष इति ज्ञानेन देवदत्ताज्ञानानिवृत्तिप्रसङ्गात् ” इति निरस्तम् । दण्डिपुरुषत्वस्य यज्ञदत्तादिसाधारण्येन देवदत्तविषयकाज्ञाननिवर्तकतानवच्छेदकतयाऽऽपादनस्येष्टत्वात् । ननु मन्मते जीवस्य स्वानन्देश्वरतद्गुणाद्यावरकमज्ञानं युक्तं न तु त्वन्मते, “ तुरीयं सर्वदृक् सदा ” (गौ० का० १।१२) “ यः सर्वज्ञः सर्ववित् ” (मु० १।९) इत्यादिश्रुत्या ब्रह्मणः सदा सर्वविषयकापरोक्षवत्त्वावेदनेन तस्य स्वं प्रति स्वरूपाद्यावरकाज्ञानायोगात् । तदुक्तं भगवत्पादैः—“ पुंगतमेव हि तम इति ” । “ अज्ञताऽखिलसंवेत्तुर्घटते न कुतश्चन ” इति । तस्मान्निर्विशेषाभे-

का चात्रानुपपत्तिर्जीवस्य स्वप्रभस्य विषयत्वे ।
आविद्यकमावरणं जानीषे चानुमन्यसे च त्वम् ॥ ११ ॥

पुंस्त्वादिवत्त्विति नये पुरुषस्य हि त्व-
मानन्दमावृतमभिन्नमुपेत्य नित्यम् ।

व्या०–स्यात् । अनभिमततन्त्राणां सर्वेषामपि स्वातन्त्र्येण पृथक्पृथक् तत्रैव निराकरणात् । तस्मादनिराकरणादवसीयत इदमेव तच्छास्त्रं नान्यदिति ॥ १० ॥

नन्वेतावताऽपि स्वप्रकाशस्य विषयत्वानुपपत्तिरसमाहितैवेत्याशङ्कां परस्यापि संमतेनाविद्यावरणेन जीवस्यानधिगतत्वमुपपादयन्परिहरति–केति ।

ननु भावरूपाज्ञानं नानुभवामः । न चानुमन्यामहे । न जानामीत्यनुभवस्य ज्ञानाभावविषयत्वसमर्थनादित्याशङ्क्याऽऽह–पुंस्त्वादिवदिति । एवं हि तव मतं "नित्यानन्दस्वरूप एव सन्मुक्तियोग्यो जीवः । न तस्य मुक्तावागन्तुकोऽस्त्यानन्दः । विकाररूपाणां धर्माणां मुक्तावभावात् । न च तदानीं पुरुषार्थरूपस्याऽऽनन्दस्य संसारदशायां सत्त्वे मुक्तिसंसारयोरविशेषप्रसङ्गः । तस्येदानीमावृतत्वाभ्युपगमात् । न चानादि भावरूपमज्ञानं तदावरकं सिद्धान्ते नेष्यते । सादिना तु कामकर्मादिना न निर्वाहः। सुषुप्तिप्रलययोस्तदवृत्त्यभावेन मुक्ताविवाऽऽनन्दस्फूर्तिप्रसङ्गादिति वाच्यम् । सिद्धान्ते सत्यस्यानादिर्जीवाश्रितस्य तं प्रति तदीयानन्दादिकं ब्रह्मस्वरूपतद्गुणगणादिकं चाऽऽवृण्वतो मायाऽविद्या प्रकृत्यादिशब्दवाच्या द्रव्यरूपस्य ज्ञानविरोधिनो भावस्याज्ञानस्य "अनादिमायया सुप्तो यदा जीवः प्रबुध्यते" (गौ० का० १।१६) "भूयश्चान्ते विश्वमायानिवृत्तिः" (श्वे० १।१०) इत्यादिश्रुतिस्मृतिप्रतिपन्नस्येष्यमाणत्वात् । तस्य च परमेश्वरापरोक्षज्ञानेन निवृत्तौ प्राक् सत एवाऽऽनन्दस्य बाल्येऽपि सतः पुंस्त्वादेर्यौवन इव मुक्तावभिव्यक्तिः । सुषुप्त्यादौ तत्सत्त्वेऽपि कामकर्मादिवृत्त्य-

---

टि०–दपक्षे प्रकाशमानस्याप्रकाशमानत्वमयुक्तमिति चेद्भ्रान्तोऽसि । "तुरीयं सर्वदृक् सदा" (गौ० का० १।१२) इत्यस्य सर्वभानप्रयोजकदृक्स्वरूपमित्यर्थत्वात् । नहि दृक्पदं दृग्वतोऽभिधायकम् । मानाभावात् । एतेन "यः सर्वज्ञः" इत्यत्रापि श्रुत्यन्तरैकार्थ्याय घञर्थे कप्रत्यय इति वक्तव्यम् । ततश्च सर्वज्ञानरूप इत्येवार्थ इति न ज्ञानवत्त्वसिद्धिः । पुंगतस्याप्यज्ञानस्य ब्रह्मावारकत्वं युक्तम् । "अज्ञानेनाऽऽवृतं ज्ञानम्" (गी० ५।१५) इति स्मृतेः । तस्मान्निर्विशेषाभेदपक्षेऽपि स्वप्रकाशस्याप्यविद्यावरणं युक्तमेवेति शास्त्रारम्भस्याऽऽवश्यकत्वेनानारम्भपूर्वपक्षो हेय इति दिक् ॥ १० ॥

तत्त्वावबोधसमनन्तरमस्मदुक्तं
मुक्तौ तदावरणभञ्जनमन्ववादीः ॥ १२ ॥
अभेदे दृढे तत्प्रकाशाप्रकाशावविद्याभिधब्रह्मशक्त्योपपन्नौ ।
विशेषेऽपि ते जीवचैतन्यरूपं विरोद्धुं न शक्नोति तस्य प्रकाशम् ॥१३॥

व्या०—भावादीषदभिव्यक्तिः। तस्यानादित्वेन स्वोपादानगतोत्तरावस्थारूपनिवृत्त्यसंभवेऽपि प्रमाणसत्त्वेन निवर्तकोपनिपातबलात्स्वरूपप्रध्वंसरूपा निवृत्तिः । तच्च प्रतिजीवं भिन्नमित्येकमुक्तौ न सर्वमुक्तिरिति " सर्वोऽप्ययमर्थः " पुंस्त्वादिवत्तस्य सतोऽभिव्यक्तियोगात् " (ब्र० सू० २।३।३१) इत्यधिकरणे प्रतिपाद्यत्वेन त्वदभिमतोऽस्मदीयभावरूपाज्ञानवृत्तानुवाद एव । तदनिर्वचनीयत्वादिकं किंचित् परं नेष्यते । तथा च यस्त्वया संसारदशायां प्रकाशमानस्यैव जीवस्य स्वरूपभूतानन्दस्तदानीमावृत्येष्यते स एव श्रुतीनां जीवस्वरूपपरत्वपक्षेऽनधिगतो विषय इति न तस्मिन्विषये विषयाभावसिद्धिरिति भावः ॥ १२ ॥

ननु मत्सिद्धान्ते जीवतदानन्दयोरभेदेऽपि गुणगुणिभावनिर्वाहकस्य भेदप्रतिनिधेर्विशेषस्य सत्त्वात्स्वप्रकाशस्य जीवस्य स्वरूपानावरणेऽप्यानन्दस्य युक्तमावरणम्। अखण्डपक्षे तु जीवतदानन्दयोर्विशेषाभावादयुक्तम्। तथा हि—प्रकाशमानस्यैवाऽऽनन्दस्याप्रकाशमानत्वं वाच्यम् । न च तद्युज्यते विरोधादित्याशङ्क्याऽऽह—अभेद इति । सत्यं निर्विशेषाभेदपक्षे प्रकाशमानस्यैवाप्रकाशमानत्वं वाच्यमिति । तदविद्याशक्तिमहिम्नोपपद्यते । सा ह्यघटितघटनापटीयसी ब्रह्मणः शक्तिः । तस्यास्तादृशो महिमा नेष्यते चेत्सविशेषाभेदपक्षेऽप्ययं विरोधो दुष्परिहरः । नहि विशेषोऽस्तीत्येतावताऽऽनन्दप्रकाशस्याविद्यावरणेन किंचिदपनीयते । घटस्य कुड्यावरणेन तत्संनिकर्षप्रतिबन्धवत्, घटशौक्ल्यस्य महारजनरञ्जनेन तज्ज्ञानप्रतिबन्धवच्चात्राऽऽनन्दस्य संनिकृष्टत्वप्रतिबन्धस्य तत्प्रकाशोत्पत्तिप्रतिबन्धस्य च वक्तुमशक्यत्वात् । नित्यस्य जीवचैतन्यस्य तत्प्रकाशतया तदुत्पत्तेस्तत्कारणेन्द्रियसंनिकर्षस्यानपेक्षणात् । छत्राद्यावरणेनाऽऽलोकस्य विषयसंबन्धप्रतिबन्धवज्जीवचैतन्यस्याऽऽनन्दसंबन्धप्रतिबन्धस्यापि वक्तुमशक्यत्वाच्च । तयोर्विषयविषयिभावसंबन्धस्याऽऽनागन्तुकस्वरूपाभिन्नधर्म-

टि०— १ त्वदभिमत इति—उक्तं च तत्त्वप्रकाशिकायाम् " न चावरणानुपपत्तिः । ज्ञानाभावातिरिक्ततन्निमित्ताविद्याभ्युपगमात् " इति ॥ १२ ॥

मुख्यो भेदः सन्नपि ब्रह्मदृष्टिं नेष्टे रोद्धुं तत्र को वा विशेषः ।
तद्दृष्टिस्ते नित्यसिद्धो हि जीवस्तस्मादन्यन्नास्ति तद्गोचरत्वम् ॥१४॥

व्या०—त्वात् । न च मुक्तावानन्दप्रकाशो जीवभिन्नो जन्यज्ञानस्वरूप एवास्तु, जीवचैतन्यस्यैवाऽऽनन्देन विषयविषयिभावसंबन्धस्यानागन्तुकस्वरूपाभिन्नधर्मत्वात्, जीवचैतन्यस्यैव वाऽऽनन्देन विषयविषयिभावस्तदानीं जन्योऽस्तीति वाच्यम् । मुक्तावन्तःकरणविलयेन तद्वृत्तीनां जन्यज्ञानानां जीवचैतन्यधर्माणां च त्वयाऽप्यनङ्गीकृतत्वात् । न चाऽऽनन्दजीवचैतन्ययोर्विषयविषयिभावः सदा शक्त्यात्मना स्थितोऽपि मुक्तौ व्यक्तात्मतामापद्यत इति तदानीमेवाऽऽनन्दप्रकाशो न प्रागिति वाच्यम् । व्यक्तेरपि नित्यत्वानभ्युपगमे मुक्तौ जीवस्य सविकारत्वापत्तेः । नित्यानित्ययोः शक्तिव्यक्त्योर्भेदप्रसङ्गाच्चेति । " न विशेषात्मता चेयमनित्या शक्तिरूपता । सैव यत्साविशेषा स्याद्विशेषोऽन्यो न चाप्ययम्" इत्यनुव्याख्याने व्यक्तेः शक्त्यभिन्नत्वेनानित्यत्वप्रतिषेधाच्च । इदानीमप्यानन्दप्रकाशप्रयुक्तस्य स्वात्मनि परमप्रेम्णोऽनुभवाच्च । तस्मात्त्वन्मतमर्यादया लोकानुभवेन च जीवानन्दे प्रकाशमान एवाप्रकाशमानत्वं वक्तव्यम् । तच्चाविद्यामहिम्नैवोपपादनीयम् । तथैवोपपादितं च न्यायसुधायाम् । अतः परमेश्वर एव सत्त्वादिगुणमय्यविद्याविरोधित्वेनाविद्यया स्वाधीनया प्रकृत्याख्ययाऽचिन्त्याद्भुतया स्वशक्त्या जीवस्य स्वप्रकाशमपि स्वरूपचैतन्यमाच्छादयतीति युक्तमिति तत्र विशेषोऽकिंचित्कर एवेति भावः ॥ १३ ॥

उक्तमर्थं कैमुतिकन्यायेनाप्युपादयति—मुख्य इति । जीवस्य ब्रह्मणः सकाशान्मुख्यो भेदः सन्नपि ब्रह्मदर्शनं यदा निरोद्धुं शक्नोति तदा जीवस्य स्वानन्दाद्विशेषो भेदप्रतिनिधिस्तद्दर्शनं निरोद्धुं न शक्नोतीति किमु वक्तव्यम् । भेदोऽपि न निरोद्धुं शक्नोतीत्यत्र विशेषदर्शित एव न्यायः । स तु पूर्वश्लोके संक्षिप्त इह स्पष्टीकृतः । न चाव्यक्तस्वभावत्वाद्ब्रह्मणस्तदप्रकाशोपपत्तिरिति वाच्यम् । तथा सति ब्रह्मणः प्रकाशप्रसक्त्यभावेन जीवाश्रितमज्ञानं ब्रह्म तद्धर्मविषयमानन्दपारतन्त्र्यादिस्वधर्मविषयं चेति कल्पनावैयर्थ्यप्रसङ्गात् । उपासनानन्तरमप्यप्रकाशापातेन मोक्षशास्त्रवैयर्थ्यप्रसङ्गाच्च । न चाव्यक्तस्वभावमपि ब्रह्मोपासनया प्रसन्नं सत्स्वशक्त्यैवापरोक्षी भवति । तच्चापरोक्षज्ञानमन्तःकरणवृत्तिरूपमिति तेनैव मोक्षः । अतः स्वरूपचैतन्यस्य कदाचिदपि ब्रह्म न विषय इति वाच्यम् । त्वया "तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्" (बृ० १.४.८) इत्यादिश्रुत्या

इति तव सविशेषानन्दतद्ब्रह्मवच्च
स्फुरणयुतमखण्डानन्दमप्याद्रियन्ते ।
अनधिगतमविद्याशक्तिभूम्नैव धीराः
स हि सकलमनूद्य प्रश्नतोऽपि प्रसिद्धः ॥ १५ ॥

व्या०—ब्रह्म परप्रेमास्पदतयोक्तमिति मुक्तौ स्वरूपानन्दानुभववत्तदनुभवस्यापि पुरुषार्थतयाऽङ्गीकृतत्वात् । मुक्तौ तु माहात्म्यग्रहणपूर्वकस्नेहरूपाया भक्तेरुपासनायाश्च त्वयाऽङ्गीकृतत्वाच्च । तस्मान्मुक्तौ स्वरूपचैतन्यातिरिक्तज्ञानाभावात्स्वरूपचैतन्यस्य च तदानीमागन्तुकविषयविषयिभावासंभवात् । अनादिकालमारभ्यैव ब्रह्मणस्तद्गुणगणस्य च मुक्तियोग्यजीवानां स्वरूपचैतन्ये प्रकाशनं वक्तव्यमेव । तथाऽङ्गीकृतं च त्वया "स्थानाविशेषात्प्रकाशादिवत्" (ब्र० सू० ३.२.३५) इत्यधिकरणे । तत्र हि चतुर्मुखादिजीवानन्दानां ब्रह्मानन्दप्रतिबिम्बत्वे बिम्बवैचित्र्याद्वैचित्र्यानुपपत्तिमाशङ्क्य तत्तज्जीवगतानादिभक्त्यादिगुणवैचित्र्यात्तदानन्दादिवैचित्र्यमुपपद्यत इत्युक्तम् । उदाहृतं च "ऐश्वर्यात्परमाद्विष्णोर्भक्त्यादीनामनादितः । ब्रह्मादीनां सूपपन्ना ह्यानन्दादेर्विचित्रता" इति । एवं 'अनुबन्धादिभ्यः' (ब्र० सू० ३.३.५१) इत्यधिकरणान्तरोक्तम् । "तथाऽप्यनादिसंसिद्धभक्त्यादिगुणपूगतः । लभेद्गुरुप्रसादं च भक्त्या एव च तद्भवेत्" इति वचनमप्युदाहर्तव्यम् । युक्तं चातीतानागतपदार्थानां तत्तत्कालानामव्याकृताकाशस्य तदंशानां प्राच्यादीनां दिशां मनसः परमाणूनां तदवयवपरम्पराणां च साक्षिप्रत्यक्षविषयत्वमातिष्ठमानस्य तव ब्रह्मणोऽपि तद्विषयत्वम् । एवं ब्रह्मणस्तद्गुणानां च प्रकाशमानत्वेऽपि त्वयाऽस्य शास्त्रस्य निर्विषयत्वपरिहारायाप्रकाशमानत्वमप्यविद्यामहिम्नोपपादनीयम् । उपपादितं च तथैव न्यायसुधायाम्-(ब्र० सू० १.१.१.) " यद्यपि जीवचैतन्यं ब्रह्मतद्धर्मप्रकाशनात्मकं तथाऽपि परमेश्वराचिन्त्याद्भुतशक्तिबृंहिताविद्यावशान्न तथा संसारे प्रकाशयति " इति । एवं परमते सविशेषाभिन्नस्य जीवानन्दस्यैवात्यन्तभिन्नस्य ब्रह्मण इव वाऽत्यन्ताभिन्नस्याखण्डानन्दस्य प्रकाशमानस्याप्यप्रकाशमानत्वमप्यविद्यामाहिम्नोपपन्नमिति ॥ १४ ॥

उक्तार्थमुपसंहरन्नेव तत्र युक्त्यन्तरं दर्शयति—इतीति । त्वदुक्तोऽर्थः क इति न जानामि । दूरे जनमिव भासमानं किमिति न जानामि । इति शब्दतः प्रत्यक्षतश्चावगतमप्यर्थं साकल्येनानूद्य तत्रैव प्रश्नोऽज्ञानानुभवश्च दृश्यते । अतो बाह्यविषयेऽपि प्रकाशमानस्याप्रकाशमानत्वं प्रसिद्धमेव । न च

यदि त्वेवं सत्यप्यगुणविषयं नानुमनुषे
तदा शास्त्रं कामं भवतु सगुणब्रह्मविषयम् ।

व्या०—त्वदुक्तोऽर्थं इत्यादौ सामान्यतो ज्ञाते विशेषतः प्रश्नोऽज्ञानानुभवश्चेति वाच्यम् । सामान्यस्य ज्ञानस्य प्रश्नविशेषतया अज्ञानावच्छेदकतायाश्चानुपपन्नत्वात् । अज्ञातस्य विशेषस्य प्रश्नविषयतया ज्ञानावच्छेदकतया चानुवादायोगात् । न चान्वयव्यतिरेकाभ्यां विशेषप्रश्ने सामान्यज्ञानमेव तन्त्रं, विशेषाज्ञानानुभवे च सामान्यमेवावच्छेदकमिति वाच्यम् । सामान्यविशेषभावस्य व्याप्यव्यापकभावातिरिक्तस्याभावेनाज्ञातधूमकस्य विज्ञातवह्निकस्य धूमप्रश्नप्रसङ्गात् । धूमाज्ञानस्य वह्निं न जानामीति वह्न्यवच्छेदेनानुभवप्रसङ्गाच्च । अनुमितिहेतुज्ञानविषयव्याप्तिप्रश्नादिस्थले विशिष्य त्वदभिमतसकलविशेषणविशिष्टं व्याप्त्यादिकमवगच्छत एव प्रश्नार्थं तदप्रकाशस्य त्वयाऽपि वक्तव्यत्वाच्च । अन्यथा प्रष्टुस्तदवगमाभावे तस्य प्राक्तनवह्न्यनुमानविलोपप्रसङ्गात् । तदवगमं विना तदा तस्यानुमित्यङ्गीकारे तत्रैव व्यभिचारेण त्वदभिमतव्याप्तिज्ञानस्यानुमित्यकारणत्वप्रसङ्गात् । न च दूरे जलज्ञानमनभ्यासदशादोषात्संदिग्धप्रामाण्यमिति तदाहितार्थसंदेहात्प्रश्नोऽज्ञानानुभवश्चेति वाच्यम् । अनभ्यासदशापन्नज्ञाने प्रकाशमानस्यापि जलस्याप्रकाशमानत्वाङ्गीकारे प्रामाण्यसंशयस्यैवानवतारप्रसङ्गात् । प्रामाण्यशरीरनिविष्टस्य प्रामाण्यसंशयविषयज्ञानविषयीभूततद्वत्त्वभागातिरिक्तस्य पुरोवर्तिविशेष्यकत्वस्य जलत्वप्रकारकत्वस्य च संशयविपर्यासानास्पदतया प्रामाण्यसंशयस्य तद्वत्त्वसंशयपर्यवसन्नत्वात् । एवमस्मिञ्ज्योतिर्मण्डले कश्चन्द्र इत्यादिश्चक्षुषा चन्द्रमण्डलादिकं पश्यत एव प्रश्नोऽपि प्रकाशमानस्याप्रकाशमानत्वसाधक उदाहर्तव्यः । तत्प्रपञ्चस्त्वन्यत्र कृतोऽनुसंधेयः । इदं त्वत्रावशिष्यते । परसिद्धान्ते सत्यमज्ञानमस्ति, पूर्वपक्षे तु कल्पितमेव तदभ्युपगम्यते । कल्पितं च न तदप्रकाशोपपादकमिति । तदपवरके प्रविशता तदा लोके कल्पितस्यापि तमसस्तदप्रकाशोपपादकत्वं दृष्टमित्यादियुक्तिभिरस्माभिः सिद्धान्तसंग्रहादिषु दर्शिताभिर्निरस्तप्रायमिति नेह प्रपञ्च्यते ॥ १५ ॥

एवं निर्गुणस्यानधिगततया विचार्यत्वे संभवेऽपि तत्र विचिकित्सा चेत्सगुणब्रह्मविषयतयैव शास्त्रारम्भः स्यात् । न च सर्ववेदान्तानामद्वैतिदर्शितन्यायरखण्डैकपरत्वात्सगुणे ब्रह्मणि मानाभावः । अद्वैतिनां मतेऽध्यारोपापवादन्यायेनाद्वितीयब्रह्मप्रतिपादने महातात्पर्येण स्वरसतः प्रवृत्तानामपि वेदान्तानां मध्ये केषांचिद्वाक्यानां सृष्टिवाक्यप्राप्तगुणसहितब्रह्मोपासनाविधिपरत्वस्य ब्रह्मणस्तदुपासनाविषयगुणवत्त्वप्रतिपादकत्वस्य चाङ्गीकृतत्वादित्यभिप्रेत्याऽऽह—यदीति ।

श्रुतीनां कासांचिचदपि कथयत्येव विषयं
महातात्पर्येण प्रगुणमगुणे च स्थितिजुषाम् ॥ १६ ॥
तस्मात्तुच्छं प्राचि पक्षे शास्त्रानारम्भवर्णनम् ।
तथैव तत्सिद्धान्तेऽपि तदारम्भसमर्थनम् ॥ १७ ॥

अथ जिज्ञासाधिकरणसिद्धान्तदूषणप्रकरणम् ॥

अद्वैते यद्यशेषश्रुतिशिखरगिरामैकमत्यं निरास्यं
तासां ब्रह्मेतिशब्दो गुणगरिमनिमित्तोऽपि नेष्टे गुणत्वात् ।

व्या०–इत्थं कृतं पूर्वपक्षस्य दूषणमुपसंहरन्नेव तत्सिद्धान्तस्य दूषणं वक्तुं तस्याप्यसारतां प्रतिजानीते–तस्मादिति । परेण स्वकीयाधिकरणपूर्वपक्षप्रदर्शनव्याजेनाद्वैतवाद एव शास्त्रानारम्भदूषणं दर्शितमिति तत्साधारण्याय पूर्वपक्षस्य प्राचि पक्ष इति निर्देशः ॥ १६ ॥ १७ ॥

इति जिज्ञासाधिकरणपूर्वपक्षदूषणप्रकरणं समाप्तम् ॥

अत उपरि सिद्धान्तमनूद्य दूषयति–अद्वैत इति । सर्वेषां वेदान्तानां सजातीयविजातीयस्वगतभेदरहिते निर्विशेषजीवचैतन्यरूपे ब्रह्मणि तात्पर्यमाश्रित्य कृतस्य पूर्वपक्षस्य निरासाय सर्ववेदान्तप्रतिभटत्वेन विचारविधिवाक्यगतब्रह्मशब्दस्त्वया कीर्तितः । न चायं गुणपूर्तिनिमित्तः सन्नपि सर्वानपि वेदान्तानुप-

टि०– १ सर्वेषां वेदान्तानामिति—“ स्वाध्यायोऽध्येतव्यः ” इत्यध्ययनविधिगृहीतेषु सर्वेषु वेदान्तेषु “ तद्विजिज्ञासस्व । तद्ब्रह्म ” (तै० उ० ३ । १) इत्यादिवाक्यानां तद्घटकपदानां चान्तर्भूतत्वेन पूर्वपक्षिणा लाघवाख्यं कंचिन्न्यायमाश्रित्य प्रत्यगभिन्ने ब्रह्मणि तेषां तात्पर्यवर्णने ब्रह्मपदस्यापि तत्र तात्पर्यस्य निर्णीतत्वेन ब्रह्मशब्दस्य कोऽर्थ इति जिज्ञासैव नोदेति । तदनुदये तदर्थनिर्णायकत्वेन कस्यापि न्यायस्याप्रवृत्त्या पूर्वपक्ष्यभिमतातिरिक्तार्थशून्यब्रह्मपदस्य सर्ववेदान्तप्रतिभटत्वं शक्रेणापि निरूपयितुमशक्यमिति भावः । अत एव “ गुणपूर्तिनिमित्तकब्रह्मशब्दस्यापि पूर्वपक्षनिरासकत्वं युक्तम् । अद्वैतिदर्शितोपक्रमादिन्यायजातमवलम्ब्य पूर्वपक्षप्रवृत्तेरनभ्युपगमेन व्याहतिदोषोद्धारसमये लाघवाख्यं कंचिन्न्यायमवलम्ब्य पूर्वपक्षप्रवृत्तेः प्रदर्शितत्वेन च तस्य तत्र प्रतिभटत्वोपपत्तेः । वेदान्तानामद्वैतपरत्वव्यवस्थापकलाघवाख्यशुष्ककतिपयन्यायापेक्षया तेषां भेदपरत्वव्यवस्थापकगुणपूर्तिनिमित्तकब्रह्मशब्दस्य श्रौतत्वेन सकलवेदविचारविधायकविध्युद्देशगतत्वेन च प्रबलत्वात् ” इति प्रलपनमपास्तम् ॥ १६ ॥ १७ ॥

ब्रह्मशब्दस्यापि पूर्वपक्षिणैव निर्णीतार्थकत्वेनार्थानाकाङ्क्षया सर्वश्रुतिविरुद्धगुणपूर्तिवाचकत्वायोगात् । लाघवाख्यं कंचिन्न्यायमवलम्ब्याद्वैत्यभिमतोपक्रमादिकं परि-

निर्दोषाशेषदीव्यद्गुणजुषि कलयन्सर्ववेदैकमत्यं
तद्बद्धत्वादिवाचा त्वमपि खलु तथैवाऽऽन्यपर्यं ब्रवीषि ॥१८॥

व्या०—क्रमादिदृढन्यायनिर्णीताद्वैततात्पर्यात्प्रच्यावयितुं शक्तः । प्रत्युत स्वयमेव तद्गुणभूतत्वात्तदनुगुणमेवाद्वैतवाद्यभिमतत्रिविधपरिच्छेदराहित्यमर्थमवलम्बेत । दर्शितश्चायं न्यायस्त्वयाऽपि “ न स्थानतोऽपि ” (ब्र० सू० ३ । २ । ११) इत्यधिकरणे । तत्र हि “ कार्यकारणबद्धौ ताविष्येते विश्वतैजसौ । प्राज्ञः कारणबद्धस्तु द्वौ तु तुर्ये न सिध्यतः ” (गौ० का० १ । ११) इत्यादिश्रुतिवाक्याद्विश्वतैजसप्राज्ञादिरूपस्य भगवतोऽपि बद्धत्वादिदोषोऽस्तीत्याशङ्क्योक्तमनुव्याख्याने— “ सर्वत्राशेषदोषोज्झः पूर्णकल्याणचिद्गुणः । तद्विरुद्धं तु यत्तत्र मानं नैव भवेत्क्वचित् । महातात्पर्यरोधेन कथं तन्मानमत्र तु ” इति । न्यायसुधायां चोक्तम् । “ सकलश्रुतिस्मृतीतिहासपुराणानां परमेश्वरस्याशेषदोषदूरत्वे समस्तगुणपूर्णत्वे च यन्महातात्पर्यं तद्विरोधेन तद्वाक्यमत्र भगवतो दोषवत्त्वादौ कथं मानं भवेत् । दृष्टं हि निर्णीतमहावाक्यार्थविरुद्धस्य तदवान्तरवाक्यस्य तत्राप्रामाण्यं, यथा स्वर्गप्रयोजनाग्निहोत्रपरमहावाक्यार्थविरुद्धस्य यद्यमुष्मिँल्लोकेऽस्ति वा न वेति ” इत्यादेस्तदवान्तरवाक्यस्य । महावाक्यं हि

टि०—त्यज्य प्रवर्तितपूर्वपक्षं प्रति ततोऽपि प्रबलन्यायासूचकस्य निर्विशेषस्वरूपबोधकस्य ब्रह्मशब्दस्य प्रतिभटत्वायोगात् । अद्वैत्यभिमतन्यायात्प्रबलत्वेन त्वदभिमतस्य विधिवाक्यगतस्यापि ब्रह्मशब्दस्य गुणपूर्णे शक्तिग्राहकप्रमाणानाकाङ्क्षया तदनुपन्यासेन च केवलं प्राबल्यस्य गगनकमलिनीकल्पत्वाच्च । यच्चापि “ शास्त्रयोनित्वेक्षत्यधिकरणयोः कारणवाक्यानां तर्कमात्रेणानुमानसांख्यस्मृतिप्राप्तपरमाणुप्रधानकारणानुवादित्वमिति पूर्वपक्षप्रातिभटत्वेन श्रौतमेवोपनिषदत्वेक्षणादिन्यायजातं त्वयाऽपि सिद्धान्तन्यायतयोपेयते, तत्रापि त्वया कारणवाक्यानामनुमानसांख्यस्मृतिप्राप्तकारणानुवादित्वस्य तादृशैनेव न्यायैः समर्थयितव्यत्वात् । समर्थितं च कारणवाक्यानामनेकन्यायैरनुमानसांख्यस्मृतिप्राप्तकारणानुवादित्वम् । “ यानि वेदवाक्यानि सर्वज्ञस्य सर्वशक्तेर्ब्रह्मणो जगत्कारणत्वं प्रतिपादयन्तीत्यवोचः, तानि प्रधानकारणस्वपक्षेऽपि योजयितुं शक्यन्ते ” इति भाष्येण । तस्मात्त्वन्मते यथा शास्त्रयोनीक्षत्यधिकरणयोरुत्थानं तथाऽस्मन्मतेऽपि प्रथमाधिकरणसिद्धान्तोत्थानं युक्तम् ” इति भणनं, तदपि निरालम्बनम् । वैषम्यात् । तथा हि—मन्मत उभयत्राधिकरणयोरौपनिषदत्वेक्षणप्रतिपादकवाक्याघटितकारणवाक्यानां सांख्याद्युक्तन्यायैरनुवादकत्वव्यवस्थापनेन प्रवृत्तस्य निरासाय कारणवाक्याघटकः “ तं त्वौपनिषदं पुरुषं पृच्छामि ” (बृ. ३.९.२६.) “ तदैक्षत ” (छा. ६.२.३.) इत्यादिश्रुत्यालम्बनेन सिद्धान्तः प्रवृत्तः । त्वन्मते तु ब्रह्मशब्दघटितानां सर्वेषां वेदान्तानां निर्विशेषपरत्वव्यवस्थापनेन प्रवृत्ते पू-

नाऽऽशङ्क्योत्पत्तिशिष्टास्थितिरिह यत इत्यन्यसिद्धानुवादा-
त्यक्तं चोत्पत्तिवाक्यावगतमपि पशोर्भूरिबाधाद्धविष्ट्वम् ।

व्या०—प्रधानं, अनन्यार्थत्वात् । अप्रधानं त्ववान्तरवाक्यम् । तदर्थप्रतिपत्तिहेतुत्वादिति । तस्माददद्वैतवादिदर्शितोपक्रमादिन्यायेभ्यः प्रबलतरैर्न्यायैः सर्ववेदान्तानां सगुणे महातात्पर्यं प्रसाध्यते चेत् । एवं कृतपूर्वपक्षनिरासो लभ्यते न तु ब्रह्मशब्दशक्तिदर्शनमात्रेणेति भावः ॥ १८ ॥

स्यादेतत् । जीवातिरिक्ते ब्रह्मणि प्रमाणं नास्तीति प्रत्यवतिष्ठमानं पूर्वपक्षिणं प्रति तत्र प्रमाणत्वेनोपन्यस्तं ब्रह्मपदम् । तच्चाज्ञातस्य ज्ञापकमुत्पत्तिस्थानीयमिति तत्प्रतिपादितं गुणपूर्णत्वमुत्पत्तिशिष्टम् । तेन जीवातिरिक्ते ब्रह्मणि सिद्धे वेदान्तेषु सर्वैरपि ब्रह्मप्रकरणैस्तत्रैव वर्तितव्यमिति तत्प्रतिपादितानि निर्गुणत्वजीवाभिन्नत्वादीन्युत्पन्नशिष्टानि । अत उत्पत्तिशिष्टप्राबल्यमर्यादया ब्रह्मपदस्य सर्ववेदान्तेभ्यः प्राबल्यं स्यादित्याशङ्क्याऽऽह—नेति । स्यादेतत् । एवं यदि ब्रह्मणो धर्मिणस्तद्ब्रह्मेत्यत्रत्यं ब्रह्मपदमज्ञातस्य ज्ञापकं स्यात् । नत्वेवं तस्य "यतो वा

टि०—र्वपक्षे सर्ववेदान्तप्रतिभटत्वेन तदन्तर्गतब्रह्मशब्दमालम्ब्य सिद्धान्तो दर्शितः" । निर्विशेषबोधकसर्ववेदान्तघटकत्वेन ब्रह्मशब्दस्य दुर्बलतया गुणत्वेन तद्वन्धत्वादिवचनवत्प्रतिभटत्वं न सिध्यति । एतेन "ब्रह्मपदमज्ञातज्ञापकमुत्पत्तिवाक्यस्थानीयमिति तत्प्रतिपादितं गुणपूर्णत्वं जीवभिन्नत्वादिकं चोत्पत्तिशिष्टप्राबल्यमर्यादया प्रबलम्" इत्यपास्तम् । ब्रह्मपदस्य गुणपूर्णवाचकत्वं नाद्यापि सिद्धमिति सगुणे प्रमाणतया तदुपन्यासस्य मोहमूलत्वात् । अन्यथा प्रमाणत्वेनोपन्यासाद् गुणपूर्णवाचकत्वसिद्धिः । तत्सिद्धौ तस्य प्रमाणतयोपन्यास इति परस्पराश्रयस्य वज्रलेपापत्तेः । अज्ञातज्ञापकत्वं वेदस्य नास्तीति वदतस्तवोत्पत्तिवाक्यगतस्यापि ब्रह्मशब्दस्य तदभावात् । ग्रन्थकृताऽनुवादत्वोक्तेश्च । किंच सजातीयविजातीयस्वगतभेदनिषेध एवोत्पत्तिशिष्टम् । "सदेव" इति वाक्ये तथैव भानात् । न च सदेवेत्यादिवाक्यस्य स्वव्याघातेन भेदत्रयनिषेधकत्वं न युज्यते । आपातप्रतीतार्थपरत्वे मीमांसावैयर्थ्यात् । शब्दमात्रस्य स्वरसतः सविशेषप्रतीतिजनकत्वेन लक्षणाकल्पनोत्तरभावित्वदभिमतत्रिविधभेदराहित्यपरत्वस्य स्वारसिकत्वासिद्धेः । "सत्त्वं स्वातन्त्र्यमुद्दिष्टम्" "अत्तृत्वाच्च तदादानादात्मेति परमो हरिः" इत्यादि स्मृतिपर्यालोचनया स्वातन्त्र्यादिगुणकस्यैव "सदेव सौम्य" "आत्मा वा इदम्" इत्यादिश्रुतिभिः प्रतीतेरिति वाच्यम् । सत्त्वस्यानवस्थाभिया सत्त्वं सदिति प्रतीत्या च सद्रूपत्वावश्यकत्वेन तत्र भेदत्रयराहित्याभ्युपगमे व्याघाताभावात् । सत्त्वं स्वातन्त्र्यमिति भवत्कल्पितस्मृत्यभ्युपगमे स्वतन्त्रस्य ब्रह्मवत्सृष्टिप्रलयाद्यभावापत्त्या त्वन्मत एव व्याघातात् । लक्षणां विनैवोक्तत्रिविधभेदराहित्यस्य संप्रदायानुरोधेन निरूपयितुं शक्यत्वादिति दिक् ॥ १८ ॥

१ यत इति—यत्वत्र "यद्वाग्नेयादिवाक्यवत्, यतो वेत्यादेर्विशिष्टविधित्वमभ्युप-

अस्ति श्रुत्यन्तरानुग्रह इति सुशकं तद्धविष्ट्वेऽपि वक्तुं
रूपत्वादीव कुम्भे गुणिनि गुणगतं नापि नाम्नो निमित्तम् ॥१९॥

व्या०—इमानि भूतानि ” (तै० ३।१) इति। यदुपबन्धबलेन जगत्कारणतया सहान्यतः प्राप्तस्य धर्मिणोऽनुवादकत्वावगमात् । ततश्च “ सदेव सौम्येदमग्र आसीत् ” छा० ६।२।१) “ आत्मा वा इदमेक एवाग्र आसीत् ” (ऐ० १ । १) इत्यादिकारणवाक्यमेव तत्प्रापकं वक्तव्यम् । तत्र च सजातीयविजातीयस्वगतभेदनिषेधः स्वरसतः प्रतीयत इति स एवोत्पत्तिशिष्टो न गुणपूर्णत्वमिति विपरीतमेव बलाबलम् । अस्तु वा तदेव ब्रह्मपदमज्ञातज्ञापकं, तथाऽपि नात्रोत्[१]पत्तिशिष्टन्यायावतारः । उत्पत्तिशिष्टमपि हि न भूरि बाधाय प्रभवति । अत एव “ पशुमालभेत ” इत्युत्पत्तिवाक्ये देवतासंबधेनावगतं पशोर्हविष्ट्वं “ पशुं विशास्ति ” “ हृदयस्याग्रेऽवद्यति ” इत्यादिहृदयादिहविष्ट्वगमकानेकावदानवाक्यात्त्यक्तम् । इह “ बृहन्तो ह्यस्मिन् गुणाः ” इति श्रुत्यन्तरसाहाय्यमस्तीति चेत् , किं ततः, पशोर्हविष्ट्वेऽपि “ जुष्टं देवानामिदमस्तु हव्यम् ” इति तदुपकरणमन्त्रसाहाय्यमस्ति । तथाऽपि बह्ववादानवाक्यविरोधात्तद्धविष्ट्वं त्यक्तं चेत् , गुणादिपूर्तिमत्त्वमप्यनेकाद्वैतवाक्यविरोधात्किमिति न त्यक्तव्यम् ।

टि०—गम्यते । न च तत्र प्रापकवाक्यान्तराभावाद्विशिष्टविधित्वम् । प्रकृते सदेवेत्यादिकं वाक्यान्तरं प्रापकमस्तीति वैषम्यमिति वाच्यम् । वैपरीत्यस्यापि सुवचत्वात् । तयोर्भिन्नशाखास्थत्वेनानुवादित्वानुपपत्तेश्च ” इति । तदपि काशकुशावलम्बनम् । “ यच्छब्दयोगः प्राथम्यमनुवादस्य लक्षणम् ” इत्यौत्सार्गिकनियमस्य बाधकाभावेऽवश्यमाश्रयणीयतया सदादिवाक्ये यच्छब्दाभावेन वैपरीत्याप्रसक्तेः । सदादिवाक्यस्य शाखान्तरस्थत्वेऽपि सत्यं ज्ञानमित्यादिवाक्यस्य पुरोवादस्य तच्छाखायामेव सत्त्वेन ब्रह्मशब्दस्यानुवादत्वापरिहार्यत्वाच्च । किंच विशिष्टविधित्वाभ्युपगमे जन्माद्यधिकरणे वक्तृश्रोतृसाधारणसकलस्थूलप्रपञ्चस्रष्टृत्वमनुवाद्यमित्यादिनाऽनुवादकत्वकथनपरत्वदीयग्रन्थविरोधश्च । न हि विशिष्टविधिस्थल एकांशोऽनूद्यतेऽपरांशो विधीयत इति प्रामाणिकैरभ्युपगम्यत इति दिक् ।

१ उत्पत्तिशिष्टन्यायावतार इति—यच्छब्दाघटितानां पुरोवादानां बहूनां सत्त्वात्तदुदितनिर्विशेषस्वरूपमनूद्य विचारमात्रं तद्विजिज्ञासस्वेति वाक्ये विधीयते, नतु गुणपूर्तिरपि । उभयविधाने वाक्यभेदापत्तिरिति भावः । एतेन “ उत्पत्तिवाक्यावगतपशोर्हविष्ट्वे हृदयादिवाक्यानामानर्थक्यवद् ब्रह्मणो गुणपूर्तिमत्त्वे निर्विशेषाभेदवाक्यानां वैयर्थ्याभावेन वैषम्यात् । आनर्थक्यप्रतिहतानां विपरीतं बलाबलमित्यङ्गीकारात् । निर्विशेषवाक्यानामभेदवाक्यानां चाहेयगुणविषयतया तदधीनत्वाद्यर्थतया च सार्थकत्वम् ” इति प्रत्युक्तम् । यच्छब्दघटितवा-

व्या०—एतेन ब्रह्मपदस्य श्रुतिरूपतया निर्गुणत्वादिप्रतिपादकवाक्येभ्यः प्राबल्यमित्यपि शङ्का निरस्ता । प्रथमोपस्थितिप्रयुक्तबलाद्बहुत्वप्रयुक्तबलस्यैवाधिकत्वात् । "विप्रतिषिद्धधर्माणां समवाये भूयसां स्यात्स्वधर्मत्वम्" इति न्यायात् । अपि चायुक्तं गुणबृहत्त्वस्य गुणिनि शब्दप्रवृत्तौ निमित्तत्वम् । अन्यथा रूपत्वरसत्वगन्धत्वादिनिमित्तीकृत्य कुम्भेऽपि रूपरसगन्धादिशब्दप्रवृत्तिप्रसङ्गात् । तस्मादद्वैतविषयमहावाक्यार्थविरोधादद्वैतस्योत्पत्तिशिष्टत्वेन तदविरोधात् । बहुवाक्यविरोधात्, गुणगतधर्मस्य गुणिनि शब्दप्रवृत्तिनिमित्तत्वायोगाच्च । ब्रह्मशब्दो न गुणबृहत्त्वनिमित्तः, किंतु परब्रह्मण्यद्वैत्यभिमतत्रिविधपरिच्छेदराहित्यनिमित्तः । एवं "बृहन्तो ह्यस्मिन्गुणाः" इति श्रुतिरस्तीति चेत् । सा व्यावहारिकगुणविशिष्टसगुणब्रह्मणि कथं चित्स्तुतिपरतया नेतव्या । अद्वैतिभिः

टि०—क्यस्य पुरोवादानुसारेणार्थानभ्युपगमेऽनुवादत्वभङ्गेनाप्रामाण्यापत्त्या प्राबल्याभावेन ततो निर्गुणवाक्यानां त्वदुक्तार्थासंभवात् । किंच निर्विशेषवाक्यानां हेयगुणराहित्यपरत्वे लक्षणाद्वयकल्पनाया अभेदवाक्यानां तदधीनत्वपरत्वे च सामानाधिकरण्यभङ्गस्य चाऽऽपत्तेः। अपि च हेया गुणा ब्रह्मणि प्रसक्ताश्चेत तेषां त्वयाऽऽरोपानभ्युपगमेन प्रामाणिकतया निषेधायोगात् । त्वयाऽलीकस्यैव निषेधप्रतियोगित्वाङ्गीकारेण तेषामनलीकत्वात् । अप्रसक्ताश्चेत् कथं निषेधः । अन्यथा सर्षपे मेरुर्नास्तीति वाक्यस्य प्रामाण्यापत्तेश्च । न च बहुत्वप्रयुक्तप्राबल्यापेक्षया श्रुतित्वप्रयुक्तप्राबल्यस्य हीनतोक्तिर्मूलेऽयुक्तेति वाच्यम् । आकाशाधिकरणे (ब्र० सू० १।१।२२) सूत्रकृतैव बहुत्वप्रयुक्तप्राबल्यस्य श्रुतित्वप्रयुक्तप्राबल्यादाधिक्योक्तेः । न च वह्निरनुष्णः पदार्थत्वात्, प्रमेयत्वात्, वाच्यत्वात्, इति बहूनामपि लिङ्गानामेकत्वाचप्रत्यक्षबाध्यत्वदर्शनाद्बहूनामप्येकबाध्यत्वं युक्तमिति वाच्यम् । तत्र त्वाचप्रत्यक्षस्य परीक्षितप्रामाण्यकत्वेन बाधकत्वं प्रकृते ब्रह्मशब्दस्य नाद्यापि गुणपूर्णपरत्वं परीक्षितमिति वैषम्यात् । सौत्रब्रह्मशब्दस्य गुणपूर्णपरत्वे भूमार्थकेनिप्रत्ययान्तगुणिशब्दप्रयोगेणैवोपपत्तौ संदिग्धब्रह्मशब्दप्रयोगेण भगवतो व्यासस्य प्रतारकत्वापातात् । तस्यायुक्तत्वादिति ।

१ 'बृहन्तो ह्यस्मिन्गुणाः' इति वाक्यस्य श्रुतित्वेन परकल्पितस्याप्रामाणिकत्वेऽप्यभ्युपेत्य तस्या अर्थमाह—व्यावहारिकेति । यत्तु "चन्द्रिकायां "निर्दोषश्रुतिसाक्षिभ्यां प्रमिते ब्रह्मजीवयोः। गुणपूर्त्यल्पगुणते मिथ्येति च न युज्यते" इति तदपि मन्दम्। सगुणश्रुतिसाक्षिभ्यां प्रमिते ब्रह्मजीवयोः । गुणपूर्त्यल्पगुणते मिथ्येति ब्रह्मवादिनः " इत्यपि सुवचत्वात् । अत एव "गुणपूर्णत्वमेव ब्रह्मशब्दप्रवृत्तिनिमित्तमित्यपि न चोदनीयम्। बृहिवृद्धावित्यनुशासनात् संकोचे प्रमाणाभावेन स्वरूपप्रयुक्तानतिशयमहत्त्वस्य प्रवृत्तिनिमित्तत्वसंभवेन गुणपूर्णत्वस्य तथात्वे प्रमाणाभावात् । "बृहन्तो ह्यस्मिन्गुणाः" इति वाक्यस्य

यश्चेशे गुणगरिमा न जीववर्गे भूमाख्यस्त्वदभिमतो विरुद्ध एषः ।
यत्तस्मिन्नपि घटते सदा सतोऽस्य स्वानन्दप्रभृतिवदावृतेरभानम् ॥२०॥

व्या०—" स्याच्चैकस्य ब्रह्मशब्दवत् " (ब्र० सू० २।३।५) इति सूत्रे ब्रह्मशब्दस्य निर्गुणवत्सगुणेऽपि वृत्तेरङ्गीकृतत्वादिति भावः । एतेन " अथातो ब्रह्मजिज्ञासा " (ब्र० सू० १ । १ । १) इति सूत्रस्याऽऽदावस्त्योंकारो ब्रह्मवाचकः सूत्रावयवः । स चावतेर्धातोरुत्पन्न ओतत्ववाची सन्योग्यतया गुणप्रोतत्वपर इति तत्रापि ब्रह्मणां गुणपूर्तिसिद्धेस्तस्य जीवाद्वैलक्षण्यमित्यपि कल्पना गलहस्तिता ॥ १९ ॥

एवं ब्रह्मशब्दस्य गुणपूर्तिवाचकत्वमेव नास्तीति ब्रह्मणो जीवाभेदाविरोध उपपादितः । इदानीं तद्वाचकत्वमङ्गीकृत्यापि तदविरोधमुपपादयति—यश्चेति । परमेश्वरस्य गुणबृहत्त्वं नाम तद्गुणानामानन्दादीनां भूमा निरतिशयत्वरूप उत्कर्ष इति " भूम्नः क्रतुवज्ज्यायस्त्वम् " (ब्र० सू० ३।३।५९) " ब्रह्मदृष्टिरुत्कर्षात् " (ब्र० सू० ४ । १ । ५) इति त्वदीयाधिकरणयोः स्पष्टम् । जीवब्रह्माभेदे स जीववर्गेऽपि स्यादिति तथैवानुभवोऽपि भवेत् । तथा च तस्याल्पगुणत्वेनानुभवो न स्यादिति हि तस्य विरुद्धत्वमुच्यते । नायमस्ति विरोधः । जीवानां मुक्तिसमयभोग्यानन्दज्ञानबलाद्युत्कर्षमङ्गीकृत्य त्वया तस्य संसारे

टि०—कल्पितत्वेनाप्रामाण्यस्याशक्तत्वात् । यत्त्वत्र "श्रुतिवाक्यकल्पनोक्तिरज्ञानमूला । सगुणनिर्गुणब्रह्मद्वैविध्यस्याप्यसिद्धेः" इति तदपि मन्दम् । "विशालक्षणतोऽनूनस्तपस्वी बहुवेदवित् । वेद इत्येव यं पश्यन्ति नेदं ज्ञानदर्शनात्" इति ब्रह्माण्डवचनोदाहरणेन त्वयैव स्वाचार्यस्य श्रुतिवाक्यकल्पकत्वस्य पूर्वमभ्युपगतत्वेनेदानीमज्ञानमूलत्वोक्तेरेवाज्ञानमूलत्वात् । सर्वासां श्रुतीनां पूर्वपक्षिणा निर्गुणपरत्वव्यवस्थापनात् । सगुणस्य विचार्यत्वे प्रमाणाभावात् । विचारविधिवाक्यगतब्रह्मशब्दस्यानिर्धारितार्थकत्वेन दोलायमानत्वात् । न च तवापि ब्रह्मशब्देनैवाखण्डार्थसिद्धावखण्डार्थवादानारम्भः स्यादिति वाच्यम् । तत्पदार्थस्याखण्डस्य ब्रह्मपदेन सिद्धावपि वाक्यार्थसाधकाखण्डार्थवादारम्भसंभवेन तदाक्षेपस्य मतान्तराज्ञानमूलत्वेन हेयत्वात् । यदपि गुणपरिच्छेदाभिन्नस्य वस्त्वपरिच्छेदस्य नृशृङ्गायमाणत्ववचनम्, तदपि दूरत उत्सारणीयम् । गुणपरिच्छेदवतो घटवदब्रह्मत्वापत्तेः । गुणपरिच्छेदस्य गुणान्योन्याभावरूपस्य वस्त्वपरिच्छेदत्वं वदतः खरशृङ्गायमाणत्वात् । इत्यलमसंभाष्यसंभाषणेनेति दिक् ॥ १९ ॥

१ यश्चेश इति । 'त्वदभिमतो भूमाख्यो यो गुणगरिमा' ईशे वर्तत एष जीवे न विरुद्धः । यत्—यस्मात् सदा तस्मिन् सतो विद्यमानस्य स्वानन्दप्रभृतिवदावृतेरभानं घटते' इति योजना ।

२ जीवानामिति—मुक्तिसमये भोक्ष्यमाणस्याऽऽनन्दस्येदानीमपि भाने मुक्तिसंसारयोः

व्या०—किंचित्प्रकाशमानस्यापि सर्वात्मना प्रकाशे मुक्तिसंसारयोरविशेषप्रसङ्गादिति तत्परिहारार्थमविद्यावरणस्योपपादितत्वेन तत एव तस्मिन् परमेश्वरगुणपूर्तिसत्त्वेऽपि तदननुभवस्याल्पगुणत्वानुभवस्य च समर्थितप्रायत्वात् । स्वकीयमुक्तिभोग्यानन्दाद्युत्कर्ष एव परमेश्वरे गुणभूमेति वक्तुं शक्यत्वाच्च । अविद्यावरणनिवृत्तिरूपमुक्त्यनन्तरमपि हि केषांचित्परमेश्वरापरोक्षज्ञानानन्तरसंभूतासत्कर्मानुष्ठानविकर्मानुष्ठानदोषेण परमेश्वरेच्छावशात्स्वरूपानन्दस्य किंचिदनभिव्यक्तिमङ्गी कुरुषे । " स्तुतयेऽनुमितिर्वा " (ब्र० सू० ३ । ४ । १४) इति त्वदीयाधिकरणे तथा निरूपितत्वात् । परमेश्वरस्य चाऽऽनन्दादिभूम्नो निरतिशयत्वरूपस्याप्यतीतक्षणानन्त्यवन्न्यूनाधिकभाववदसंख्याननानाविशेषशालिनः कश्चिद्विशेष एव मुक्तान्प्रति यथाधिकारं भासत इति विशेषान्तराणां पुरुषभेदेनानभिव्यक्तिमङ्गी कुरुषे । " नाना शब्दादिभेदात् "

टि०—साम्यप्रसक्त्याऽविद्यावरणाभ्युपगमवद्ब्रह्मगुणभूम्नोऽप्यावरणकल्पनेनाभानोपपत्तिः । नहि विषयसत्त्वमात्रमुपलब्ध्याधायकं, किंत्वप्रतिबद्धसामग्रीसचिवम् । प्रकृतेऽविद्यावरणरूपप्रतिबन्धकसत्त्वान्न भानमिति भावः । एतेन " सुषुप्तावानन्दस्येव गुणभूम्नोऽपीषद्भानापत्तिः " इति निरस्तम् । आवृतस्येषदभिव्यक्तेरधिकाभिव्यक्तेर्वाऽऽपादयितुमशक्यत्वात् । प्राणिनां विचित्रप्रज्ञत्वादज्ञानामभानेऽपि ज्ञानिनां तत्संभवाच्च । न च भवदभ्युपगतब्रह्मज्ञाने प्रमाणं न पश्यामीति वाच्यम् । ' अहं ब्रह्मास्मि ' (बृ० १।४।१०)इत्यादिश्रुतिरेव प्रमाणमिति पश्य । ब्रह्मज्ञानप्रयुक्तब्रह्मभावेऽभिव्यक्तस्य सार्वात्म्यस्य " तस्मात्तत्सर्वमभवत् " (बृ० १।४।१०) इति श्रुत्याऽनूदितत्वात् । ननु तत्कृतेः स इदं सर्वं भवति, इत्यनिष्टफलप्रदर्शनमुखेन तथाविधोपासनानिन्दापरत्वेन न त्वदभिमतार्थसिद्धिः । अत एव गीतायाम् " ईश्वरोऽहमहं भोगी " (गी० १६।१४) इत्यादिना स्वस्मिन्नीश्वरत्वानुसंधानमासुरप्रकृतीनामेवोक्तम् । न चैवं जगदाहुरनीश्वरमिति पूर्ववाक्यविरोधः । तस्य स्वातिरिक्तेश्वरप्रतिक्षेपपरत्वादिति चेत्, न । ईश्वरोऽहमित्यनुसंधानस्य भवत्पूर्वपक्षिणा कुत्राप्यनुक्तत्वेनानुक्तोपालम्भात् । गीतायामेव " एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः " (गी० १६।९) इति परिच्छिन्नबुद्धीनामेव नाशस्मरणात् । किंच " अन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुः " (बृ० १।४।१०) इति श्रुत्या भेददर्शिनः पशुतुल्यत्वावगमात् । पूर्वोक्तश्रुतावभेददर्शिनः कुत्रापि निन्दाया अश्रवणेन त्वदुक्तार्थस्याऽऽग्रहमूलत्वेन हेयत्वात् । "उदरमन्तरं कुरुते । अथ तस्य भयं भवति " (तै० उ० २।७) इत्यादिना भेददर्शिनो जन्मसहस्रेऽपि भयानिवृत्तिश्रवणात् । विष्णोरग्रत एव सतोर्जयविजययोर्भेददर्शनेनासुरभावापत्तिस्मरणेन भवन्मते विष्णुदर्शनस्य मोक्षाप्रयोजकत्वावगमाच्च । अहं भोगीति वाक्यशेषानुसारेण " ईश्वरोऽहमित्यादेः " आरोपितराजभावविषयकत्वावगमात् । अत एव " जगदाहुरनीश्वरम् " इति वाक्यस्य स्वातिरिक्तेश्वरप्रतिक्षेपपरत्वोक्तिर्गर्भस्रावेणैव गता । यत्तु—सविशेषाभेदपक्षे युक्तं विद्यमानस्याऽऽवरणं

अपि च भगवानेकोऽनेकस्तनुस्तनुमानपि
स्वयमवयवा नास्त्यैश्वर्याद्विरोध इतीदृशम् ।
विषयगुणसांकर्यं वर्यं तवाभ्युपगच्छतः
कथमितरवद्भेदः सिध्येद्विरुद्धगुणान्वयात् ॥ २१ ॥

व्या०–(ब्र० सू० ३।३।६०) इति त्वदीयाधिकरणे तथा निरूपितत्वात् । एवं परमेश्वरस्याऽऽनन्दादिभूम्नो जीवेऽपि सत्त्वे तस्य संसारदशायां विद्यमानेनाविद्यावरणेनाप्रकाशे काऽनुपपत्तिरिति भावः ॥ २० ॥

एवं गुणपूर्णत्वस्य जीवेऽपि संभवेनाविरोध उपपादितः । इदानीं तस्य विरुद्धत्वेऽपि परमते न जीवभेदसाधकत्वमित्याह–अपि चेति ।

इत्थं हि तव मतम्–परमेश्वरः स्वयमेकः सन्नप्यानन्दमयाधिकरणोदाहृतान्नमयप्राणमयादिरूपेण 'गुहाधिकरणोदाहृतशुभकर्मफलभोक्त्रात्मान्तरात्मरूपेण 'न संख्योपसंग्रहा' (ब्र० सू० १।४।१२)धिकरणोदाहृतपञ्चपञ्चजनरूपेण "न स्थानतोऽपीत्यधिकरणो(ब्र० सू० ३।२।११)दाहृतविश्वतैजसप्राज्ञरूपेण चानेकः । तथा शरीरी सन्नपि 'अरूपवदेव हि तत्प्रधानत्वात्' (ब्र० सू० ३ । २ । १४) इत्यधिकरणोक्तरीत्या परव्यूहावतारादिनानाशरीररूपः, एवमानन्दमयोऽवयवी सन्नपि तदीयशिरःपक्षपुच्छाद्यवयवरूपः, सर्वं चैतदचिन्त्याद्भुतशक्तेः [1]परमेश्वरस्यैश्वर्यवशान्न विरुध्यते । " अङ्गाङ्गित्वेन

टि०–नतु निर्विशेषाभेदपक्ष इति तत्तुच्छम् । यतः सविशेषयोर्जीवब्रह्मणोरभेदमुपगच्छता दण्डापूपन्यायेन निर्विशेषयोरभेदोऽभ्युपगत इति किं महदनिष्टमापादितं देवानांप्रियेणेति दिक् ॥२०॥

१ परमेश्वरस्येति–स चाचिन्त्याद्भुतशक्तिमानैश्वर्यवशात्परस्परविरुद्धैकत्वानेकत्वादिनानाधर्म इव जीवात्मभूतः सन्नपि क्रीडते । न तत्र धर्मादीनां विरोधोऽस्ति, प्रत्युताऽऽनुकूल्यमेव । विरोधविचारस्तु न कर्तव्य इति भावः । ननु धर्मिग्राहकमानेन मानान्तरविरोधाभावेन विनिगमकाभावेन च ब्रह्मण्येकत्वानेकत्वादीनां सिद्धावप्यल्पगुणत्वग्राहिसाक्षिप्रत्यक्षविरोधेन जीवे गुणपूर्णत्वरूपब्रह्मत्वासिद्ध्या ताभ्यां तयोर्भेदसाधनं संभवतीति चेत्, न चैतद्युक्तम् । स्वर्गकामादिवाक्येन प्रत्यक्षसिद्धदेहात्मभावस्य मिथ्यात्वाभ्युपगमवदभेदश्रुत्यनुसारेण जीवे साक्षिसिद्धाल्पगुणत्वस्य मिथ्यात्वमिति वक्तुं शक्यत्वात् । ईश्वरे जीवरूपे गुणपूर्णत्वगुणाल्पत्वाधायकैश्वर्यस्य संभवात् । अन्यथेश्वरस्य सर्वैश्वर्यं न स्यात् । यत्तु–ब्रह्मणि भेदाभावस्य प्रमिततया तदनेकत्वाद्युपपादकविशेषकल्पनं युक्तम् । जीवे त्वया विशेषानभ्युपगमेन विरुद्धधर्मसमावेशो भेदाभावश्च न युक्त इति । तदपि मन्दम् । जीवे विशेषस्य मयाऽनभ्युपगमेऽपि त्वयाऽभ्युपगतत्वेन तत्प्रयुक्तविरुद्धधर्मसमावेशस्येश्वराभेदस्य च युक्तत्वात् ।

विशेषं वैकुण्ठे यदि वदसि भेदप्रतिनिधिं
तमेकानेकत्वप्रभृतिगुणसंवासघटकम् ।
सजीवब्रह्मत्वव्यतिकरविरोधं च शमयतु
समं खल्वत्रापि श्रुतिशिरसि भेदापवदनम् ॥ २२ ॥

व्या०—भगवान्क्रीडते परमेश्वरः । ऐश्वर्यान्न विरोधश्च चिन्त्यस्तस्मिञ्जनार्दने ” इत्यादिवचनादिति । एवं सर्वत्र विरुद्धधर्मसांकर्यमेव भगवदैश्वर्यातिशयप्रयुक्ततया बहुमन्यमानस्य तव मते सकलगुणपरिपूर्णस्यैव ब्रह्मणोऽल्पगुणजीवभावोऽपि संभवतीति न ब्रह्मशब्देन जीववैलक्षण्यं सिध्यति । विरुद्धधर्मेण भेदसाधनं खलु विरुद्धधर्मसांकर्यमन्यत्र परिहरतां शोभते। सर्वत्र विरुद्धधर्मसांकर्यमेव श्रेयां-समातिष्ठमानस्य तव कथं तदुपपद्यतामिति भावः ॥ २१ ॥

नन्वीश्वरः स्वकीयाचिन्त्याद्भुतशक्तिमात्रेण स्वस्मिन्नेकत्वादिविरुद्धधर्मसमावेशं घटयतीति मया नेष्यते। किंतु भेदप्रतिनिधिं विशेषमप्यपेक्ष्य तं घटयतीति। न च जीवेश्वरयोर्मया विशेष इष्यते । येन भेदाभावेऽपि तत एव तस्य स्वविरुद्धधर्मशाली जीवभावः स्यादित्याशङ्क्याऽऽह—विशेषमिति । परमेश्वरे ‘ नेह नानाऽस्ति किंचन ’ (क० ४।११) इत्यादिस्वगतभेदनिषेधश्रुतिबलादेव हि तस्मिन्नेकत्वानेकत्वादिविरुद्धधर्मसमावेशाय त्वं विशेषमङ्गीकृत्य स्वयमेकोऽपि परमेश्वरो विशेषबलादनेक इत्यादि कल्पयसि । तथा जीवब्रह्मनिषेधश्रुतिबलात्तयोर्विरुद्धधर्मसमावेशाय भेदस्थाने विशेषमङ्गीकृत्य परमेश्वर एव विशेषवशाद्द्विविधजीवभावेन संसरतीति किमिति त्वया न कल्पनीयम् । न हि परमेश्वरे स्वगतभेदनिषेधश्रुतेर्जीवब्रह्मभेदनिषेधश्रुतेश्च कश्चिद्विशेषस्त्वयोपपादयितुं शक्य इति भावः ॥ २२ ॥

टि०—“नान्योऽतोऽस्ति द्रष्टा” (बृ० उ० ३।७।२३) ‘तत्त्वमसि’ (छा० ६।८।७) ‘अहं ब्रह्मास्मि ’ (बृ० १ । ४ । १०) इत्यादिश्रुतिभिर्ब्रह्मणि जीवाभेदस्यापि प्रमितत्वेन त्वदभ्युपगतविशेषेण सर्वनिर्वाहात् । अपरीक्षितस्य प्रत्यक्षस्याप्रमात्वेन तद्विरोधेन श्रुतेरन्यथानयनस्यायुक्तत्वस्योक्तत्वात् । तस्माद्विशेषबलादेव जीवेऽपि गुणपूर्णत्वब्रह्माभेदयोरुपपत्तिरिति दिक् ॥ २१ ॥

१ विशेषवशादिति—पूर्वपक्षे जीवब्रह्मभेदानिषेधतदभेदप्रतिपादकः “नान्योऽतोऽस्ति द्रष्टा ” (बृ० उ० ३।७।२३) ‘ अनेन जीवेनाऽऽत्मनाऽनुप्रविश्य ’ (छा० ६।३।२) इत्यादिश्रुतिबलाद्ब्रह्मण एवात्रिविधया जीवभावाङ्गीकारवत्त्वन्मते स्वगतभेदनिषेधकः “ नेह नानाऽस्ति ” (क० ४।११) इत्यादिश्रुतिसिद्धस्वगतभेदशून्यस्य ब्रह्मण एकत्वानेकत्वादिविरुद्धधर्मनिर्वाहकस्वशक्तिबलेन विशेषबलेन च जीवभावोऽस्त्विति भावः ॥ २२ ॥

वक्तव्यं ते विरुद्धं घटयति भगवच्छक्तिरेवेत्यवश्यं
नो चेत्कृत्स्नप्रसक्तिर्निरवयववचःक्षोभणं वा कथं स्यात् ।
एकोऽनेकः स्थितश्चेत्यणुरखिलजगद्व्यापकश्चेति वा ते
तत्र व्यर्थो विशेषः क्वचन तव तया सर्वनिर्वाहसिद्धेः॥२३॥

व्या०—एवं ब्रह्मणः सविशेषगुणपूर्तिमत्त्वाङ्गीकारेऽपि तदीयशक्तिमाहिम्ना विशेषबलेन च तस्यैवाल्पगुणजीवभावः संभवतीत्युक्तम् । इदानीं सर्वविधाविरुद्धधर्मसंघटने ब्रह्मणः शक्तिरेव पर्याप्तेति विशेषाङ्गीकारो व्यर्थ इत्याह—वक्तव्यमिति । [1]परमेश्वरशक्तिरेव सर्वत्र विरुद्धधर्मसंघटनीत्यवश्यं त्वयैष्टव्यम् । अन्यथा जीवस्य स्वतन्त्रकर्तृत्वे 'कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा' स्यादिति त्वदुक्तदूषणमदूषणं स्यात् । तथा हि—जीवस्य स्वतन्त्रकर्तृत्वनिरासार्थं 'इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः' (ब्र० सू० २।१।२२) इत्यधिकरणम् । तत्र "कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा" इति गुणसूत्रं जीवस्य स्वतन्त्रकर्तृत्वनिरासे हेत्वन्तरपरमिति तव मतम् । तत्र 'न जीवात्कारणं परम्' इति( ) श्रुतौ तद्व्यपदेशाज्जीवः स्वतन्त्रः कर्तेति पूर्वपक्षे स्वतन्त्रकर्तृत्वे तस्य हिताकरणमहितकरणं च न स्यात् । दृश्यते च हिताहिते विविश्वतोऽपि तदुभयमास्तिककामुकादेरिति दूषणमुक्त्वा कृत्स्नप्रसक्तिसूत्रेण यदि जीवः स्वतन्त्रकर्ता स्यात्तदा तस्य सिद्धान्ते तत्स्वरूपातिरिक्तकार्यानुसारितारतम्यवत्कृतिरूपगुणानङ्गीकारात्स्वयमेव प्रवृत्तिशक्तिरूपस्य तस्य तृणादानादिष्वपि कृत्स्नशक्त्या प्रवृत्तिः प्रसज्यत इत्यनुभवविरोधः । न चैकदेशेन प्रवृत्तिः । तस्य निरंशत्वात् । अन्यथा निरवयवत्वशब्दव्याकोपः । न च 'व्यतिरेको गन्धवत्' (ब्र० सू० २।३।२७) इत्यधिकरणे जीवस्य सांशताया व्यवस्थापयिष्यमाणत्वात् । अंशानां बहुत्वेनां-

---

टि०— १ परमेश्वरशक्तिरिति—यदि शक्तिरियं कृत्स्नप्रसक्त्यधिकरणोक्तदूषणलाभाय परमेश्वरे विरुद्धधर्मसंघटनीत्युच्यते, तर्हि तयैवाभेदबहुत्वयोर्विरुद्धयोः समावेशसंभवे विशेषाङ्गीकारो व्यर्थ इति भावः । न च धर्मिग्राहकमानेन तत्तत्कार्यनिर्वाहकतया सिद्धस्य विशेषस्येश्वरशक्त्या प्रतिक्षेपायोग इति वाच्यम् । विशेषसाध्यप्रयोजनस्येश्वरशक्त्यैव निर्वाहे विशेषस्य निष्प्रयोजनत्वेन निषेधात् । तत्तत्कार्यनिर्वाहकतया धर्मिग्राहकमानसिद्धत्वस्य स्वहृदयमात्रारूढत्वेनानुपन्यासात् । न च कालादृष्टादिवद् विशेषस्यापि कारणत्वमस्तु । अन्यथा कालादीनामप्येकेनान्यस्य प्रतिक्षेपापत्तेः । त्वन्मतेऽविद्ययैव सर्वनिर्वाहोपपत्तौ कारणमात्रोच्छेदप्रसङ्गाच्चेति वाच्यम् । कालादृष्टादिवद्विशेषस्य साधारणकारणत्वेन त्वयाऽ-

व्या०—शाविशेषैः कार्यानुसारिणा तारतम्येन तस्य कर्तृत्वोपपत्तिः । बहुत्वस्य भेदव्याप्तत्वेन भेदस्यापि प्रसक्त्या भिन्नांशराहित्यरूपानिरवयवत्वशब्दव्याकोपतादवस्थ्यात् । न च विशेषबलेन बहुत्वोपपत्तिः । भेदेनोपपादनीयस्यांशांशिबहुत्वस्य चेतने विशेषेणोपपादने घटादावचेतने तस्य तेनैवोपपादनप्रसङ्गादिति दूषणान्तरं प्रदर्श्य तस्मादचिन्त्यशक्तिः परमेश्वर एव परस्परविरुद्धमप्यभेदमंशांशिकृतबहुत्वं च चेतनेषु विशेषेणैव निमित्तेन समावेश्याभेदेन निरवयवत्वशब्दकोपं बहुत्वेन कृत्स्नप्रसक्तिं च निराकृत्य कार्यानुरूपं जीवेन कारयतीत्यङ्गीकर्तव्यमिति तदुपसंहृतम् । अत्र परमेश्वरशक्तिमनपेक्ष्य विशेषेणैवाभेदबहुत्वयोर्विरुद्धयोः समावेशसमर्थने कृत्स्नप्रसक्त्यादिसूत्रोक्तदूषणं न लभ्येतेति स्फुटमेव । तदपेक्षायां तु सैव तव पर्याप्ता । किमजागलस्तनायमानविशेषकल्पनया । किमपि साधनान्तरमनपेक्ष्य कर्तुमकर्तुमन्यथा कर्तुमपि शक्तः परमेश्वर इति हि तव मतम् । तस्य शक्तिः कथं भेदापेक्षं बहुत्वमभेदेऽपि विशेषमपेक्ष्य संपादयति । न तु तमनपेक्ष्येति नियन्तुं शक्यते । यदि तस्य जगत्सृष्टौ प्रकृत्याद्यपेक्षावदभेदबहुत्वसमावेशसंपादने विशेषापेक्षा श्रुत्यादिप्रमाणसिद्धा स्यात्तदा स्वयमेव गन्तुं शक्तस्यापि दण्डावलम्बनवद्विशेषापेक्षाऽपि लीलामात्रेणेति तव कल्पना प्रसरेत् । न चैवम्, विशेषस्य विरुद्धधर्मसमावेशकल्प्यत्वात् । तस्य चाऽऽवश्यकपरमेश्वरशक्त्यैवोपपन्नत्वात् । अपि चैक एव विष्णुरनेकत्र सर्वेषां दक्षिणाक्षिस्थाने जाग्रदवस्थाप्रेरकेण "सप्ताङ्ग एकोनविंशतिमुखः" (मा० ३) इत्याद्युक्तलक्षणेन विश्वाभिधानेन रूपेण प्रतिस्थानं समग्रेणैव स्थितः । यथा नानादेशस्थानशेषपुरुषान्प्रति सतताभिमुखेन समग्रेण रूपेण तरणिस्तत्तदूर्ध्वदेशे स्थितः, न तु बहुकुम्भसंभृताम्भोवत्तत्तदक्षिस्थानस्थितः स्वरूपतः शरीरतो वा भिन्नः । नापि बहुतृणाग्रप्रसारितपटवत्तत्तदधिकरणेष्वेकदेशेन स्थित इति त्वया "न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र" (ब्र० सू० ३।२।११) इत्यधिकरणे स्थापितम् । तथाऽणुरेव विष्णुस्त्वखिलजगद्व्यापकश्च, सूक्ष्मतया दृश्यमान एव कृष्णस्य मुखे गर्भीकृतब्रह्माण्डस्य यशोदादृष्टस्यैकेन दाम्ना बन्धनानुभवाच्च, सूक्ष्म एव तदुदरे बहूनामपि दाम्नां बन्धुमपर्याप्तत्वस्य च तद्दृष्टस्य महत्त्वलिङ्गस्य सत्त्वादिति "अक्षरमम्बरान्तधृतेः" (ब्र० सू० १ । ३ । १०) इत्यधिकरणे "अस्थूलमनणु" (बृ० ३ । ८ । ८)

टि०—नङ्गीकारात् । कृत्स्नप्रसक्त्यधिकरणोक्तदूषणलाभायासाधारणकारणत्वेनैवाङ्गीकृतत्वात् । शक्तिरङ्गीकारे तादृशस्य तस्याजागलस्तनायमानत्वात् । मन्मतेऽविद्याया मूलकारणत्वेन

किंचायं भेदसाध्यं कमपि घटयितुं कल्प्यते न त्वयाऽर्थं
किंतु व्याहारमात्रं क्वचन कथमिव स्याद्विरुद्धार्थयोगः ।

व्या०—इति श्रुतिवाक्यमणुत्वस्थूलत्वपरं व्यवस्थाप्य त्वया निरूपितम् । "दहराधिकरणे च" (ब्र० सू० १ । ३ । १४) दहराकाशान्तस्थस्य परिच्छिन्नस्यैव ब्रह्मांशस्य "यावान्वा अयमाकाशस्तावान्वा" (छा० ८।१।३) इति श्रुत्यर्थतया बहिर्ब्रह्मांशवद्व्याप्तत्वं त्वयाऽङ्गीकृतम् । तत्रैव परिच्छिन्नस्य व्याप्तत्वासंभवमाशङ्क्यान्यत्रापि "एष आत्माऽन्तर्हृदयेऽणीयान् । व्रीहेर्वा यवाद्वा श्यामाकाद्वा श्यामाकतण्डुलाद्वा" (छा० ३ । १४ । ३) इत्यणीयस्त्वेन श्रुतस्यैवान्तर्हृदयस्थितस्य ब्रह्मांशस्य "एष आत्माऽन्तर्हृदये ज्यायान्पृथिव्या ज्यायानन्तरिक्षाज्ज्यायान्दिवो ज्यायानेभ्यो लोकेभ्यः" (छा० ३।१४।३) इति सर्वतो ज्यायस्त्वश्रवणात्तद्वदिहाप्युपपद्यत इत्युपपादितम् । अत्र सर्वत्रापि केवलं परमेश्वरशक्त्यैवैकत्वमत्येकपर्याप्तानेकत्वयोरणुत्वमहत्त्वयोश्च विरुद्धयोः समावेश उपपादनीयः । न विशेषस्योपयोगोऽस्ति । विशेषो हि तव भेदप्रतिनिधिरेकस्यैवानेकत्वमापाद्य धर्मान्सांकर्येण निवेशयेत् । न चात्र द्विविधेऽपि विरुद्धधर्मसमावेशोदाहरणे नैकत्वापादनमस्ति । अत एवैतादृशोदाहरणे त्वया केवलं परमेश्वरशक्तिरेव नियामकत्वेनाऽऽश्रिता । उक्तं च "ऐश्वर्याद्रूपमेकं च सूर्यवद्बहुधेयता" ( ) इत्यादि । एवं च सत्यन्यत्रापि विरुद्धधर्मसमावेशसंघटने विशेषो व्यर्थः । परमेश्वरः स्वयमेकः सन्ननेकस्तनुस्तनुमानवयवोऽवयवी चेत्यादेः सर्वविरुद्धस्यापि विरुद्धधर्मसमावेशस्यावश्यं वक्तव्यतया तदीयशक्त्यैव निर्वाहोपपत्तेरिति भावः ॥ २३ ॥

इतश्च परमेश्वरशक्त्यैवैकत्वानेकत्वादिविरुद्धधर्मसमावेशः संघटनीयो न विशेषेणेत्याह—किंचेति । अयं विशेषस्त्वया भेदसाध्यं किंचिदप्यर्थं घटयितुं न[1] कल्प्यते,

टि०—तत्तत्कार्यावान्तरकारणानां द्वारकारणत्वेन सार्थक्यात् । नहि तथा विशेषस्त्वया स्वीक्रियते येन तस्य सार्थक्यं स्यात् । अतो भेदाभावेऽपि तत्कार्यनिर्वाहः शक्तिसाध्यः, कर्तुमकर्तुमन्यथा वा कर्तुं शक्तः परमेश्वर इति त्वयाऽभ्युपगमात् । तस्मान्न विशेषसिद्धिरिति दिक् ॥२३॥

१ न कल्प्यत इति । अयमत्र भावः—" विशेषोऽयं भेदाभावेऽपि तत्साध्यव्यवहारार्थं त्वया कल्प्यते, न तु कस्याप्यर्थस्य साधकतया । तथा च विशेषो भेद एव स्यात्, न तत्प्रतिनिधिः । "उक्तं च सुधायां (जिज्ञासाधिकरणे)—सकलभेदकार्यकारित्वे विशेषो भेद एव स्यान्न तत्प्रतिनिधिः" इति । ततश्च क्वचिद्भेदव्यवहारहेतुत्वं क्वचिदेकत्वानेकत्वादिपदार्थनिर्वाहकत्वं च विशेषस्य वदतस्तव पूर्वापरविरोधो न्यायसुधाविरोधश्च दुर्वार इति ।" अत एव "विशेषस्य क्वचिद्भेदकार्यव्यवहारमात्रनिर्वाहकत्वाभ्युपगमेऽपि

संबन्धः स्याद्गुणानां गुणिभिरितरथा गोचरस्तत्प्रतीते-
र्न स्याद्भेदः पटादिष्वपि च घटयता सत्सु तन्तुष्वसत्त्वम् ॥२४॥

व्या०—किंतु यत्र भेदाभावेऽपि भेदाधीनो व्यवहारो दृश्यते, यथा लोके "नीलं सुगन्धि महदुत्पलमित्यादौ, वेदे" "सत्यं ज्ञानमनन्तं ब्रह्म" (तै० ब्र० १। १) 'आनन्दो ब्रह्म' (तै० उ० ३।६) त्यादौ च, नीलगन्धादीनां ज्ञानानन्दादीनां च धर्मिणः परस्परस्माच्च भेदाभावेऽप्यपर्यायशब्दैरुक्तिरित्यादिस्तन्मात्रनिर्वोढृत्वेन कल्प्यते । भेदाभावेऽभेदस्थाने स्वयं भासमानः सन्नपर्यायशब्दप्रयोगादिकं निर्वर्तयतीति । नानेकत्वादिविरुद्धधर्मसमावेशरूपार्थनिर्वाहाय । यदि व्यवहारस्येव भेदाधीनस्यार्थस्यापि निर्वाहकोऽयमङ्गी क्रियते, तदा गुणगुणिनां घटस्य नीलवर्णो ब्रह्मण आनन्द इत्यादिधर्मधर्मिभावव्यवहारमूलप्रतीतिगोचरः संबन्धोऽपि तद्विरोधिनि सत्यप्यभेदे विशेषबलात्कल्प्येत । सत्सु तन्तुषु पटाद्यसत्त्वनिर्वाहाय भेदश्च न कल्प्येत । तन्तूनामवयवानां पटाद्यवयविनामभेदेऽपि विशेषबलादेव सत्त्वासत्त्वविरुद्धधर्मसमावेशोपपत्तेः । न चोभयत्रापीष्टापत्तिः, "अस्मत्पक्षे गुणाद्याश्च तद्वन्तो हि विशेषतः । अनन्यत्वान्नानवस्था भेदो नाशे भवेत्तथा" इत्याद्यनुव्याख्यानविरोधात् । अत्र हि तद्वन्तो हि विशेषत इत्यस्य व्याख्यानसमये भेदसंबन्धकार्यकरो हि विशेष इति न्यायसुधायां तदभिप्रायो वर्णितः । तेन यथा विशेषो भेदस्य प्रतिनिधिरिति शुक्लः पट इत्यादिप्रतीतौ स भासमानो भेदाधीनं सामानाधिकरण्यव्यवहारं निर्वर्तयति । तथा संबन्धस्यापि प्रतिनिधिरिति स एव पटः शुक्लगुणवानित्यादिप्रतीतौ भासमानस्तद्वत्त्वव्यवहारमपि निर्वर्तयतीति गुणगुण्यादिसंबन्धानङ्गीकारः स्पष्टीकृतः । अत एव समवायनिराकरणस्थलेऽपि गुणगुण्यादीनां संबन्धो नास्त्येवेति

टि०—तस्य भगवत्येकत्वानेकत्वादिविरुद्धधर्मसमावेशनिर्वाहकत्वाभ्युपगमे दोषाभावः" इत्याधुनिकप्रलपनं परास्तम् । वैरूप्याश्रयणस्य दोषत्वाच्च । न च धर्मिग्राहकमानेन तादृप्येणैव विशेषसिद्धिरिति वाच्यम् । विनिगमकाभावाद्वैपरीत्यापत्तेश्च । घटस्य, नैल्यमित्यादिप्रतीतेः संबन्धमभ्युपगम्यैव निर्वाहेण घटस्य स्वरूपमितिवदुपपादनायोगात् । सत्कार्यवादिमते नाशस्थलेऽपि सूक्ष्मरूपेण कार्यस्य सत्त्वादत्यन्तभेदासिद्धेः । भेदस्यैव सत्त्वे तत्प्रतिनिधिविशेषकल्पनस्य सोमसत्त्वे पूतिकाग्रहणवद्धेयत्वाच्च । गुणगुणिनोः संयोगसमवायाभावेऽपि तादात्म्यस्य संभवाच्च । स्वरूपसंबन्धस्य विशेषरूपत्वे तत्पर्यायत्वापत्तेश्चेति दिक् ।

व्या०—व्यवस्थापितम्। स्वाभिमतं संबन्धान्तरमस्तीति तन्नोक्तम् । ब्रह्मतद्धर्माणामभेदे धर्मधर्मिभावो न युक्त इत्याशङ्कापरिहारार्थे " उभयव्यपदेशात्त्वहिकुण्डलवत् " (ब्र० सू० ३ । २ । २८) इति त्वदीयाधिकरणे च तदाशङ्कापरिहाराय सिद्धान्ते विशेष एव समर्थितः । ननु तदधीनः कश्चन संबन्धः । नन्वाश्रयाश्रयिभाव एव धर्मधर्मिभावत्वाद् गुणगुण्यादीनां संबन्धः किमिति न स्यात् , न च तस्याद्विष्ठत्वात्संबन्धत्वानुपपत्तिः, संयोगस्यापि मन्मते द्विष्ठत्वाभावादिति चेन्न। त्वन्मते ययोरभेदस्तयोर्धर्मधर्मित्वव्यवहारे सत्यपि वस्तुत आश्रयाश्रयित्वानङ्गीकारात् । अत एवायं पट एतत्तन्तुसंबद्ध एतदाश्रितत्वादेतदाश्रिततृणादिवदिति समवायसाधकानुमाने तन्तुपटयोराश्रयाश्रयिभावासिद्धेरिति न्यायसुधायां स्वरूपासिद्धिरुक्ता। एवं तावद्गुणगुण्यादीनां विशेषाधीनसंम्बन्धान्तरसिद्धिप्रसङ्गोऽनिष्ट इति स्थितम् । तथा तन्तुपटादीनां भेदासिद्धिप्रसङ्गोऽप्यनिष्ट एव । " भेदो नाशे भवेत्तथा " इत्युदाहृतश्लोकशेषे सत्सु तन्तुषु विनश्यतां पटादीनामभेदवद्भेदस्याप्यङ्गीकृतत्वात् । न्यायसुधायां च तद्व्याख्यानानन्तरं स्यादेतत् , यथा भेदसाधकानां व्यपदेशभेदादीनां विशेषाश्रयणेनैवान्यथासिद्धिरुक्ता, तथा सत्यपि तस्मिन्नसत्त्वस्यापि विशेषेणैव निर्वाहः क्रियतां किं भेदाभ्युपगमेन, मैवम् । विशेषस्य भेदकार्यव्यवहारमात्रनिर्वाहकत्वेनासत्त्वं प्रत्यनिर्वाहकत्वात् , सकलभेदकार्यकारित्वे विशेषो भेद एव स्यान्न तत्प्रतिनिधिः " इतिशङ्कापरिहाराभ्यामुक्तार्थस्य स्थिरीकरणाच्च । तस्माद्विशेषस्य विरुद्धधर्मसंघटकताया अपि परमेश्वरशक्त्यायत्तत्वस्य विशेषाभावस्थलेऽपि परमेश्वरशक्त्यैव विरुद्धधर्मसंघटनस्य च त्वयाऽङ्गीकृतत्वात् । वस्तुतो विशेषस्य भेदसंबन्धकार्यव्यवहारमात्रनिर्वर्तकताया एव त्वयोक्तत्वाच्च । भेदाभावस्थलेऽप्येकत्वानेकत्वादिपरमेश्वरशक्त्यैव संपादनीयमिति व्यर्थः क्वाचित्क-

टि०— १ आश्रयाश्रयिभावासिद्धेरिति—यत्त्वत्र पराभ्युपगतस्य भेदगर्भस्याऽऽश्रयाश्रयिभावस्य तत्रासिद्धेरित्युक्ततया विरोधाभावः । तथाविधाश्रयाश्रयिभावस्यैव हेतुशरीरे प्रवेशादिति जल्पनं, तद्धेयमेव । भेदाघटितस्य तादृशसंबन्धस्य खरशृङ्गायमाणत्वेन पराभ्युपगतस्येत्यस्यायुक्तत्वात् । "ज्यायान् पृथिव्या" (छा० ३।१४।३)"अणीयान्व्रीहेर्वा" (छा० ३।१४।३) " त्वं स्त्री त्वं पुमानसि " (श्वे० ४ । ३) इत्यादिश्रुतिबलाद्व्यापकत्वाल्पत्वनानाजीवरूपत्वादिविरुद्धधर्मस्यापि शक्त्यैव तस्मिन्नुपपादनीयत्वात् । नचैवं शङ्कनीयं " ईश्वरस्यैकत्वानेकत्वादिविरुद्धधर्मसमावेशो न तदैश्वर्यविरोधीति तदीयशक्त्या तदुपपादनं युक्तं, बह्वल्पगुणत्वरूपविरुद्धधर्मसमावेशस्तु तद्विरोधीति न तया तदुपपादनं युक्तम्। कथमीश्वरोऽपि विविधदुःखादिकलुषितजीवभावं स्वस्यानुमन्येत, ईश्वरत्वविरोधादिति" " पराऽस्य शक्तिर्वि-

ऐश्वर्याज्जीवभावं कथमिव स भजेद्दुःखभीत्यादिदूष्यं
मैवं दुःखादयस्ते करणगुणतया न स्पृशन्त्येव जीवम् ।

व्या०—विशेषाङ्गीकारः । अपर्यायशब्दप्रयोगादेरपि परमेश्वरशक्तिकृतानेकत्वेनैवोपपत्तेः । अतो जीवेश्वरयोर्निर्विशेषाभेदेऽपि बह्वल्पगुणत्वरूपविरुद्धधर्मसमावेशः संघटत इति न गुणपूर्णत्वेन जीवादीश्वरस्य भेदसिद्धिरिति भावः ॥ २४ ॥

नन्वैश्वर्यबलादन्यसाध्यविरुद्धधर्मसंकरं संपाद्य क्रीडन्नपि परमेश्वरो विविधदुःखादिकलुषितं जीवभावं नानुमन्येतेत्याशङ्कामुद्भाव्य परिहरति—ऐश्वर्यादिति, भवेदेवं, यदि जीवभावस्त्वन्मते दुःखादिकलुषितः स्यान्नत्वेवम् त्वया दुःखादीनामन्तःकरणपरिणामत्वेनाङ्गीकृतत्वात् । ननु मन्मतेऽन्तःकरणपरिणामा एव दुःखभयादय इति । सत्यं, नतु ज्ञानेच्छाकृतिवदन्तःकरणवृत्त्यात्मधर्मरूपेण तद्द्वैविध्यमस्ति । सन्मुक्तियोग्यजीवेषु मुक्तौ तदनुवृत्त्यभावात् । अथापि दुःखादिमत्त्वं नाम दुःखादिस्वामित्वं न तु तदाश्रयत्वम् , । " इच्छास्वामित्वमेवोक्तमिच्छावत्त्वं म चापरम्" इति सांख्याधिकरणा (ब्र० सू० २।२।२)नुव्याख्यानेऽन्तःकरणवृत्तिरूपेच्छायामुक्तस्य न्यायस्य दुःखादिष्वपि तुल्यत्वात् । स्वामी च तेषामन्तःकरणोपादानानामपि जीव एव । क्षेत्रे फलितानां धान्यादीनामिव क्षेत्रपतिः । अत एव क्षेत्रपतेरहं धान्यवानित्यनुभववज्जीवस्याहं दुःखी बिभेमि द्वेष्मीत्यनुभव इति चेदुच्यते । यदि जीवस्य हेयतया प्रसिद्धदुःखादिमत्त्वं नाम दुःखादिस्वामित्वं हन्त तर्हि तत्परमेश्वरस्यैव स्यात्, न जीवस्य । परमेश्वर एव दुःखादिपरिणामिनोऽन्तःकरणस्य तदन्यस्य चेन्द्रियवर्गस्य स्वामी, नान्य इति त्वयेष्यते । त्वया "ज्योतिराद्यधिष्ठानं तु तदामननात्, (ब्र० सू० २।४।१५) इत्यधिकरणे "ब्रह्मणो वा एतानि करणानि चक्षुः श्रोत्रं मनो वागित्यादि " काषायणश्रुतिवचनात्सर्वान्तर्यामित्वाच्च परमेश्वर एव करणानां स्वामी, स तु स्वकीयैः करणैरनादिकालमारभ्य दर्शनादिकार्याणि जीवैः कारयतीति जीवकरणत्वव्यवहारस्तथाऽभिमानश्च स्वामिनः

टि०—विधैव श्रूयते " (श्वे० ६।८) इति श्रुत्या मायाशक्तेरघटितघटनापटीयस्त्वावगमेन तया बह्वल्पगुणत्वरूपाविरुद्धधर्मसमावेशस्यैश्वर्याविरोधेनोपपादनसंभवात् । विरुद्धानां केषांचिदीश्वरे सामानाधिकरण्यं केषांचिन्नेत्यत्र वैषम्यहेतोरभावाच्चेति कृतं पल्लवितेन ॥ २४ ॥

१ जीवैः कारयतीति—इदमत्राऽऽकूतम् । " जीवानां प्रयोज्यकर्तृत्वे प्रयोजककर्तृत्वे चेश्वरस्य लोके पक्तुर्देवदत्तात्पाचयितुः कृष्णवर्मणो भोगाधिक्यवत्परमेश्वरस्यैवाधिकं भोक्तृत्वमिति सर्वप्राणिकरणगणप्रेरकस्य तस्य सर्वजीवराशिगतदुःखादिमत्त्वमवर्जनीयमि-

व्या०—कुठारैस्तत्प्रेरितेषु छिन्दत्सु तत्तद्भृत्यकुठारव्यवहारदर्शनात्, परकीयेऽपि बहुकालसंबन्धिनि तदीयतोपचारदर्शनात्, तथाऽभिमानदर्शनाच्चेति व्यवस्थापितत्वात्। "स्वामिनः फलश्रुतेरित्यात्रेयः" (ब्र० सू० ३।४।४४) इत्यधिकरणे मनुष्यादीनां स्वस्वेन्द्रियजन्यज्ञानकर्मस्वामित्वमुररीकृत्यैव सिद्धान्तप्रदर्शनाच्च। एवं हि त्वदीयं तदधिकरणम् "ब्रह्मविदाप्नोति परम्" (तै० ब्र० व० १) इत्यादिश्रुत्युक्तज्ञानफलं ज्योतिष्टोमादिकर्मफलं चेन्द्रियप्रेरकाणां देवानामेव भवति, उत कर्तृभूतानां मनुष्यादीनामपीति संशये, देवानामेवेति तावत्प्राप्तं, भगवदुपासनापुण्यफलमिन्द्रियप्रेरकदेवतापदं प्राप्तानां तेषां भगवत्प्रसादलब्धतत्तदिन्द्रियजन्यस्वामित्वफलवत्त्वात्। लोके च स्वामिन एव फलदर्शनात्। कर्तुरप्यस्वामिनः कर्मकरादेः क्लेशादिफलादर्शनात्। "यदु किंचेमाः प्रजाश्च शुभमाचरन्ति देवा एव तदाचरन्ति यदु किंचेमाः प्रजा

टि०—तीश्वरत्वापेक्षया जीवभाव एवाभ्यर्हित इति। अत एव वक्ष्यति—"त्वन्मतसिद्धपरमेश्वरभाव एव पापीयानिति कथं त्वदीयः परमेश्वरो जीवभावं नार्थयेत" इति। यत्तु "दुःखादिकलुषितत्वं दुःखादिभोक्तृत्वं, तच्च नान्तःकरणस्योपकरणस्य। अहं दुःखीति प्रतीतिवदन्तःकरणं दुःखीति प्रतीत्यभावादिति, नैतत्सारम्, "कामः संकल्पो विचिकित्सा" (बृ० १।५।३) 'कामा येऽस्य हृदि श्रिताः" (क० ६।१४) "प्रजहाति यदा कामान्सर्वा न्पार्थ मनोगतान् (गी० २।५५) इत्यादिश्रुतिस्मृतिभिः कामादीनां करणधर्मत्वावगमेनान्तःकरणतादात्म्याध्यासेन जीवे तादृशप्रतीत्युपपत्तेः। अन्तःकरणस्य जडत्वेन जीवचैतन्याविद्धस्य तस्य तथाप्रतीत्ययोगाच्च। "आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः" (क० ३।४) इति श्रुत्या संहतस्यैव भोक्तृत्वाद्यवगमात्। न च "चिन्मात्रोऽहं सदाशिवः" (कैव० १।१८ इति श्रुत्या शुद्धस्याप्यहंत्वदर्शनात् भोक्तृत्वादिकमपि तस्यैवेति वाच्यम्। योऽयं त्वंपदार्थः साक्षी स चिदात्मकः परमेश्वर इति तदर्थत्वात्। अन्यथा प्रदर्शितसंहतभोक्तृत्वप्रतिपादकश्रुत्यनाञ्जस्यं स्यात्। नच देहादीनामिव मनसोऽपि सहकारित्वमेव न भोक्तृत्वकोटौ प्रवेश इति वाच्यम्। देहेन्द्रियादीनां प्रत्येकं भोक्तृत्वापर्याप्तावपि विशिष्टात्मनि तत्पर्याप्तिः। अत एव सर्वेन्द्रियशरीरविशिष्टस्येश्वरस्य सर्वप्राणिगतसुखदुःखादिभोक्तृत्वेन जीवभावापत्तिरपरिहार्येति दिक्। यदपि—अन्याधीनदुःखादिस्वामित्वमेव दुःखादिकलुषितत्वं, जीवस्यापीश्वराधीनस्वामित्वोपगमात्। अत एवेन्द्रियप्रेरकाणां देवानां भगवद्दत्तं तत्तदवान्तरस्वामित्वमस्तीत्युक्तमिति, तदपि न मनोरमम्। स्वामित्वमात्रस्य भोक्तृत्वव्याप्तत्वेन महास्वामिनि त्वदभ्युपगतेश्वरे भोक्तृत्वापरिहारात्। इन्द्रियाधिष्ठात्रीणां देवतानामपि भोक्तृत्व एकस्मिञ्शरीरे नानाभोक्तृप्रसक्त्या "बहुवृकाकृष्टमृगन्यायेन" कदाचिच्छरीरस्योन्मथनापत्तेरिति।

व्या०—विजानन्ति देवा एव तद्विजानन्ति देवानां ह्येतद्भवति स्वामी हि फलमश्नुते नास्वामी कर्म कुर्वाणः " इति माध्यंदिनायनश्रुतेश्च । ततश्चैकैकेन्द्रियस्य बहवो देवाः स्वामिन इति तेषां तत्र स्वातन्त्र्यविज्ञानादितारतम्यानुसारेण फलतारतम्यं भवति । लोकेऽपि हि यस्याधिकं क्षेत्रे स्वातन्त्र्यं यस्य वापादिकर्मणि ज्ञानप्रयत्नाधिक्यं तस्य तत्फलमधिकं दृश्यते—इति प्राप्ते राद्धान्तः—अयजमानानामपि ऋत्विजां सत्रयागफलमिवास्वामिनामपि कर्तॄणां फलमुपपद्यते । ननु सत्रेष्वस्वामिनामपि ऋत्विजामगृहीतदक्षिणत्वेन कर्तृत्वाद्भाव्यं फलेनेतिचेत्तर्हि प्रजार्थमेव देवैर्ज्ञानकर्मणोः क्रियमाणत्वात्तासामपि भाव्यं फलेन । ननु यदि ज्ञानादिकं प्रजार्थं देवैः संपाद्यते, तर्हि कृत्स्नफलं प्रजानामेव स्यान्न किंचिद्देवानामिति चेद्यथा राज्ञा प्रजार्थमेव क्रियमाणस्यापि पालनस्य फलं प्रजापते राज्ञ एव मुख्यं प्रजानां तु तत्सहकारिमात्रत्वादल्पम्। यथा च गुरुणा शिष्यार्थमेव क्रियमाणस्यापि व्याख्यानस्य फलं गुरोरेव मुख्यं, शिष्याणां त्वल्पम्। तथा ज्ञानादिप्रवृत्तैर्देवैः प्रजार्थमेव क्रियमाणस्यापि ज्ञानादेः फलं देवानामेव मुख्यं प्रजानामल्पमित्युचितत्वात् । अल्पफलत्वादेव प्रजानामफलत्वश्रुतिः, अल्पधने निर्धनत्वव्यवहारदर्शनादिति " ।

अत्राधिकरणे यद्यपि सप्तान्नविद्योपासनाप्रतिभगवद्दत्तमिन्द्रियतत्फलेष्ववान्तरस्वामित्वमिन्द्रियप्रेरकाणां देवानामङ्गीकृतं, तथाऽपि लोके तत्तदिन्द्रियतत्तत्फलस्वामित्वेनाभिमतानां मनुष्यादीनां तत्र नास्ति स्वामित्वमिति स्पष्टमेव व्यवहृतम्। पूर्वपक्षे बहूनां देवानां स्वामित्वतारतम्यानुसारेण फलतारतम्यमुक्त्वाऽपि कर्तुः फलप्रतिषेधात् । सिद्धान्ते पूर्वपक्षाभिमतं कर्तुः सर्वदेवास्वामित्वमङ्गीकृत्यैव राजगुरुस्वामिकपालनव्याख्यानास्वामिनामपि प्रजाशिष्याणामिव ज्ञानकर्मास्वामिनां मनुष्यादीनामपि किंचित्फलमिति तेषां फलोपपादनाच्च । यद्यपि सत्रेषु यजमाना एव ऋत्विजः "ये यजमानास्त ऋत्विजः " इति तत्र यजमानानामृत्विक्कार्येऽपि विधानात् । तथाऽपि स्वमते यजमाना न भवन्तीत्येभिमानेन वा तथैव

टि०— १ अभिमानेनेति । अनेकत्र मीमांसोल्लङ्घनवदेतस्यापि तथात्वादिति भावः । अत्र कश्चित् " अयजमानत्वास्वामित्वोक्तिः स्वतन्त्रयजमानत्वस्वामित्वनिराकरणपरा । न हि सत्र ऋत्विजां सर्वथा यजमानभावानभिज्ञोऽस्मदाचार्यः। "ये यजमानास्ते ऋत्विजः" इति यजमानानामेव ऋत्विक्कार्ये विधानात् " इत्याह । तत्तु बालभाषितम् । स्वतन्त्रपरतन्त्रयजमानत्वस्वामित्वकल्पनाया निर्मूलत्वात् । न हि मीमांसायां स्वामित्वयजमानत्वयोर्गौणत्वमुख्यत्वे व्यवहृते येन तथोच्यतेति कृतं पल्लवितेन ।

व्या०—मीमांसकमर्यादेत्यभिमानेन वा तथोक्तम्। दृश्यते हि त्वेद्भाष्यानुव्याख्यानतत्त्वप्रकाशिकान्यायसुधासु मीमांसकमर्यादोल्लङ्घनेन व्यवहारस्तन्मतमित्यन्यथानुवादश्च । तथा हि—" द्वादशाहवदुभयविधं बादरायणः " (ब्र० सू० ४।४। १२) इति सूत्रे भाष्यम् "द्वादशाहः क्रत्वात्मकः सत्रात्मकश्च भवति" इति । " प्रदानवदेव हि तदुक्तं " ब्र० सू० ३ । ३ । ४४) इति सूत्रे श्रवणगुरुप्रदानयोः प्रधानेतिकर्तव्यतारूपयोर्गुरुप्रदानं प्रबलमित्युपपादनार्थं तत्त्वप्रकाशिका " न चेतिकर्तव्यतात्वेन दौर्बल्यं, याज्ञीयहिंसायामितिकर्तव्यताया एव प्राबल्यदर्शनात् " इति । " भूम्नः क्रतुवज्जायस्त्वं तथा हि दर्शयति " (ब्र० सू० ३ । ३ । ५९) इति सूत्रे " भूमैव देवः परमो ह्युपास्यः । नैवाभूमा फलमेषां विधत्ते । तस्माद्भूमा गुणतो वै विशिष्टो यथाक्रतः कर्ममध्ये विशिष्टः " इति भाष्योदाहृतश्रुत्यभिप्रायकथनार्थं तत्त्वप्रकाशिका " यथा खलु दीक्षणीयाप्रायणीयोदयनीयासवनत्रयावभृथात्मकस्य क्रतोः सर्वयागेष्वनुवर्तन एव साफल्यात् , अन्यथा वैफल्यात्, ज्यायस्त्वं, ततश्च सर्वैः कर्तव्यत्वं, तथा भूमत्वस्यापि सर्वत्राऽऽनन्दादिषु सहभावेनोपासन एवेष्टसिद्धिरिति " । " जिज्ञासा सूत्रे " (ब्र० सू० १।१।१।) च प्रथममसंहितयोङ्कारनिर्देशं सूत्रावयवभूतमङ्गीकृत्यासंहिताप्रयोजनमुत्तरसूत्रेष्वप्यनुगतिसूचनमिति व्युत्पादनार्थं न्यायसुधा " सर्वाणि सूत्राणि प्रत्येकमनेकवेदवाक्यविचारपरत्वादवान्तरा ब्रह्मविद्याः । ' स्रवत्यनोङ्कृतं ब्रह्म परस्ताच्च विशीर्यते ' इति श्रौतार्थवादसामर्थ्यात् । सर्वास्वपि ब्रह्मविद्यास्वाद्यन्तयोरोंकारस्योहः कर्तव्य इति गम्यते । न चोह्यमानं वाक्यात्पृथगिति शक्यते वक्तुम् । मन्त्रेष्वप्यूह्यमानस्य

टि०— १ त्वद्भाष्येति । यत्त्वत्र " जीवतः कवेराशयो वर्णनीयः " इति न्यायेन सांप्रदायिकार्थो हि ग्राह्यः । सांप्रदायिभिश्चावान्तरयजमानत्वाविरोधेनैवायजमानशब्दार्थस्य प्रदर्शितत्वात् । भाष्यादौ मीमांसकमर्यादोल्लङ्घनमित्युक्तेरज्ञानमात्रमूलत्वात् । भाष्यगतक्रतुशब्दो लक्षणयाऽहीनपरः । शास्त्रकाराणां तत्र तत्रैवं व्यवहारः दृश्यते हि । द्वादशाहस्य प्रशस्तकर्मत्वज्ञापनायाहीनपदं विहाय क्रतुशब्देन व्यवहार इत्यपि सुवचत्वाच्च " इति विजृम्भणम् । तदपि न क्षोदक्षमम् । यजमानद्वैविध्यस्य मीमांसाविरुद्धत्वस्योक्तत्वेनोक्तार्थस्यासांप्रदायिकत्वात् । क्रतुशब्दस्योभयसाधारणस्यैकमात्रपरत्वव्यवहारस्यायुक्तत्वात् । लक्षणया तच्छास्त्रे यत्र कुत्रचिव्द्यवहारेऽपि तद्बहिस्त्वदीयभाष्यादौ स्वायत्ते शब्दप्रयोगे तदनौचित्यात् । तत्तदसाधारणशब्दाप्रयोगस्यावाचकशब्दप्रयोगस्य च तच्छास्त्रापरिज्ञानमूलत्वात् । अहीनत्वव्यवहारेणासिद्धस्य प्राशस्त्यस्य क्रतुशब्देनासिद्धेः । अपि च शास्त्रकृतां विशेषवाचकशब्दस्य सामान्ये प्रयोगः सम्मतः, न तु सामान्यस्य विशेषे प्रयोगः । तस्य त्वद्भाष्यादावेव दर्शनादिति ।

व्या०—मन्त्रानवयवत्वप्रसङ्गात्" इति । "आनन्दमयाधिकरणे च (ब्र०सू० १। १ । १२) न्यायसुधा—" ज्योतिषां सोमो हि ज्योतिष्टोमः " इति ।

अत्र सर्वत्र मीमांसानुरोधिव्यवहारो न भवतीति तद्विदां सुविदितमेव। अहीनसत्ररूपेण ह्युभयाविधो द्वादशाहः, न तु क्रतुसत्ररूपेण। क्रतुत्वस्योभयसाधारणत्वात्। याज्ञीयहिंसायामितिकर्तव्यताप्राबल्यं दृष्टमित्यत्यन्तमेव निरालम्बनम् । दीक्षणीयादिसकलाङ्गसहितः क्रतुः सर्वयागेष्वनुवर्तत इत्यपूर्वो व्यवहारः।दीक्षणीयादिज्योतिष्टोमेतिकर्तव्यताकलाप एव हि तद्विकृतिभूतेषु विश्वजिदादिष्वतिदिश्यते, न ज्योतिष्टोमक्रतुरपि, न वा सर्वयागेषु । न चेतिकर्तव्यताकलापः क्रतुरिति व्यवह्रियते।न च ज्योतिष्टोमेतिकर्तव्यताकलापस्य तद्विकृतिष्वतिदेशेन किमपि ज्यायस्त्वं, ऐष्टिकेतिकर्तव्यताकलापस्यापि तत्तद्विकृतिष्वतिदेशेन साम्यात् । न चानतिदेशात्स्वप्रधानाज्ज्यायस्त्वं विवक्षितं, विरोधात् । नह्यमात्यादीनपि सेवमानो भटवर्गस्तानसेवमानाद्राज्ञो भवति ज्यायान्।नाप्यर्थलोपादिनाऽनतिदेश्यादङ्गान्तराज्ज्या-

टि०— १ निरालम्बनमिति । अत्राऽऽह । तत्र प्राबल्योक्तिरङ्गवैकल्येऽपि प्रधानभूतनित्याद्यनुष्ठाने फलसिद्धिदर्शनेन गुरुप्रदानस्य पशुनियोजनादेश्च वैकल्येऽपि श्रवणफलं पशुयागफलं च स्यादित्याशङ्कानिराकरणाय प्रधानवदेवाङ्गमप्यवश्यानुष्ठेयमित्येवंपरा " इति । तदपि महाप्रवाहनीयमानस्य मुग्धस्य तत्रत्यकाशावलम्बनमिव, इतिकर्तव्यतायाः प्राबल्यदर्शनादित्यनेनावश्यमनुष्ठेयमित्यर्थास्फूर्तेः । प्रत्युत मीमांसाविरुद्धार्थस्यैव झटिति स्फुरणात् । अङ्गवैकल्येन नित्यकर्मणि प्रत्यवायाभावेऽपि काम्ये कर्मणि फलासिद्धेश्च । प्रधानभूतनित्याद्यनुष्ठाने फलसिद्धिदर्शनेनेत्युक्तिरपि मीमांसाविरुद्धा । तत्र नित्यस्य फलानभ्युपगमात्। एतेन"भूम्नः क्रतुवज्ज्यायस्त्वम् " (ब्र० सू० ३।३।६९) इत्यधिकरणेऽपि न मीमांसामर्यादोल्लङ्घनम्। तत्र ज्योतिष्टोमेतिकर्तव्यताभूतदीक्षणीयाद्यङ्गकलापस्यैव विशिष्टक्रतुशब्देन विवक्षितत्वात् । सर्वयागशब्दस्यापि ज्योतिष्टोमविकृतिभूतविश्वजिदादिसर्वयागपरत्वात्तत्तद्विकृतियागसाद्गुण्यापादकत्वेन तस्य ज्यायस्त्वमिति युक्त्युपपत्तेश्च । तावताऽपि विकृतीनां प्राधान्यप्रयुक्तज्यायस्त्वानपायात् । न च क्रतोरिति न वक्तव्यम्, ऐष्टिकादीतिकर्तव्यताकलापस्यापि तत्तद्विकृतिष्वतिदेशादिति युक्तम्। तेन लक्षणया तस्यापि ग्रहणसंभवात् " इति परास्तम् । मीमांसाशास्त्रभिन्नत्वदीयभाष्यादिषु प्रयुक्तशब्दस्य मीमांसापेक्षितार्थबोधकत्वकल्पनस्य मीमांसाशास्त्राज्ञानसूचकत्वात् । इतिकर्तव्यताकलापे क्रतुशब्दस्य शास्त्रज्ञाप्रयुक्तेः । इष्टिसूक्तकलापाननुवर्तनात् । सर्वयागशब्दस्य ज्योतिष्टोमविकारपरत्वे लक्षणापत्तेः । प्रकृतिधर्मातिदेशेन विकृतेर्ज्यायस्त्वस्य कस्याप्यसंभवाच्च । यदपि " ऊहशब्दो न नावमिकोहपरः, किंत्वध्याहारमात्रपरः " इति । तदपि हेयमेव । पूर्वोत्तरयोरश्रुतस्यापेक्षितार्थबोधकस्य पदस्य संबन्धो ह्यध्याहारः । पूर्वश्रुतस्य तु संबन्धोऽनुषङ्गः । तमनुक्त्वा मीमांसकोक्तोहस्यैवोक्तत्वेन प्रकृते तस्यासंभवेनासङ्गतेः । अधिकं तु मूलत एवावगन्तव्यमिति कृतं मृतमारणेनेति दिक् ।

व्या०–यस्त्वं, दीक्षणीयादेरपि त्रैधातवीयप्रत्याम्नानादिनाऽश्वमेधादिष्वनातिदेशात्। न चोंकारस्योत्तरसूत्रेष्वनुगतिरूहः, देवस्य त्वेत्यादिमन्त्रेषु सूर्यादिशब्देऽग्निशब्दादेरिव कस्यचित्स्थानिनः शब्दस्याभावात्। न च ज्योतिषां स्तोम इति ज्योतिष्टोमनामानिर्वचनं, किं तर्हि "त्रिवृत्पञ्चदशः सप्तदश एकविंश एतानि वा ज्योतींषि य एतस्य स्तोमाः" इति वाक्यशेषदर्शितं ज्योतिर्नामकाः स्तोमा यस्येति तन्निर्वचनं मीमांसकसंमतम्। नचैवमुदाहृतेष्वन्यथालिखितस्थलेषु क्रत्वादिशब्दानामहीनत्वादिलक्षकत्वेन प्रसिद्धमीमांसानुसारित्वसमर्थनं युक्तं; तत्तच्छास्त्रानुरोधिनां क्वाचित्के खल्वन्यथाभावे प्रतीयमाने तथा समर्थनं क्रियते। इह तु त्वद्भाष्यकारटीकाकाराभ्यां यावन्मीमांसागन्धि लिखितं तत्सर्वमन्यथाभूतमिति कथं तथा समर्थनं क्रियते। एवं तावन्मीमांसकमर्यादोल्लङ्घनेन व्यवहार उदाहृतः। तन्मतमित्यन्यथानुवादो यथा–"अङ्गीकृतत्वादपि तैः पदार्थानां पृथक् पृथक्। क्रियापदेनान्वयस्य वाक्यभेदो न दूषणम्" इति। "सत्यज्ञानादिवाक्येषु ब्रह्मानुवादेन सत्यताद्यनेकविधाने वाक्यभेदः स्यादिति शङ्कां "पृथगेव च वाक्यत्वं पृथगन्वयतो भवेत्। अवान्तरत्वाद्वाक्यानां वाक्यभेदो न दूषणम्" इत्यभ्युपगमेन परिहृत्य मीमांसकमतेऽपीदं समानमित्यनेन श्लोकेनोच्यत इति न्यायसुधायां व्याख्यातम्, तैर्मीमांसकैरपि "अरुणयैकहायन्या पिङ्गाक्ष्या गवा सोमं क्रीणाति" इत्यादावरुणादिपदानां क्रियापदेन पृथक् पृथगन्वयस्याङ्गीकृतत्वात्तेषामपि हि वाक्यभेददूषणं प्रसज्येत। तत्रैतावदेव वक्तव्यं, महावाक्यभेद एव दूषणं नत्ववान्तरवाक्यभेद इति। तच्चास्माकमपि समानम्" इति। न च प्रसिद्धमीमांसकमते तत्रावान्तरवाक्यभेदोऽस्ति, क्रयभावनाविधेयत्वेन "अप्राप्ते तु विधीयेरन्बहवोऽप्येकयत्नतः" इत्युक्तरीत्याऽऽरुण्यादिविशिष्टक्रयभावनादिरूपक्रियैक्येन पदैक्यवाक्यताया एव स्वीकृतत्वात्। एवमन्यत्रापि द्रष्टव्यम्। विस्तरभयादुपरम्यते। एवं च सत्रऋत्विग्दृष्टान्तकरणात्कर्तॄणामपि ज्ञानकर्मस्वामित्वमभिमतमिति न भ्रमितव्यम्। स्यादेत्–यदि जीवस्य दुःखादिस्वामित्वं न स्यात्, तदा तस्य दुःखाद्याश्रयत्वस्याप्यभावादहं दुःखीत्यादिप्रत्ययानामध्यासात्मकत्वमङ्गीकर्तव्यं स्यात्, न चैतदङ्गीकर्तुं युक्तम्। "मिथ्यात्वमपि बन्धस्य न प्रत्यक्षविरोधतः। मिथ्यात्वं यदि दुःखादेस्तद्वाक्यव्यग्रतो भवेत्। मिथ्यायाः साधकत्वं च न सिद्धं प्रतिवादिनः।" इत्याद्यनुव्याख्याने "बन्धमिथ्यात्वस्य प्रत्यक्षविरोधेन, यदि श्रुतिवाक्याद्बन्धस्य मिथ्यात्वं तदा तस्यापि वाक्यस्य तत एव मिथ्यात्वं भवेत्।

व्या०–वाक्यस्य सर्वमिथ्यात्वबोधकत्वात् । ततश्च तस्य मिथ्यात्वसाधकत्वं न स्यात् । मिथ्याभूतस्य साधकतायाः प्रतिवाद्यसंमतत्वात् ” इति युक्त्या च निराकृतत्वात् । अनुव्याख्यान एव सुखादिग्राहकसाक्षिणो निर्दोषत्वादिना याथार्थ्यनियमस्य प्रतिपादितत्वाच्च । अस्मिन्नपि ग्रन्थे पूर्वपक्षनिराकरणोपयोगितया तस्यार्थस्य “ साक्षी जीवः सुखादीन्यनिशमनुभवन्सर्वमानाधिकस्ते ” (श्लो० ६) इत्यनूदितत्वाच्च । तस्मादहं दुःखीत्याद्यनुभवनिर्वाहाय जीवस्य दुःखादिस्वामित्वमस्तीत्येव मन्मतम् । किंतु तत्स्वामित्वमीश्वरदत्तमपकृष्टमित्येव विशेषः । अत एव ‘सांख्याधिकरणा(ब्र० सू० २।२।२)नुव्याख्याने ‘ द्वैविध्येऽपि तु कामादेः कुतः स्वामित्वमात्मनः । साक्षादनुभवारूढं शक्यतेऽपोदितुं क्वचित् ’ इति कामादौ स्वामित्वस्याप्रत्याख्येयत्वमुक्त्वा तदनन्तरश्लोके तस्यापकृष्टत्वमप्युक्तम् । न्यायसुधायां चात्यन्तवश्यत्वरहितगवादिस्वामित्वदृष्टान्तेन तस्यापकर्षः समर्थितः । तस्मादीश्वरस्यैव दुःखादिस्वामित्वं न जीवस्येत्युक्तं युक्तमिति चेदुच्यते । त्वन्मतेऽपि दुःखित्वाद्यनुभवोऽध्यासरूप एव । उक्तं च “ आनन्दमयाधिकरणे ” (ब्र० सू० १ । १ । १२) त्वद्भाष्ये ‘ प्रमादात्मकत्वाद्बन्धस्य विमुक्तत्वं च युज्यते । मुक्तिर्हित्वाऽन्यथारूपं स्वरूपेण व्यवस्थितिः ” इति भागवत इति हि । तत्त्वप्रकाशिकायां च “ विमुक्तश्च विमुच्यत ” इति संसारिणोऽपि विमुक्तत्वश्रवणात्तदन्यथानुपपत्त्या तस्य परब्रह्मत्वसिद्धेस्तद्विरोधो भेदव्यपदेशस्येति शङ्का-

---

टि०– १ अपोदितुमिति । अयमसाधुः प्रयोग इति पूर्वमेव प्रदर्शितम् ।

२ अध्यासरूप एवेति । कथमन्यथाऽन्तःकरणधर्माणां दुःखादीनामात्मन्यन्तःकरणाध्यासासिद्धौ तत्र प्रतीतिः स्यात् । प्रमादात्मकत्वादित्यादिभागवतवाक्येन तस्याध्यासरूपत्वसिद्धेश्चेति तात्पर्यम् । ननूक्तं “ अस्मन्मते दुःखादीनामात्मीयत्वेन नाध्यासत्वं, अन्तःकरणपरिणामभूतानामपि तेषामात्मधर्मत्वस्यानपायात् । इयांस्तु विशेषः, दुःखादयो धर्माः स्वातन्त्र्यगर्भात्मसंबन्धित्वेन संबद्धाः ” इति । तद्गर्भस्रावेणैव गतम् । अन्यधर्मस्यान्यत्र स्वातन्त्र्येण प्रसृतावीश्वरस्यैव सर्वस्वातन्त्र्येण सर्वदुःखभोक्तृत्वं स्यात् । न चाविद्यावत एवोक्तधर्मसंबन्ध इति वाच्यम् । अविद्यानिवृत्तौ तन्निवृत्त्यवश्यंभावेन स्वातन्त्र्योक्तेराकिंचित्करत्वात् । न चानादिभावस्य निवृत्तिर्न युक्तेति वाच्यम् । त्वन्मतेऽपि तथाऽभ्युपगमेनादोषात् । अन्यथाऽविद्यावृतानन्दस्याभिव्यक्त्यभावेन मुक्त्यनुपपत्तेः । न च त्वया दृष्टान्तानुसारेणाविद्यानिवृत्तिरभ्युपगम्यते मया तु शास्त्रानुसारेणेति प्रलपितव्यम् । मयाऽपि “ तमेव विदित्वाऽतिमृत्युमेति ” (श्वे० ६।१५) इति शास्त्रानुसारेणैवाविद्यानिवृत्त्यभ्युपगमेन तथोक्तेर्बालभाषितत्वात् । दृष्टान्तः परं सुखावबोधार्थमभ्युच्चयमात्र इति ।

व्या०–निराकरणार्थत्वेनोदाहृतं भाष्यग्रन्थमवतार्य तस्यार्थो वर्णितः। जीवस्य परत्रत्वाभावेऽपि विमुक्तत्वोक्तिर्युज्यते। बन्धस्याज्ञानमूलत्वेनास्वाभाविकत्वात्” इति। यत्त्वनुव्याख्याने बन्धस्याध्यासात्मकत्वनिरसनं, तस्याभिप्रायस्तु तद्व्याख्यानानन्तरं न्यायसुधायाम्–“अत्र तत्त्वविदो वदन्ति–सर्वो हि बन्धो बुद्धीन्द्रियशरीरविषयतद्धर्मलक्षणोऽस्माभिरप्यात्मन्यारोपित एवेत्यङ्गी क्रियते। यथोक्तं भाष्यकृता–“प्रमादात्मकत्वाद्बन्धस्य” इति। अतः किंनिबन्धनो बन्धमिथ्यात्वनिरासनिर्बन्ध इत्याशङ्कां कृत्वा सत्यं तथाऽप्यस्त्यत्र दर्शनभेद इति तत्परिहारमारभ्य बुद्धीन्द्रियशरीरविषयाः स्वरूपेण सन्त एवेश्वरपरवशा अनाद्यविद्यावशादात्मयितयाऽध्यस्यन्ते। तांश्चाऽऽत्मनो विभक्तानपि विस्पष्टं तथाऽनुपलभमानस्तद्धर्मान्दुःखादीन्सत्यानेवाऽऽत्मीयत्वेनापश्यंस्तत्कृते नीचोच्चत्वलक्षणे विकृती सत्य एव प्रतिपद्यते” इत्यादिवाक्यैः स्वमतस्थितिप्रतिपादनेन “मायावादिनस्तु दुःखादिकं स्वरूपेणापि मिथ्येति मन्यन्ते” अतस्तन्निराकरणे निर्बन्धो युक्त एवेत्येतत्परिभावयितुं बन्धमिथ्यात्वमिति संमुग्धे प्रस्तुते दुःखादेरिति निष्कृष्योक्तम्” इत्यद्वैतमते निर्वार्यार्थांशनिष्कर्षेण स्पष्टीकृतः। यत्तु साक्षिणो याथार्थ्यनियमात्र साक्षिरूपस्य दुःखित्वाद्यनुभवस्याध्यासत्वं संभवतीति, तदयुक्तम्। परमेश्वरतन्त्रस्य जीवस्य स्वातन्त्र्यग्रहणे प्रमाणाप्रमाणज्ञानयोरप्रामाण्यप्रामाण्यग्रहणे च तस्य याथार्थ्यपरित्यागात्। यदि तु “मानसे दर्शने दोषाः स्युर्न वै साक्षिदर्शने” इति। “यत्किंचिद्व्यभिचारि स्याद्दर्शनं मानसं हि तत्” इति चानुव्याख्यानदर्शनात्स्वातन्त्र्यग्रहणं मनोवृत्तिरूपं, न तु साक्ष्यनुभवरूपमितीष्यते, तदा दुःखित्वाद्यनुभवोऽपि त्वत्सिद्धान्तासिद्धाध्यासत्वनिर्वाहाय मनोवृत्तिरूप एव त्वयेष्टव्यः स्यात्। यदि चैवं सति दुःखाद्यंशेऽपि मनोवृत्तिविषयतैव स्याद् दुःखित्वाद्यनुभवव्यतिरेकेण दुःखादिमात्रविषयानुभवाभावात्। ततश्च दुःखादेस्त्वदभिमतं साक्षिविषयत्वं न सिध्येदित्यनुशयः, तदा दुःखित्वाद्यनुभवरूपसाक्षिण आत्मीयत्वांशेऽध्यासरूपत्वमकामेनापि त्वयेष्टव्यम्। त्वयाऽपि हि सर्वेषां साक्ष्यनुभवस्य याथार्थ्यनियमो नेष्यते। असुराणां साक्षिणो याथार्थ्याभावस्य मनुष्याणां साक्षिणो मिश्रत्वस्य चाङ्गीकृतत्वात्। तस्मात्त्वन्मते दुःखादीनामन्तःकरणपरिणामतया जीवस्य दुःखाद्याश्रयत्वाभावेन “ज्योतिराद्यधिष्ठानं तु तदामननात्”(ब्र० सू० २। ४। १५) “स्वामिनः फलश्रुतेरित्यात्रेयः”(ब्र० सू० ३। ४। ४४) इत्यधिकरणयोस्तस्येन्द्रियतत्फलस्वामित्वस्य प्रतिषिद्धतया दुःखादिस्वामित्वाभावेन चाहं दुःखीत्यादिप्रत्ययानां कथंचिदपि

स्वामित्वे न स्पृशन्तीत्यपि न तव मते तत्परस्यैव हीदं
तस्मात्तस्याखिलान्तःकरणगणपतेर्जीवतैवार्थनीया ॥ २५ ॥

व्या०—याथार्थ्यासंभवात् । त्वद्भाष्यटीकयोर्बन्धस्याध्यासात्मकत्वप्रतिपादनात् । स्वपरसिद्धान्तविशेषाविष्करणपरन्यायसुधाग्रन्थे "मम शरीरं, म इन्द्रियाणि, मम मनोऽहं दुःखीत्यादिप्रत्ययानां शरीरेन्द्रियदुःखादिषु भासमान आत्मीयांश एवाऽऽरोपितविषयता, न तु शरीरादिस्वरूपेऽपि " इति स्वमतनिष्कर्षात् । साक्षिणो याथार्थ्यनियमाभावाच्च । त्वत्सिद्धान्ते तेषां सुनिश्चितेऽध्यासरूपत्वे यदन्यत्र प्रपञ्चमिथ्यात्वनिराकरणप्रस्तावे " सत्यत्वं गगनादेश्च साक्षिप्रत्यक्षसाधितम् । साक्षिसिद्धस्य न क्वापि बाध्यत्वं तददोषतः " इत्यादि साक्षिणो याथार्थ्यनियमकथनम् । यच्च सांख्यमतदूषणप्रस्ताव आत्मनः कामादिस्वामित्वकथनं, न तत्र त्वयाऽभिनिवेष्टव्यं किंतु परमतदूषणलोभेन तद्दुराग्रहकृतमौढ्येन वा स्वसिद्धान्तविरुद्धभाषिणः स्वीया इत्येव शोचनीयाः । याननुसृत्याद्यतना अपि त्वदीयाः परमतसिद्धाविद्यादूषणादिप्रस्तावेष्वनादिभावस्य निवर्त्यत्वं न युक्तमित्यादि स्वसिद्धान्तविरुद्धमेव जल्पन्ति । त्वन्मतेऽपि ह्यनादिभावरूपैवाविद्या ज्ञाननिवर्त्या च । तस्माज्जीवे दुःखित्वादिप्रत्ययानां त्वन्मतेऽप्यध्यासरूपत्वात्स्वस्वान्तःकरणगतदुःखादिस्वामित्वाद्यध्यासमात्रदुष्टाज्जीवभावाद्वास्तवसकलदुःखिकलजीवान्तःकरणगतनिखिलदुःखादिस्वामित्वानुभवनिरन्तराकलितस्त्वन्मतसिद्धपरमेश्वरभाव एव पापीयानिति कथं त्वदीयः परमेश्वरो जीवभावं नार्थयेत । अतो न तस्य जीवभावाननुमतिशङ्कावकाश इति भावः ॥ २५ ॥

टि०— १ विरुद्धभाषिण इति । अत्र कश्चिदाह—त्वदीयानामेवात्यन्तविरुद्धभाषित्वम् । तथा हि—" आत्मैकत्वविद्याप्रतिपत्तये " इति भाष्यकारेण प्रत्यग्ब्रह्मैक्यं विषय इत्युक्तं, भामत्यां च ब्रह्मण एव शास्त्रविषयत्वमुक्तमिति विरोधः । एवं भाष्यकारेणैव समन्वयाधिकरणे वेदान्तेषु विधिं निराकृत्य सहकार्यन्तरविधिरिति सूत्रे विधिरङ्गीकृतः । एवमन्याऽपि " इति । तदपि मन्दम् । भामतीस्थब्रह्मशब्दस्य प्रत्यग्ब्रह्मैक्यपरत्वात् । न हि भामतीकृन्मते जीवब्रह्मणोर्भेदोऽस्ति, येन तन्मतं भाष्यविरुद्धं भवेत् । ज्ञाने विधिर्निराकृता, स्वीकृता च श्रवणरूपक्रियायामिति न भाष्येऽपि पूर्वापरविरोधः । उक्तं च वार्तिके " श्रवणादिक्रिया तावत्कर्तव्येह प्रयत्नतः " (बृ० वा० २ । ४ । २१८) इति । तस्मात्त्वन्मतरीत्या सर्वदुःखस्वामिनो जगदीशितुर्जीवभावाभ्युपगमे न कोऽपि प्रत्यवाय इति दिक् ॥२५॥

दुःखित्वाद्येव हेयं न यदि कथय तत्किं नु बन्धेषु हेयं
नीचत्वं तत्प्रयुक्तं यदि तदिदमिति व्याकुरुष्व स्फुटोक्त्या ।
यच्चाऽऽक्रन्दादि दुःखाद्युतितनयहृतं नापि सार्वत्रिकं त-
द्यत्किंचित्तस्य कार्यं यदि तदिह जगद्व्यापृते नित्यसिद्धम् ॥२६॥

व्या०—स्यादेतत् । दुःखस्वामित्वादिरूपदुःखित्वादिकं न हेयं, येन परमेश्वरस्यापि हेयसंबन्धः स्यात् । किंतु दुःखित्वादिप्रयुक्तनीचत्वम् । न च तत्परमेश्वरेऽस्तीत्याशङ्कामुद्भाव्य परिहरति—दुःखित्वादीति । यदि "तत्रापि च तद्व्यापारादविरोधः" (ब्र० सू० ३।१।१६) इत्यधिकरणे त्वद्भाष्योदाहृतं " नरकेऽपि वसन्नीशो नासौ दुःखभुगुच्यते । नीचोच्चताभिर्दुःखादेर्भोग इत्यनुमीयते । नासौ नीचोच्चतां याति पश्यत्येव सदा प्रभुः " इति वचनमालम्ब्य दुःखादिप्रयुक्तं नीचत्वमेव दुःखादिभोक्तृत्वं हेयमित्युच्यते । तर्हि किं तन्नीचत्वमिति प्रश्ने विवरणीयं त्वया । दुःखहेतुकमाक्रन्दादिकमिति चेत्तदपि दुःखादिषु दर्शितेनैव न्यायेन निरस्तम् । तदपि हि शरीरेन्द्रियविकाररूपत्वादाश्रयाश्रयिभावेन जीवं न स्पृशतीति । किंच न तत्सार्वत्रिकं, लोके हि मानी धीरोदात्तस्तापसादिश्च महति दुःखेऽपि नाऽऽक्रन्दन्ति, न रोदिति, न चान्यं कमपि देहेन्द्रियविकारमापद्यते । न वा तदपनयनार्थमितरप्रार्थनादैन्यमवलम्बत इति तस्य तद्दुःखं हेयं न स्यात् । कापालिकादिश्च भिक्षुकः स्वाङ्गच्छेदककण्टककर्दमतप्तवालुकाशयनादिभिर्महद्दुःखमनुभवन्नपि न तत्प्रयुक्तं नैच्यमनुभवति, किंतु याचनाप्रयुक्तमिति तस्यापि तद्दुःखं हेयं न स्यात् । अथोच्येत—' नायमसार्वत्रिकदोषो भवति, यावत्किंचिद्दुःखादिकार्यं तत्सर्वं नैच्यमित्यङ्गीकारात् । धीरादीनामपि दुःखानुभवप्रसक्तविकारविरोधप्रयत्नतदपनोदनोपायाचिन्तनादियत्किंचित्कार्यमस्ति ' इति । नैतदपि युक्तम् । परमेश्वरेऽपि नानाविधजगद्व्यापारस्य दुःखादिप्रयुक्ततया कल्प-

---

टि०— १ परमेश्वर इति—सुखकार्यस्य सृष्ट्यादेरिव दुःखस्वामित्वरूपदुःखभोक्तृत्वप्रयुक्तकार्यस्यापि तस्मिन्नपरिहार्यत्वादिति भावः । अत्र " को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यात् " (तै० उ० २ । ७.) इति श्रुत्या जगद्व्यापारस्य सुखोद्रेकप्रयुक्तत्वसिद्धावपि दुःखोद्रेकप्रयुक्तत्वे मानाभावः " इति कस्यचिच्चोद्यानवकाशः । " राज्यनाशो वने वासः सीता नष्टा द्विजो हतः । ईदृशीयं ममालक्ष्मीर्निर्दहेदपि पावकम् " (वा० रा० ३। ६७।२४) " न मद्विधो दुष्कृतकर्मकारी " (वा० रा०) इत्यादिवचनेन जगद्व्यापारान्तर्गतस्याऽऽक्रन्दादेर्दुःखोद्रेकप्रयुक्तत्वावगमेन प्रमाणाभाववचन-

एवं सुखित्वकृतमेव हि नर्तनादि ग्राह्यं फलं तव भवेन्न सुखित्वमेव ।
अस्थिरयुशान्तमनुभूतिमुपाक्षिपन्तं
लोकाः पिशाच इति निश्चिनुयुर्भवन्तम् ॥ २७ ॥

व्या०—यितुं शक्यत्वेन तत्र नैच्याभावासिद्धिप्रसङ्गात्। त्वया हि "आनन्दमयाधिकरणे"(ब्र० सू० १।१।१२) "लोके चतुर्विधा पुंसां प्रवृत्तिः—सुखार्था, दुःखनिवृत्त्यर्था, सुखोद्रेकप्रयुक्ता, दुःखोद्रेकप्रयुक्ता चेति। तत्र प्रवृत्तित्रयस्यापि परमेश्वरेऽनुपपन्नत्वात्सुखोद्रेकप्रयुक्तैव लौकिकानां नृत्तादाविव तस्य जगत्सृष्ट्यादौ प्रवृत्तिरिति निरूपितमिति। तत्तदा शोभते, यदि तस्य दुःखित्वं न स्यात्। तत्सत्त्वे तु केचन जगद्व्यापारा दुःखोद्रेकप्रयुक्ताः कुतो न स्युः। तथात्वे पुनरपि दुःखोद्रेकहेतुं जगद्व्यापारं न कुर्यादिति चेद् भ्रान्तोऽसि। न हि दुःखोद्रेकाद्रोदनादौ प्रवृत्तिरभिसंधिपूर्विका तन्निवृत्त्यर्था। प्रत्युत शिरोक्षिरोगादिदुःखोद्रेकात्पुनरपि तदुद्रेकहेतव एवाऽऽक्रन्दाशिरस्ताडनाश्रुविमोचनादिप्रवृत्तयो दृश्यन्ते। परमेश्वरस्य दुःखित्वादेः श्रुतिविरुद्धत्वात्तद्व्यापाराणां तत्प्रयुक्तता कल्पयितुं न शक्यत इति परिशेषासिद्धिरिति चेत्सत्यम्। तस्य दुःखित्वादिकं श्रुतिविरुद्धमिति। तथाऽपि त्वन्मतपर्यालोचनया तस्य दुःखादिस्वामित्वरूपं तदापतितमिति पूर्वोक्तं त्वमेव परिभावय। तथाऽपि तत्र दुःखित्वरूपं कार्यं न भवतीति चेन्न। तत्र सुखित्वप्रयुक्तकार्याभ्युपगमे तद्वदेव दुःखित्वसत्त्वे तत्प्रयुक्तकार्यस्यापि दुर्वारत्वात्। यदि तु "आहूतस्याभिषेकाय विसृष्टस्य वनाय च। न मया लक्षितस्तस्य स्वल्पोऽप्याकारविप्लवः" (वा० रा०) इत्यादौ धीरोदात्तमहापुरुषगुणत्वे प्रसिद्धामवहित्थां तत्राभ्युपैषि, तर्हि तथा सुखोद्रेकप्रयुक्तमपि कार्यं तत्र न स्यादेव। न चेत्तदितरदपि केन वा वार्यते। किंच दुःखकार्यमात्रस्य हेयत्वोक्तिरयुक्ता। दुःखकार्यस्यापि भगवद्भजनादेः पुरुषार्थताया दृष्टत्वात्। "चतुर्विधा भजन्ते माम्" (गी० ७।१६) इत्यादिशास्त्रसंमतत्वाच्च। तस्माद्दुःखकार्यमाक्रन्दादिमात्रमेव हेयतया वक्तव्यमिति तस्यासार्वत्रिकत्वदोषो युक्त एवेति भावः ॥ २६ ॥

एवं दुःखित्वस्य कार्यमेव हेयं, न दुःखित्वमिति परोक्तमनुसृत्येदमुक्तम्। इदानीं वस्तुतो दुःखित्वमेव हेयं न तत्कार्यमित्यभ्युपपादयति—एवमिति। दुःखकार्यमेव हेयं न दुःखित्वमित्यङ्गीकारे न्यायतौल्यात्सुखकार्यमेवोपादेयं न सुखमिति त्वयाऽङ्गी-

टि०—स्य निर्मूलत्वात्। किंचाऽऽक्रन्दनरूपस्यैव दुःखप्रयुक्तनीचत्वस्य संभवेऽप्रसिद्धवृद्ध्यादिरूपेण तन्निर्वचनस्यानुचितत्वात्। तस्मादीश्वरस्य जीवभावो न हेय इति युक्तमुत्पश्यामः॥२६॥

विष्णौ विश्वातिशायिन्यनवधिगुणके जीववर्गाद्विभिन्ने
सर्वश्रुत्यैकमत्यं समरसबलवल्लिङ्गसंगत्युपेयम् ।

व्या०—कर्तव्यं स्यात् । "नन्वस्त्वेवमेव, एवं सति परमेश्वरः शक्तिमत्त्वेऽपि दुःखित्वप्रयुक्तमेव कार्यं नानुरुन्धे । हेयत्वात् । किंतु सुखित्वप्रयुक्तं पुरुषार्थत्वादित्युपपादनं संभवति । " को ह्येवान्यात्कः प्राण्याद्यदेष आकाश आनन्दो न स्यात् " (तै० उ० २ । ७) 'यदा वै सुखं लभतेऽथ करोति नासुखं लब्ध्वा करोति सुखमेव लब्ध्वा करोति " (छा० ७।२२।१) इत्यादिश्रुत्योः प्राणयितृत्वादिरूपः सर्वोऽपि परमेश्वरव्यापारः सुखोद्रेकप्रयुक्त इत्येतत्परतया मदीयग्रन्थे व्याख्यानमपि संगच्छते " इति यद्याशङ्क्येथास्तदा सकलानुभवमर्यादाविरोधस्तावद्निवार्यः । सुखदुःखे हि निरुपाधीच्छाद्वेषविषयतया पुरुषार्थापुरुषार्थरूपे सकलानुभवसिद्धे, न तु तत्कार्ये । एवमनुभवविरोधमप्यविगणय्य सुखदुःखकार्ययोरेव पुरुषार्थापुरुषार्थत्वमभ्युपगम्यते । त्वदभ्युपगमानुसारेण त्वदीयसुखादेः पुरुषार्थपर्यवसायितानिर्वाहाय सुखानुभवकालेषु सर्वेषु यत्किंचिन्नृत्तगीतादिकार्यमारभमाणेनैव त्वया स्थातव्यं स्यात् । तथा च लोकास्त्वां पिशाच इत्येव मन्येरन् । पिशाचजातिर्हि यत्किंचित्संतोषलाभे विकटं नृत्यति गायति चेति प्रसिद्धिः । अतस्तान्त्रिकेण त्वया लोकशास्त्रमर्यादामनुसृत्य सुखदुःखयोरेव पुरुषार्थापुरुषार्थत्वरूपत्वमङ्गीकर्तव्यमिति: त्वन्मत ईश्वरो नितान्तहेयसंबन्धाकुलीभूतस्ततो वरमल्पदुःखाध्यासमात्रकलुषितो जीवभाव इति मत्वा पूर्णापूर्णगुणविरोधमचिन्त्याद्भुतया निजशक्त्याऽभिभूय जीवभावमापद्यतैवेति न पूर्णगुणवाचिना ब्रह्मशब्देन जीवाद्भेदसिद्धिरिति भावः ॥ २७ ॥

ननु ब्रह्मशब्देनैव ब्रह्मणो जीवाद्भेदं प्रसाध्य सिद्धान्त इह न क्रियते, किंतु निखिलकल्याणगुणाकरे जीववर्गाद्भिन्ने विश्वातिशायिनि भगवति सर्वासां श्रुतीनामैककण्ठ्यं बलवद्भिः परस्परसंवादरूपसामरस्यशालिभिस्तात्पर्यलिङ्गैरवगम्य तत्तत्तात्पर्यलिङ्गप्रदर्शनेन प्रसाध्य तासामद्वैतेऽत्यन्तवैरस्यं च तत्तन्न्यायैरुपपाद्य सिद्धान्तः क्रियते । ब्रह्मशब्दस्त्वभ्युच्चयमात्रमतो न पूर्वोक्तदोषावकाश इत्याशङ्क्याऽऽह—विष्णाविति । त्वन्मते प्राधान्येन जीवब्रह्मभेदसाधनं

टि०— १ पिशाच इति । लोकमर्यादाननुसरणे यत्किंचित्संतोषेण पिशाचवदतीव नर्तनगानादिकं तव स्यादिति भावः ॥ २७ ॥

अद्वैते च श्रुतीनामधिकविरसतामत्र संसाध्य कुर्याः
सिद्धान्तं चेत्किमस्त्वेत्फलमुपरि तयोः साधकस्ते नयौघः ॥२८॥

व्या०—'पृथगुपदेशात् ' (ब्र०सू० २।३।२८) इत्यधिकरणकृत्यम् । अप्राधान्येन तत्साधनं च किंचित्किंचित् भेदवाक्यमवलम्ब्य तत्र तत्रास्ति । तथा च यद्यत्र सकलाद्वैतश्रुतिप्राबल्यदौर्बल्यचिन्तया सर्वप्रकारेणापि तत्साधनमिहैव क्रियेत, तदा तदधिकरणमन्यत्र तत्र तत्र तत्साधनं च निष्फलं स्यात् । तस्माद-स्मिन्नधिकरणे ब्रह्मशब्देनैव सिद्धान्त इति त्वयाऽङ्गीकरणीयम । अत एवाऽऽ-नन्दमयाधिकरणे—' भेदव्यपदेशाच्च ' (ब्र० सू० १।१।१७) इति सूत्रस्य पौनरुक्तिशङ्कानिराकरणार्थं " न जीवभेदसूत्राणां शङ्क्याऽत्र पुनरुक्तता । वाक्यान्तरद्योतकत्वात्पृथगित्यत्र पूर्णता " इत्यनुव्याख्यानश्लोकं व्याचक्षाणेन न्यायसुधाकृतोक्तम् " अत्र शास्त्रे तत्र तत्र प्रकरणे ह्यैक्यविषयतायां चोदि-तायां तत्तद्गतभेदवाक्यद्योतनेन सूत्रेषु भेदसमर्थनं क्रियते । तत्तात्पर्यभेदान्न पुनरुक्तता शङ्क्या । तथा हि—जिज्ञासावाक्येऽभेदशङ्कायां तद्गतब्रह्मशब्देनैव भेदसमर्थनं, जिज्ञास्यस्य ब्रह्मणो जीवत्वे शङ्किते तत्पूर्ववाक्योक्तलक्षणेन भेद-साधनम् । एवमेव " भेदव्यपदेशाच्चान्ये " (ब्र० सू० १।१।२१) इत्यादावपि पुनरुक्तादोषः परिहरणीय इति । इयांस्तु विशेषः—अन्नमयादिशब्दा विका-रार्थमयट्प्रत्ययानुरोधाज्जीववाचिनः । तेषु ब्रह्मशब्दादिप्रयोगस्तु ब्रह्माभेदवि-वक्षयेति शङ्किते तत्प्रकरणगतेन " स यश्चायं पुरुषे " (तै० उ० २।८) इति भेदव्यपदेशेन प्रत्यवस्थानमित्यादि संगच्छते । इह तु जिज्ञासावाक्य एव जिज्ञास्यब्रह्मनिर्विशेषजीवचैतन्यरूपमिति शङ्काहेतोः कस्यचिदभावात् । सर्व-

---

टि०— १ जिज्ञासावाक्य इति । " तद्विजिज्ञासस्व । तद्ब्रह्म " (तै० उ० ३ । १) इत्यत्रान्यतः सिद्धं ब्रह्मानूद्य विचारविधायके विचार्यं ब्रह्म जीवरूपमिति शङ्काया हेत्वभावे-नानुदये ब्रह्मशब्दस्य गुणपूर्णत्वसमर्थनेन भेदसाधनं निरालम्बनमिति द्योतितो भावः । अत्र केचित्—' जिज्ञास्यं ब्रह्म निर्विशेषजीवचैतन्यरूपमिति शङ्कायामस्ति हेतुः " एकमे-वाद्वितीयम् " (छा० ६ । २ । १) " अयमात्मा ब्रह्म " (मा० २) इत्यादिवाक्यजातम् । तस्य जिज्ञासावाक्येऽभावेऽपि तदुपात्तवेदान्तगतत्वेन तत्राप्यभेदशङ्कासंभवात् । जिज्ञा-सावाक्यगतस्यैव ब्रह्मशब्दस्य चेह बृंहकत्वादिलक्षणयोगेनाभेदशङ्काहेतुत्वोपपत्तेश्च । तस्मा-ज्जिज्ञासाधिकरणेऽपि ब्रह्मशब्देन जीवेश्वरयोर्भेदसाधनं युक्तमित्याहुः । तत्र ब्रूमः " एकमे-वाद्वितीयम् (छा० ६ । २ । १) इत्यादिवाक्येषु तादृशप्रतीतिसंभवेऽपि प्रकृतजिज्ञा-सावाक्ये तादृशशङ्कानुदयेन तादृशवाक्यमादाय तदुपपादनस्यैवोक्तत्वेनातीव साहसमात्र-

अग्रे वाच्योऽपि कस्ते कथय नय इह स्थापको भिन्नताया
जीवेशित्रोर्गुणानां स खलु विषमता सा तु दत्तोत्तरैव ।

व्या०—वेदान्तानामखण्डब्रह्मपरत्वेन सगुणे ब्रह्मणि मानं नास्तीत्येव त्वदीयपूर्वपक्षदर्शनाच्च । सर्ववेदान्तावलम्बनेन पूर्वपक्षे जिज्ञासावाक्यगतेनैकेन ब्रह्मशब्देन प्रत्यवस्थानमपि न संगच्छत इति ॥ २८ ॥

अपि चाग्रे निरूपणीयमपि न्यायजातं न जीवेश्वरयोर्भेदं व्यवस्थापयितुं प्रभवतीत्याह—अग्र इति । इत्थं हि त्वया तत्र तत्र न्याया निरूपिताः । प्रत्यक्षं तावज्जीवस्येश्वराद्भेदे प्रमाणम् । यद्यप्यनवगतेश्वरस्य पुरुषस्य स्वात्मनि तद्भेदो न प्रत्यक्षस्तथाऽपि शास्त्रावगतसर्वज्ञसर्वशक्तिकत्वादिमदीश्वरस्य स्वात्मानं च तद्विरुद्धाल्पज्ञत्वाल्पशक्तिकत्वादिधर्मकं साक्षिणाऽनुभवतः स प्रत्यक्ष एव । "यो हि यमर्थमधिगम्य तद्विरुद्धधर्माणं यमर्थं पश्यति स तस्मात्तस्य भेदं प्रत्यक्षयति" इति सर्वानुभवसिद्धम् । तथा च शास्त्रीयलक्षणज्ञानसाचिव्येन रत्नतत्त्वसाक्षात्कार इव शास्त्रीयेश्वरज्ञानसाचिव्येन स्वात्मनि तद्भेदसाक्षात्कारो नानुपपन्नः । एवं प्रत्यक्षागमावगतेन जीवेश्वरयोर्विरुद्धगुणवत्त्वेन दहनतुहिनवद्भेदोऽनुमातुं शक्यत इत्यनुमानमपि तद्भेदे प्रमाणम् । तथा "भिन्नोऽचिन्त्यः परमो जीवसंघात्पूर्णः परो जीवसंघो ह्यपूर्णः । यतस्त्वसौ नित्यमुक्तो ह्ययं च बद्धो मोक्षं तत एवाभिवाञ्छेत्" इति पूर्णापूर्णत्वादिविरुद्धधर्मवत्त्वोपपत्तिमुखप्रवृत्ता कौशिकश्रुतिरपि तत्र प्रमाणम् । न च श्रुतिर्व्यावहारिकभेदपरा, "एतमन्नमयमात्मानमुपसंक्रम्य" (तै० उ० ३।५) 'निरञ्जनः परमं साम्यमुपैति' (मु० ३।१।३) "प्रज्ञानेत्रो लोकः" (ऐ० उ० ३।३) इत्यादिश्रुतिषु मुक्तावपि प्राप्यप्रापकसादृश्यप्रतियोग्यनुयोगिनेतृनेतव्यत्वादिविरुद्धगुणवर्णनेन तद्भेदसिद्धेः। न चाभेदश्रुतिविरोधादुदाहृतश्रुतीनामन्यथानयनं शङ्क्यम् । सोपपत्तिककौशिकश्रुतिविरोधेनोपजीव्यविरोधेन च दुर्बलानामभेदश्रुतीनामेव गौणाभेदपरत्वौचित्यात् । "तत्त्वमसि" (छा० ६।८।७) इत्याद्यभेदश्रुत्या यदि जीवमनूद्य तस्येश्वरैक्यं बोध्येत, तदाऽल्पज्ञत्वादिधर्मकतया जीवग्राहकं साक्षिप्रत्यक्षमुपजीव्यं

टि०—त्वात् । ब्रह्मशब्देन क्लृप्तयोगमर्यादामुल्लङ्घ्य कल्पितयोगमर्यादया भेदसाधनस्य प्रामाणिकाध्वपरिपन्थित्वात् । सर्ववेदान्तानामप्यत्रैव भेदतात्पर्यकत्वसाधनेऽधिकरणान्तराणां पौनरुक्त्यस्य वैयर्थ्यस्य वाऽऽपत्तेः । तस्माद्ब्रह्मशब्दस्यैकस्य सर्ववेदान्तप्रतिभटत्वं सर्वथा दुःसंपादमिति विस्तरेण पूर्वमेव निरूपितमित्यलं मृतमारणेन ॥ २८ ॥